**गउआ** । [4]गौरादिङीबाधकः **स्व**स्रादेर्डा ॥ १.५४ ॥

## प्रथमे प-थोर्वा ॥ १.५५ ॥

**[ पुढुमं ]** । **मे**थिशिथिरशिथिलप्रथमे थस्य ढ इति ढः ॥ १.५५ ॥

## ज्ञो णत्वेऽभिज्ञादौ ॥ १.५६ ॥

**[ अहिण्णू[5] ]** । अभिज्ञ । **ख**घथधभाम् । **म्न**ज्ञोर्णः इति तस्य णः । **अ**नादौ०[6] - द्वित्वम् ॥

**अहिज्जो, सव्वज्जो** । **ज्ञो** ञ इति ञलुक् । **अ**नादौ० - द्वित्वम् ॥

**[ पण्णो ]** । प्राज्ञ । **ह्र**स्वः संयोगे । **म्न**ज्ञोर्णः । द्वित्वम् ॥ १.५६ ॥

---

१. (राजवच्च इति अतिदेशः ।) २. चन्द्र० - **क.ख.** । ३. (**स**र्वत्र लवरामवन्द्रे इत्यत्र) ४. (**गौरा**दिभ्यो मुख्यान्ङी)
५. अभिण्णू - **ता.** । ६. **स**मासे वा - द्वित्वम् - **दी.** ।

## एच्छय्यादौ ॥ १.५७ ॥

**[ सेज्जा ]** । शय्या । **शषोः** सः । **द्यय्यर्यां** जः । एत्वे कृते **तै**लादित्वाद् द्वित्वम् । एवं प्रायोऽन्यत्राऽपि । प्रथमं तु द्वित्वे 'आवासय'मित्यादावपि **लु**प्तयरवशषसामिति दीर्घात् प्राक् सकारस्य द्वित्वप्रसङ्गः ॥

**[ सुंदेरं ]** । सौन्दर्य । **उत्** सौन्दर्यादौ । **ब्र**ह्मचर्यतूर्येति र्यस्य रः ॥

**[ गेंदुअं ]** । कन्दुक । **म**रकतमदकले गः कन्दुके त्वादौ(देः) इति कस्य गः ॥

**[ एत्थ ]** । अत्र । **त्र**पो हि[ह]त्थाः ॥ १.५७ ॥

## वल्ल्युत्कर-पर्यन्ता-ऽऽश्चर्ये वा ॥ १.५८ ॥

**[ पेरंतो, पज्जंतो ]** । पर्यन्त । **एतः** पर्यन्ते - र्यस्य रः । **द्यय्यर्यां** जः । **अ**नादौ शेषादेशयोर्द्वित्वम् ॥

**[ अच्छेरं; अच्छरियं[1], अच्छअरं, अच्छरिज्जं, अच्छरीयं[2] ]** । आश्चर्य । **ह्रस्वः** संयोगे । **ह्र**स्वात् थ्यश्चत्सेति छ । **द्वि**तीयतु० । **आ**श्चर्ये रः । पक्षे - **अ**तो रियाररिज्जरीयं इति र्यस्य चत्वार आदेशाः ॥ १.५८ ॥

## ब्रह्मचर्ये चः ॥ १.५९ ॥

**[ बम्हचेरं ]** । ब्रह्मचर्य । **स**र्वत्रेति रलुक् । **प**क्ष्मश्मष्मस्मह्मां म्हः । **ब्र**ह्मचर्यतूर्य० - र्यस्य रः ॥ १.५९ ॥

## तोऽन्तरि ॥ १.६० ॥

**[ अंतेउरं, अंतेआरी ]** । अन्तर्-पुर, अन्तर्-चारिन् । **ङ**ञणनो व्यञ्जने । **अ**न्त्यव्यञ्जनस्य - रलुक् ॥

**[ अंतो ]** । अन्तः सप्तम्यन्तः संस्कृतसिद्धः । [3]**अ**तो डो विसर्गस्य इति डो ॥

**वीसंभनिवेसिआणं** । विश्रम्भनिवेशित । **स**र्वत्रेति रलुक् । **लु**प्तयरवशषसामिति दीर्घः । आम् । **टा**- आमोर्णः । **ज**स्शस्ङसीति दीर्घः ॥ १.६० ॥

---

१. अच्छरिअं - **मु.** । २. अच्छरीअं - **मु.** । ३. सेर्डो: - **ताटि.** ।

## ओत् पद्मे ॥ १.६१ ॥

**[ पोम्मं ]** । पद्म । **क**गटडेति दलुक् । **तै**लादौ - द्वित्वम् ॥

**पउमं** इत्यत्र **प**द्मछद्ममूर्खेति मात् प्राग् उ । **क**गेति दलुक् ॥ १.६१ ॥

## नमस्कार-परस्परे द्वितीयस्य ॥ १.६२ ॥

**[ नमोक्कारो ]** । नमस्कार । **क**गटडेति सलुक् । **तै**लादौ - द्वित्वम् ॥

**[ परोप्परं[१] ]** । परस्पर । सि । **गुणाद्याः** क्लीबे वा - क्लीबत्वम् ॥ १.६२ ॥

## वाऽर्पौ ॥ १.६३ ॥

**ओप्पेइ** । अर्पि । ति । **त्या**दीनामितीच् । **णे**रदेदावावे - एत् । **स**र्वत्रेति रलुक् । **तै**लादौ - द्वित्वम् ॥

**अप्पियं[२]** । अर्पि । क्त । **लुगावी** क्तभावकर्मसु इति णिग्लुक् । **व्य**ञ्जनाददन्ते । **क्ते** - इत्वम् ॥ १.६३ ॥

## स्वपावुच्च ॥ १.६४ ॥

**[ सोवइ, सुवइ ]** । स्वप् । तिव् । इच् । **व्य**ञ्जनाददन्ते । **स**र्वत्रेति वलुक् । **पो** वः ॥ १.६४ ॥

## नात् पुनर्यादाई वा ॥ १.६५ ॥

**न** । सि ॥

**[ उणा ]** । पुनर् । बाहुलकादादेरपि पस्य लुक् । अम् । अम्स्यमोः **अव्यय**स्य - लुक् ॥ १.६५ ॥

## वाऽलाब्वरण्ये लुक् ॥ १.६६ ॥

**[ लाउं, लाऊ ]** । अलाबु, अलाबू । **स**र्वत्रेति वलुक् (?)[३] ॥

**[ आरण्णकुंजरो ][४]** । आरण्यकुञ्जर । अरण्ये भवो जातो वा आरण्यः । केचि**दरण्या**त् पथिन्यायाध्यायेत्यस्याऽकञो नरवर्जं विकल्पमाहुः । ततो भवेऽर्थे तन्मताभिप्रायेण **रूप्यो**त्तरपदारण्याण्ण इति ण । **अ**धो मनयाम् । द्वित्वम् । सि → डो ॥

---

१. बाहुलकात् फो न भवति (**ष्पस्पयोः** फ इत्यनेन) - **खटि. ताटि.** । २. अप्पिअं - **क.ख.मु.** । ३. (अत्र **क**गचजतद० इति सूत्रेण भाव्यम् ।) ४. केचिन्नरवर्जं पूर्वसूत्रे विकल्पमाहुरियण् (रिति ण) । अन्यथाऽकञ् स्यात् - **ताटि.** ।

**[ व्व ]** । **मि**वपिवेति व्व ॥

**[ वेलंतो[१] ]** । वेलृ गतौ । शतृ । **श**त्रानशः । **व्य**ञ्जनाददन्ते ॥ १.६६ ॥

## वाऽव्ययोत्खातादावदातः ॥ १.६७ ॥

**[ चमरो ]** । चामर । **वा**ऽक्ष्यर्थेति पुंस्त्वम् ॥

**[ परिट्ठविओ ]** । प्रति-स्था ।[२] संस्कृतवाक्येन क्तः । **लु**गावीक्तेति आविः । **निः**प्रती ओत्परीति परि ॥

**[ पाययं ]** । प्राकृत । **ऋ**तोऽत् ॥

**[ तलवेंटं ]** । तालवृन्त । **इ**देदोद्वृन्ते इति ऋत एदोत् । **वृ**न्ते ण्ट इति त(न्त)स्य ण्टः ॥

**[ बम्हणो ]** । ब्राह्मण । **प**क्ष्मष्मश्मस्मह्मां म्हः ॥

**[ पुव्वण्हो ]** । पूर्वाह्ण । **सू**क्ष्मश्नष्णस्नेति ण्ह ॥

**[ दव्वग्गी ]** । दवाग्नि[३] । **ह्र**स्वः सं० । **अ**धो मनयाम् ॥

**[ चडु, चाडू ]** । चटु, चाटु । सि । **अ**न्त्यव्यं० । **अ**क्लीबे सौ - दीर्घः ॥ १.६७ ॥

## घञ्वृद्धेर्वा ॥ १.६८ ॥

**[ पत्थवो ]** । प्रस्ताव । **स्त**स्य थोऽसमस्तस्तम्बे । **द्वि**तीयतुर्ययोः० ॥ १.६८ ॥

## महाराष्ट्रे ॥ १.६९ ॥

**[ मरहट्ठं, मरहट्ठो[४] ]** । महाराष्ट्र । **म**हाराष्ट्रे हरोर्व्यत्ययः । **ह्र**स्वः सं० । **ष्ट**स्याऽनुष्ट्रेष्टासन्दिष्टे - ष्टस्य ठः । **द्वि**तीय० ॥ १.६९ ॥

## मांसादिष्वनुस्वारे ॥ १.७० ॥

**[ संजत्तिओ ]** । सांयात्रिक । **आ**देर्यो जः - अनादेरपि ॥

**[ मासं ]** । मांस । **मां**सादेर्वा - अनुस्वारलुक् ॥ १.७० ॥

---

१. वेल्लंतो - **मु.** । रमेः संखुड्ड-खुड्डोब्भावेति वेल्लादेशः - **दी.** । २. ०स्था । **स्थ**ष्ठाथक्कचिट्ठ० । संस्कृत० - **क.ख.** ।
३. दावाग्नि - **क.** । ४. पुंनपुंसकः - **ताटि.** ।

**श्यामाके मः ॥ १.७१ ॥**

**इः सदादौ वा ॥ १.७२ ॥**

[ **निसिअरो** ] । निशाकर, निशाचर ॥

[ **कुप्पिसो** ] । कूर्पास । **ह्रस्वः** संयोगे ॥ १.७२ ॥

**आचार्ये चोऽच्च ॥ १.७३ ॥**

[ **आइरिओ** ] । आचार्य । **ह्रस्वः** सं० । **स्याद्भव्यचैत्ये**ति यात् प्राक् इ ॥ १.७३ ॥

**ईः स्त्यान-खल्वाटे ॥ १.७४ ॥**

[ **ठीणं, थीणं** ] । स्त्यान । **स्त्यान**चतुर्थार्थे वेति स्तस्य ठः । **स्त**स्य थोऽस्मस्तस्तम्बे - थः । **नो** णः ॥

**थिण्ण**मिति तु **से**वादौ वा - द्वित्वे **ह्रस्वः** संयोगे च ॥

[ **खल्लीडो** ] । खल्वाट । **स**र्वत्रेति वलुक् । **अ**नादौ० - द्वित्वम् । **टो** डः ॥

[ **संखायं** ] । स्त्यैं सङ्घाते सम्पूर्वः । क्तः । **सम**ः स्त्यः खाः । **क**गेति तलुक् । यश्रुतिः ॥ १.७४ ॥

**उः सास्ना-स्तावके ॥ १.७५ ॥**

[ **सुण्हा** ] । सास्ना । **सू**क्ष्मश्नष्णस्नह्नह्णक्ष्णां ण्हः ॥

[ **थुवओ** ] । स्तावक । **स्त**स्य थोऽसमस्तस्तम्बे ॥ १.७५ ॥

**ऊद् वाऽऽसारे ॥ १.७६ ॥**

**आर्यायां र्यः श्वश्र्वाम् ॥ १.७७ ॥**

[ **अज्जू** ] । आर्या । **ह्रस्वः** सं० । **द्य**य्यर्यां जः । **अ**नादौ० - द्वित्वम् ॥ १.७७ ॥

**एद् ग्राह्ये ॥ १.७८ ॥**

[ **गेज्झं** ] । ग्राह्य । **स**र्वत्रेति रलुक् । **सा**ध्वसध्यह्यां झः । **तै**लादौ प्रसङ्गे **द्वि**तीयतुर्ययोः० ॥ १.७८ ॥

## द्वारे वा ॥ १.७९ ॥

**[ देरं ]** । द्वार । **स**र्वत्रेति वलुक् ॥

पक्षे - **प**द्मछद्मेति वात् प्राक् उ । **क**गेति वलुक् - **दुआरं** ॥

**क**गटडेति दलुक् - **वारं** ॥

**स**र्वत्रेति वलुक् - **दारं** ॥

**[ नेरइओ, नारइओ ]** । नैरयिक, नारकिक । निरये भवो जातो वा, नरके भवो जातो वा । **अध्या**त्मादिभ्य इकण् ॥

**[ पच्छेकम्मं ]** । पश्चात्कर्मन् । **ह्र**स्वात् थ्यश्चत्सप्सामनिश्चले इति छ । **अ**नादौ० - द्वित्वम् ॥

**[ असहेज्जदेवासुरा ]**[1] । असहायदेवासुर । **आ**र्षत्वादेत्वं यस्य जश्च । **तै**लादौ - द्वित्वम् ॥ १.७९ ॥

## पारापते रो वा ॥ १.८० ॥

## मात्रटि वा ॥ १.८१ ॥

**[ एत्तिअमेत्तं ]** । एतावन्मात्र । **इ**दंकिमश्च डेत्तिअडेत्तिलडेद्दहाः - डावतः स्थाने डेत्तिअ एतल्लुक् च । **स**र्वत्रेति रलुक् । **तै**लादौ - द्वित्वम् ॥ १.८१ ॥

## उदोद् वाऽऽर्द्रे ॥ १.८२ ॥

**[ उल्लं ]** । आर्द्र । **स**र्वत्रेति ऊर्ध्वरलुक् । **क**गटडेति दलुक् । **ह**रिद्रादौ लः इति रस्य लत्वम् । **तै**लादौ - द्वित्वम् ॥

**[ बाहसलिलपवहेण ]** । बाष्पसलिलप्रवाह । **बा**ष्पे होऽश्रुणिं(णि) - हः । **घ**ञ्वृद्धेर्वा-ह्रस्वः ॥

आर्द्र । णिज् । तिव् । **त्या**दीनामितीच् । **णे**रदेदावावे - एत्वम् । लत्वे द्वित्वे च **उल्लेइ**[2] ॥ १.८२ ॥

---

१. असहाय्य इति वा प्रकृतिः - **दी.** । असहाय-असहाय्य इति वा वाक्यखण्डमिदम् - **ताटि.** । २. ओल्लेइ - **क.ता.** ।

## ओदाल्यां पङ्क्तौ ॥ १.८३ ॥

## ह्रस्वः संयोगे ॥ १.८४ ॥

**[ अम्बं ]** । आम्र । **ता**म्राम्रे म्बः ॥

**[ विरहग्गी ]** । विरहाग्नि । **अ**धो मनयाम् - नलुक् । **अ**नादौ० - द्वित्वम् ॥

**[ मुणिंदो ]** । मुनीन्द्र । **द्रे** रो नवा - रलुक् ॥

**[ गुरुल्लावा ]** । गुरूल्लाप । जस् । **ज**स्शसोर्लुक् । **ज**स्शस्ङसित्तोदोद्वामि दीर्घः ॥

**[ मिलिच्छो ]** । म्लेच्छ । ह्रस्वे सति **ला**त् इत्यनेन लात् प्राक् इ ॥

**[ दिट्ठिक्कथणवट्टं ]** । दृष्टैकस्तनपृष्ट । **इ**त् कृपादौ । **ष्ट**स्याऽनुष्ट्रेति ठः । **द्वि**तीयतुर्य० । एक । **से**वादौ वा - द्वित्वम् । **स्त**स्य थोऽसमस्तस्तम्बे । **नो** णः । **ऋ**तोऽत् । **पो** वः । **क**गटडेति षलुक् । **द्वि**तीयेति द्वित्वम् ॥

**[ अहरुट्ठं ]**[1] । अधरोष्ठ । **ख**घथधभाम् । ह्रस्वे **क**गटडेति षलुक् । **द्वि**तीयतुर्ययो० ॥

**[ आयासं ]** । आकाश । **क**गेति कलुक् । **श**षोः सः ॥

**[ ईसरो ]** । ईश्वर । **स**र्वत्रेति वलुक् । **श**षोः सः ॥[2]

**[ ऊसवो ]** । उत्सव । **अ**नुत्साहोच्छन्ने त्सच्छे - ऊकारः ॥ १.८४ ॥

## इत एद् वा ॥ १.८५ ॥

**[ वेण्हू ]** । विष्णु । **सू**क्ष्मस्नष्णश्नह्नेति ण्ह ॥

**[ पेट्ठं ]** । पृष्ट । **पृ**ष्टे वाऽनुत्तरपदे - इः ॥

**[ बेल्लं ]** । बिल्व । **स**र्वत्रेति वलुक् । **तै**लादौ **अ**नादौ० च द्वित्वम् ॥ १.८५ ॥

## किंशुके वा ॥ १.८६ ॥

**[ केसुअं, किंसुअं ]** । किंशुक । **मां**सादेर्वेति वाऽनुस्वारलुक् । **श**षोः सः ॥ १.८६ ॥

---

१. अत्र **गु**णाद्याः क्लीबे वा - क्लीबत्वम् - **खटि.** । २. यदि प्रथमं **ह्र**स्वः संयोगे इति क्रियते, **स**र्वत्रेति वलुकि **लु**प्तयरवेति पुनर्दीर्घः - **दी.** ।

## मिरायाम्[१] ॥ १.८७ ॥

## पथि-पृथिवी-प्रतिश्रुन्-मूषिक-हरिद्रा-बिभीतकेष्वत् ॥ १.८८ ॥

**[ पुहई, पुढवी ]** । पृथिवी । **उ**दृत्वादौ । **ख**घथधभाम् । **नि**शीथपृथिव्योर्वेति ढः ॥

**[ पडंसुआ ]** । प्रतिश्रुत् । **प्र**त्यादौ डः । **व**क्रादावन्त इत्यनुस्वारः । **श**षोः सः । **स**र्वत्रेति रलुक् । **स्त्रि**यामादविद्युतः ॥

**[ हलद्दी, हलद्दा ]** । हरिद्रा । **ह**रिद्रादौ लः । **द्रे** रो नवेति रलुक् । **अ**नादौ० - द्वित्वम् । **छा**याहरिद्रयोरिति वा ङी ॥

**[ बहेडओ ]** । बिभीतक । **ख**घथधभाम् । **ए**त पीयूषापीडेति एत्वम् । **प्र**त्यादौ डः इति तस्य डत्वम् ॥

**[ पंथं ]** । पन्थ । स्वर्त्त पथुण् गतौ । पथ्यतेऽस्मिन्निति पन्थः[२] । **पुन्ना**म्नि घः - घप्रत्ययः । अम् । **अ**मोऽस्य । **मो**ऽनुस्वारः ॥

**कि**रेरहिर किलार्थे वा - **किर**प्रयोगः ॥

**देसित्ता** । दिश् । क्त्वा । **व्य**ञ्जनाददन्ते । **ए**च्च क्त्वातुम्तव्येति इः । **यु**वर्णस्य गुणः । **स**र्वत्रेति वलुक् । **अ**नादौ० - द्वित्वम् ॥ १.८८ ॥

## शिथिलेङ्गुदे वा ॥ १.८९ ॥

**[ सढिलं, पसढिलं ]** । शिथिल, प्रशिथिल । **मे**थिशिथिरशिथिलेति थस्य ढः ॥ १.८९ ॥

## तित्तिरौ रः ॥ १.९० ॥

## इतौ तो वाक्यादौ ॥ १.९१ ॥

**[ जंपिआवसाणे ]** । कथित-अवसान । कथण् । **क**थेर्वज्जरपज्जरोप्पालेति जंप । क्त । **व्य**ञ्जनाददन्ते । **क्ते** - इ ॥

**[ पुरिसो त्ति ]** । पुरुष इति । **पु**रुषे रोः - इः । **श**षोः सः । सि → डो । **इ**तेः स्वरात् तश्च द्विः - इलुक् द्वित्वं च ॥ १.९१ ॥

---

१. मीयते- नयति स्थविरेति साधुः मिरा- सीमा - **खटि.** । मीयते- परिच्छिद्यते वस्तु अनयेति स्थविरपिठिरेति (उ. ४१७) मिरा निपातः मर्यादावाचकः - **कटि.** । मीयते स्थविरेति साधुः - **ताटि.** । २. स्वर्त्त पथुण् गतौ । **उ**दितः स्व० । पथ्यतेऽनेनेति पन्थः । चुरादि० स्वरविधिगमग्रहामल् (?) - लप्र० - **खटि.** ।

## [1]ईज्जिह्वा-सिंह-त्रिंशद्-विंशतौ त्या ॥ १.९२ ॥

**[ सीहो ]** । सिंह । **मां**सादेर्वा ॥

**[ वीसा, तीसा ]** । विंशति, त्रिंशत् । **विं**शत्यादेर्लुगित्यनुस्वारलुक् । विद्युद्वर्जनादसङ्ख्या-शब्दस्य प्रायो विधिरिति **स्त्रि**यामाद० इति नाऽऽत्वं, किन्तु **आद्** इत्याप् । **लु**गित्यलुक् ॥ १.९२ ॥

## लुंकि निरः ॥ १.९३ ॥

**[ नीसरइ ]** । निर्-सरति । **क**गेति तलुक् । * अथवा - सृं गतौ । तिव् । **त्या**दीनामितीच् । **ऋ**वर्णस्याऽर् । **व्य**ञ्जनाददन्ते ॥

**[ निस्सहाइँ ]** । निर्-सह । **नि**र्दुरोर्वा - लुग्निषेधः । जस् । **ज**स्शस इँइं० ॥ १.९३ ॥

## द्वि-न्योरुत् ॥ १.९४ ॥

**[ दुमत्तो ]** । द्विमात्र ॥

**[ दुआई ]** । द्विजाति ॥

**[ दुरेहो ]** । द्विरेफ । **फो** भहौ - हः ॥

**[ दुइओ ]** । द्वितीय । **पा**नीयादिष्वित् - इ ॥

**नि( णु )मज्जइ** । षद्लृं । **नेः** सदो मज्जः । तिव् → इच् । **व्य**ञ्जनाददन्ते । **वा**ऽऽदौ - णत्वम् । * निमज्जतीति सिद्धस्य वा ॥

**[ णुमन्नो ]** । निमग्न । **वा**ऽऽदौ - णत्वम् । **क**गटडेति गलुक्[2] । **नो** णः । **अ**नादौ० - द्वित्वम् ॥

**निवडइ** । पत्लृ । **पो** वः[3] । **स**दपतोर्डः । तिव् → इच् । **व्य**ञ्जनाददन्ते ॥ १.९४ ॥

## प्रवासीक्षौ ॥ १.९५ ॥

**[ पावासुओ ]** । प्रवासिन् । **अतः** समृद्ध्यादौ वा - आत्वम् । **स्वा**र्थे कश्च वा ॥

**[ उच्छू ]** । इक्षु । **छो**ऽक्ष्यादौ ॥ १.९५ ॥

---

१. ईर्जिह्वा० - **मु.क.ख.** । २. उभयप्राप्ते गलोपः - **ताटि.** । ३. धातूपसर्गयोरभेदेनाऽनादित्वं, ततः **पो** वः - **ताटि.** ।

## युधिष्ठिरे वा ॥ १.९६ ॥

**[ जहुट्ठिलो ]** । युधिष्ठिर । **आ**देर्यो जः । **उ**तो मुकुलादिष्वदित्यत् । **ह**रिद्रादौ लः ॥ १.९६ ॥

## ओच्च द्विधाकृगः ॥ १.९७ ॥

**किज्जइ** । कृग् । ते । **त्या**दीनामितीच् । **क्यः शि**ति । **ई**यइज्जौ क्यस्य इति क्यस्य इज्ज । **लुक्** इति ऋलुक् ॥

**[ दोहाइअं ]** । द्विधाकृत । **इ**त् कृपादौ ॥

**[ दुहा वि ]** । द्विधा अपि । **प**दादपेर्वा इति अलुक् । **पो** वः ॥

**[ सो ]** । तद् । **अ**न्त्यव्यं० । सि । **त**दश्च तः सोऽक्लीबे । **वै**तत्तदः इति सेर्डोः ॥ १.९७ ॥

## वा निर्झरे ना ॥ १.९८ ॥

## हरीतक्यामीतोऽत् ॥ १.९९ ॥

**[ हरडई ]** । हरीतकी । **प्र**त्यादौ डः ॥ १.९९ ॥

## आत् कश्मीरे ॥ १.१०० ॥

**[ कम्हारा ]** । कश्मीर । **प**क्ष्मश्मष्मेति म्ह ॥ १.१०० ॥

## पानीयादिष्वित् ॥ १.१०१ ॥

**जिअइ, जिअउ** । जीवति, जीवतु इति सिद्धप्रकृतेः ॥

**[ विलिअं ]** । व्रीडित । **डो** लः ॥

**[ दुइअं ]** । द्वितीय । **द्वि**न्योरुत् ॥

**[ पलिविअं ]** । प्रदीपित । **प्र**दीपिदोहदे लः इति दस्य लः ॥

**[ ओसिअंतं ]** । षद्लृं वि० अव-पू० । शतृ । **श**त्रानशः - न्त । **व्य**ञ्जनाददन्ते । **अ**वापोते - अवस्य ओत्वम् ॥

**[ वम्मिओ ]** । वल्मीक[१] । **स**र्वत्रेति ललुक् ॥ १.१०१ ॥

---

१. मीदादेशः (?) - **खटि.** ।

## उज्जीर्णे ॥ १.१०२ ॥

## ऊर्हीन-विहीने वा ॥ १.१०३ ॥

[ **पहीणजरमरणा** ] । प्रहीनजरामरण । **दी**र्घह्रस्वौ मिथो वृत्तौ - ह्रस्वः ॥ १.१०३ ॥

## तीर्थे हे ॥ १.१०४ ॥

[ **तूहं** ] । तीर्थ । **दुः**खदक्षिणतीर्थे वा - हः ॥ १.१०४ ॥

## एत् पीयूषा-ऽऽपीड-बिभीतक-कीदृशेदृशे ॥ १.१०५ ॥

[ **आमेलो** ] । आपीड । **नी**पापीडे मो वा इति पस्य मः । **डो** लः ॥

[ **बहेडओ** ] । बिभीतक । **प**थिपृथिवी० - अत्वम् । **प्र**त्यादौ डः ॥

[ **केरिसो** ] । कीदृश । **दृ**शः क्विप्टक्सकः - रिः ॥ १.१०५ ॥

## नीड-पीठे वा ॥ १.१०६ ॥

[ **नेड्डं**[१] ] । नीड । **से**वादौ वेति द्वित्वम् ॥

[ **पेढं** ] । पीठ । **ठो** ढः ॥ १.१०६ ॥

## उतो मुकुलादिष्वत् ॥ १.१०७ ॥

[ **गरुई** ] । गुर्वी । **त**न्वीतुल्येषु - वात् प्राक् उः ॥

[ **जहुट्ठिलो** ] । युधिष्ठिर । **यु**धिष्ठिरे वा - इत उत्वम् । **ह**रिद्रादौ लः ॥

[ **सोअमल्लं** ] । सौकुमार्य । **औ**त ओत् । **ह्र**स्वः संयोगे । **प**र्यस्तपर्याणसौकुमार्ये ल्लः ॥

[ **गलोई** ] । गुडूची । **डो** लः । **ओ**त् कूष्माण्डीतूणीरेति ऊकारस्य ओत्वम् ॥ १.१०७ ॥

## वोपरौ ॥ १.१०८ ॥

[ **अवरिं** ] । उपरि । संस्कृतसिद्धः । **व**क्रादावन्तः ॥ १.१०८ ॥

## गुरौ के वा[२] ॥ १.१०९ ॥

---

१. नेडं - **मु.** । नेड्डं - **ता.** । २. गुरौ के वा । गुरुरेव गुरुक । **स्वा**र्थे क० - **क.ख.** ।

## इर्भ्रुकुटौ ॥ १.११० ॥

## पुरुषे रोः ॥ १.१११ ॥

**[ पउरिसं ]**। पौरुष । **अउः** पौरादौ चेति अउः । एकदेशविकृतमनन्यवद् (न्या. सं. १.७)। अनेन इत्वम् ॥ १.१११ ॥

## ई[1] क्षुते ॥ १.११२ ॥

## ऊत् सुभग-मुसले वा ॥ १.११३ ॥

**[ सूहवो ]**। सुभग । **ऊत्वे** दुर्भगसुभगे व इति गस्य वः ॥ १.११३ ॥

## अनुत्साहोच्छन्ने[2] त्स-च्छे ॥ १.११४ ॥

**[ ऊसुओ ]**। उद्-शुक । **अन्त्यव्यं०** - दलुक् । संस्कृते च्छस्य सिद्धत्वादूत्वम् ॥[3]

**[ उच्छाहो ]**। उत्साह । **ह्रस्वात्** थ्यश्चेति छः ॥ १.११४ ॥

## र्लुकि दुरो वा ॥ १.११५ ॥

**[ दूहवो ]**। दुर्भग । **निर्दुरोर्वेति** वा लुग्निषेधात् **अन्त्यव्यं०** - वा रलुक् । **ऊत्वे** दुर्भगसुभगे वः ॥ १.११५ ॥

## ओत् संयोगे ॥ १.११६ ॥

**[ पोक्खरं ]**। पुष्कर । **ष्कस्कयोर्नाम्नि** । **तैलादिप्रसङ्गे द्वितीयतुर्ययोरिति** ॥

**[ लोद्धओ, मोत्था ]**। लुब्धक, मुस्ता । **तैलादिप्रसङ्गे**[4] **पूर्वः** ॥

मुद्गरादिषु **तैलादौ** - द्वित्वम् ॥ १.११६ ॥

## कुतूहले वा, ह्रस्वश्च ॥ १.११७ ॥

**[ कोउहल्लं ]**। कुतूहल । **सेवादौ** वा - द्वित्वम् ॥ १.११७ ॥

## अदूतः सूक्ष्मे वा ॥ १.११८ ॥

**[ सण्हं ]**। सूक्ष्म । **सूक्ष्मश्नष्णस्नेति** ण्हः ॥ १.११८ ॥

---

१. ईः क्षुते - **मु.** । ई क्षुते - **ख.ता.** । २. ०होत्सन्ने - **मु.** । ०होच्छन्ने - **ता.** । ३. (**अघोषे** प्रथमोऽशिटः, **प्रथम**मादधुटि शश्छः इत्यनेन ।) ४. (**द्वि**तीयतुर्ययोरिति)

## दुकूले वा, लश्च द्विः ॥ १.११९ ॥

## ईर्वोद्व्यूढे ॥ १.१२० ॥

## उर्भ्रू-हनूमत्-कण्डूय-वातूले ॥ १.१२१ ॥

[ **भुमया** ]। भ्रू । **भ्रु**वो मयाडमयेति स्वार्थे मयाप्रत्ययः ॥

[ **हनुमंतो** ]। हनूमत् । **आ**ल्विल्लोल्लालवन्तमन्तेत्तेरमणा मतोः इति मन्तादेशः ॥ १.१२१ ॥

## मधूके वा ॥ १.१२२ ॥

## इदेतौ नूपुरे वा ॥ १.१२३ ॥

## ओत् कूष्माण्डी-तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये ॥ १.१२४ ॥

[ **कोहली** । कूष्माण्डी ।] **कू**ष्माण्ड्यां ष्मो लस्तु ण्डो वा इति ष्मास्थाने हत्वं डश्च (ण्डस्य च) लत्वं वा ॥

[ **कोप्परं** ]। कूर्पर । **तै**लादौ ॥

[ **थोरं** ]। स्थूल । **क**गटडेति सलुक् । **स्थू**ले लो रः ॥

[ **गलोई** । गुडूची ]। **उ**तो मुकुलादिष्वत् इति गु-उकारस्याऽत् ॥

[ **मोल्लं** ]। मूल्य । **से**वादौ वा - द्वित्वम् ॥ १.१२४ ॥

## स्थूणा-तूणे वा ॥ १.१२५ ॥

## ऋतोऽत् ॥ १.१२६ ॥

[ **घट्ठो** ]। घृष्ट । **ष्ट**स्याऽनुष्ट्रेति ठः । **द्वि**तीयतुर्य० ॥

[ **दुहाइअं** ]। द्विधाकृत । **ओ**च्च द्विधाकृगः ॥ १.१२६ ॥

## आत् कृशा-मृदुक-मृदुत्वे वा ॥ १.१२७ ॥

[ **माउक्कं** ]। मृदुक । **से**वादौ वा - द्वित्वम् ॥

[ **माउक्कं, मउत्तणं** ]। मृदुत्व । **श**क्तमुक्तदष्टरुग्णेति त्वस्य कः । **अ**नादौ० - द्वित्वम् । **त्व**स्य डिमात्तणौ वेति त्तणः ॥ १.१२७ ॥

## इत् कृपादौ ॥ १.१२८ ॥

**[ गिंठी ]** । गृष्टि । **व**क्रादावन्त इत्यनुस्वारः ॥

**[ पिच्छी ]** । पृथ्वी । **त्व**थ्वद्वध्वामिति थ्वस्य छकारस्तस्य **द्वि**तीयतुर्येति चकारः ॥

**[ इड्ढी[१] ]** । ऋद्धि । **श्र**द्धर्द्धिमूर्द्धार्द्धेऽन्ते वा इति द्धेर्ढः । **द्वि**तीयतुर्येति द्वित्वम् ॥

**[ किच्चा ]** । कृत्या । **त्यो**ऽचैत्ये - त्यस्य चः ॥

**[ विञ्चुओ ]** । वृश्चिक । **वृ**श्चिके श्चेर्ञ्चुर्वा इति श्चेः ञ्चुरादेशः ॥

**[ वाहित्तं ]** । व्याहृत । **अ**धो मनयाम् । **से**वादौ वेति तस्य द्वित्वम् ॥

**[ विइण्हो ]** । वितृष्ण । **सू**क्ष्मश्नष्णेति ण्हः ॥

**[ छिहा ]** । स्पृहा । **स्पृ**हायां छः ॥

**[ रिद्धी ]** । ऋद्धि । **रिः** केवलस्य ॥ १.१२८ ॥

## पृष्ठे वाऽनुत्तरपदे ॥ १.१२९ ॥

**[ पिट्ठी ]** । पृष्ट(ष्ठ) । **जाते**रयान्त० - ङी[२] ॥

**पिट्ठिपरिट्ठवियं[३]** । पिट्ठी । प्रतिष्ठा । णिग् । क्त । **गु**र्वादेरविर्वेति णेरविः । **लु**गित्यालुक् । **दी**र्घह्रस्वौ मिथो वृत्तौ । **निः**प्रती ओत्परी०[४] ॥ १.१२९ ॥

## मसृण-मृगाङ्क-मृत्यु-शृङ्ग-धृष्टे वा ॥ १.१३० ॥

**[ मिच्चू[५] ]** । मृत्यु । **त्यो**ऽचैत्ये ॥ १.१३० ॥

## उदृत्वादौ ॥ १.१३१ ॥

**[ पुहई ]** । पृथिवी । **प**थिपृथिवीति थेरिकारस्य अत्वम् ॥

**[ पाउसो ]** । प्रावृष् । **दि**क्प्रावृषोः सः ॥

---

१. इद्धी - **मु.** । इड्ढी - **ता.** । २. **जाते**रयान्तेति, **अजा**तेः पुंस इति वा ङीः - **तार्टि.** । ३. **वे**माञ्जल्यादित्वात् स्त्रीत्वे **जाते**रयां० - ङी । **दी**र्घह्रस्वौ० - ह्रस्वः । **निः**प्रती ओत्परी० । **वा**ऽव्ययोत्खातेति ह्रस्वः - **तार्टि.** । (अत्र 'परिस्थापित' इति संस्कृतसिद्धमेवाऽऽदृतम् ।) ४. ०ओत्परीति परि । **ष्ट**स्याऽनुष्ट्रेति - **दी.** । (अत्र 'पृष्ट' इति प्रकृतित्वेनाऽऽदृतम् ।) ५. मिच्चु - **मु.** । मिच्चू - **ता.** ।

**[ पहुडि, पाहुडं ]** । प्रभृति, प्राभृत । **प्र**त्यादौ डः ॥

**[ वुंदावणो ]** । वृन्दावन । **वा**ऽक्ष्यर्थवचनाद्या इति पुंस्त्वम् ॥

**[ वुड्ढो, वुड्ढी ]** । वृद्ध, वृद्धि । **द**ग्धविदग्धवृद्धिवृद्धे ढः इति द्धस्य ढः ॥

**[ उज्जू ]** । ऋजु । **तै**लादौ - द्वित्वम् ॥

**[ पुहुवी ]** । पृथ्वी । **त**न्वीतुल्येषु - वात् प्राक् उः ॥ १.१३१ ॥

## निवृत्त-वृन्दारके वा ॥ १.१३२ ॥

## वृषभे वा वा ॥ १.१३३ ॥

## गौणान्त्यस्य ॥ १.१३४ ॥

**[ माउसिआ, पिउसिआ ]** । मातृस्वसृ, पितृस्वसृ । **मा**तृपितुः स्वसुः सिआच्छौ - सिआऽऽदेशः ॥ १.१३४ ॥

## मातुरिद् वा ॥ १.१३५ ॥

## उदूदोन्मृषि[१] ॥ १.१३६ ॥

## इदुतौ वृष्ट-वृष्टि-पृथक्-मृदङ्ग-नप्तृके ॥ १.१३७ ॥

**[ मिइंगो ]** । मृदङ्ग । **इः** स्वप्नादौ इति दकारस्य इकारः ॥ १.१३७ ॥

## वा बृहस्पतौ ॥ १.१३८ ॥

**[ बिहप्फई ]** । बृहस्पति । **ष्प**स्पयोः फ इति स्पस्य फः ॥ १.१३८ ॥

## इदेदोद् वृन्ते ॥ १.१३९ ॥

**[ विण्टं ]** । वृन्त । **वृ**न्ते ण्टः ॥ १.१३९ ॥

## रिः केवलस्य ॥ १.१४० ॥

**[ रिच्छो ]** । ऋक्ष । **ऋ**क्षे वा - छः ॥ १.१४० ॥

---

१. प्रथमादेशकरणं गौणस्येति निवृत्त्यर्थम् । यद्वा गौणस्येत्यन्त्यऋकारसम्बद्धात्तन्निवृत्तौ गौणस्येति निवृत्तम् - **खटि.** ।

## ऋणर्ज्वृषभर्त्वृषौ वा ॥ १.१४१ ॥

**[ उज्जू ]** । ऋजु । **उदृत्वादौ** - ऋकारस्य उः । **तैलादौ** - द्वित्वम् ॥ १.१४१ ॥

## दृशः क्विप्-टक्-सकः ॥ १.१४२ ॥

[1]**[ केरिसो, एरिसो ]** । कीदृश, ईदृश । **एत्** पीयूषापीडेति एत्वम् ॥

**[ तुम्हारिसो ]** । युष्मादृश । **युष्मद्यर्थपरे** तः ॥ १.१४२ ॥

## आदृते ढिः ॥ १.१४३ ॥

## अरिर्दृप्ते ॥ १.१४४ ॥

**[ दरिओ ]** । दृप्त । **क**गटडेति पलोपे **दृप्ते** - द्वित्वनिषेधः ॥ १.१४४ ॥

## लृत इलिः क्लृप्त-क्लृन्ने ॥ १.१४५ ॥

**[ किलित्तकुसुमोवयारेसु ]** । क्लृप्तकुसुमोपचारे[2] । सुप् । **भिस्**भ्यस्सुपि - एत्वम् ॥

क्लिदिधातुं केचित् लृकारस्वरोपान्त्यं पठन्ति, तन्मते क्लृन्न इति सिद्धम् ॥ १.१४५ ॥

## एत इद् वा वेदना-चपेटा-देवर-केसरे ॥ १.१४६ ॥

**[ महमहिअ ]**[3] । सृं गतौ प्रपूर्वः । **म**हमहो गन्धे । क्त । **व्य**ञ्जनाददन्ते । **क्ते** - इकारः ॥ १.१४६ ॥

## ऊः स्तेने वा ॥ १.१४७ ॥

**[ थूणो ]** । स्तेन । **स्त**स्य थोऽसमस्तस्तम्बे इति स्तस्य थः ॥ १.१४७ ॥

## ऐत एत् ॥ १.१४८ ॥

**[ वेज्जो ]** । वैद्य । **द्य**य्यर्यां जः । **तै**लादौ - द्वित्वम् ॥

**[ केढवो ]**। कैटभ। **स**टाशकटकैटभे ढः - टस्य ढः। **कै**टभे भो वः - भस्य वः ॥१.१४८॥

## इत् सैन्धव-शनैश्चरे ॥ १.१४९ ॥

**[ सणिच्छरो ]** । शनैश्चर । **ह्र**स्वात् थ्यश्चत्सप्सामनिश्चले - छः ॥ १.१४९ ॥

---

१. दृशः० । सदृग् वर्णो यस्य सदृग्वर्णः । सदृग्बन्दिन् मङ्गलपाठकः । यद्वा सदृशश्च ता वन्द्यश्च तदा ईदन्तः शब्द इति सदृक्ष्यः । कीदृश० - **ख.** । २. क्लृप्तः कुसुमोपचारो येन स - **खटि.** । ३. प्रसृतं प्रसारितं दशनकेशरं यत्र वदने वचने वा - **खटि.** ।

## सैन्ये वा ॥ १.१५० ॥

**सिन्नं** । **तै**लादौ - द्वित्वम् ॥ १.१५० ॥

## अइर्दैत्यादौ च ॥ १.१५१ ॥

**[ दइच्चो ]** । दैत्य । **त्यो**ऽचैत्ये - चः ॥

**[ अइसरिअं ]**[1] । ऐश्वर्य । **स**र्वत्रेति वलुक् । ततः **शषोः** सः । अइश्च । ततः **स्याद्**भव्यचैत्य-चौर्येति यात् प्राक् इः ॥

**[ चेइअं ]** । चैत्य । **ऐ**त एत् । त-ययोर्विश्लेषे **स्याद्**भव्यचैत्येति यात् प्राक् इः ॥ १.१५१ ॥

## वैरादौ वा ॥ १.१५२ ॥

## एच्च दैवे ॥ १.१५३ ॥

**[ दइव्वं ]** । दैव । **से**वादौ वा - द्वित्वम्[2] ॥ १.१५३ ॥

## उच्चैर्नीचैस्यअः ॥ १.१५४ ॥

## ईद् धैर्ये ॥ १.१५५ ॥

**[ धीरं ]** । **धै**र्ये वेति र्यस्य रः ॥ १.१५५ ॥

## ओतोऽद् वाऽन्योन्य-प्रकोष्ठा-ऽऽतोद्य-शिरोवेदना-मनोहर-सरोरुहे क्तोश्च वः ॥१.१५६॥

**[ आवज्जं ]** । आतोद्य । **द्य**य्यर्यां जः । सर्वेषु पक्षे - **ह्र**स्वः संयोगे ॥

**[ सिरोविअणा ]** । शिरोवेदना । **ए**त इद्वा वेदनेति एकारस्य इः ॥ १.१५६ ॥

## ऊत् सोच्छ्वासे ॥ १.१५७ ॥

**[ सूसासो ]** । स-उद्-श्वास[3] ॥ १.१५७ ॥

१. **लु**प्तयरवेति दीर्घे **पा**नीयादि० । **स्याद्**भव्यचैत्य० - **ताटि.** । २. द्वित्वम् । बाहु० अनेन विकल्पनिष्पत्तिः (?) । **उच्चै**० । बाहुलकात् अन्यस्याऽपि व्यञ्जनस्य मकारः । **ईद्** धैर्ये - **ख.** । द्वित्वम् । **उच्चै**० । बाहुलकात् - स् → म् । सूत्रेण अआदेशः । **ईद्** धैर्ये - **क.** । ३. ०श्वास । अस्याऽकारस्य **लु**कमकृत्वा **अव**र्णस्येति ओ । इदं सूत्रं हि **लु**गित्यस्य प्रायित्वमाचष्टे, अन्यथा **अ**नुत्साहेति सिद्धम् । **गव्य**उ० - **ख.** । (अयमत्र भावः - **लु**गित्यनेन स्वराणां स्वरे परे लोपो विधीयते । एवं च सस्याऽकारस्य उदित्यस्य उकारे परे सति लोपे कृते 'सुद्-श्वास' इति भवति । तथा सति संस्कृते च्छकारस्य सम्भवितत्वात् सुस्थ-उकारस्य **अ**नुत्साहोच्छन्ने त्सच्छे इत्यनेनैव दीर्घः सम्भवति । तथाचाऽस्य सूत्रस्य प्रणयनं व्यर्थं भवेत् । तथाऽपि यदस्य प्रणयनं तदेव सूचयति यद् **लु**गित्यनेन विधीयमानो लोपः कदाचिन्न भवत्यपि ।)

## गव्यउ-आअः ॥ १.१५८ ॥

**[ गउआ ]** । गो । **स्वार्थे०** - कः । **स्वस्रादेर्डा** ॥

**गाई** । आअ-आदेशः । **जातेरयान्त०** - ङी । **लुगित्यलोपः** ॥ १.१५८ ॥

## औत ओत् ॥ १.१५९ ॥

**[ जोव्वणं ]** । यौवन । **तैलादौ** - द्वित्वम् ॥

**[ कोत्थुहो ]** । कौस्तुभ । **तैलादिषु** प्राप्तौ **द्वितीयतुर्येति** प्रथमः ॥ १.१५९ ॥

## उत् सौन्दर्यादौ ॥ १.१६० ॥

**सुंदेरं** । **एच्छय्यादौ** - एत्वम् । **ब्रह्मचर्यतूर्येति** र्यस्य रः ॥

**सुंदरियं**[1] । **स्याद्भव्यचैत्येति** यात् प्राक् इः ॥

**[ सुगंधत्तणं ]** । सौगन्ध्य । त्वस्योपलक्षणत्वात् **त्वस्य** डिमात्तणौ वा इति ध्य(ट्य)णोऽपि त्तणः ॥ १.१६० ॥

## कौक्षेयके वा ॥ १.१६१ ॥

**कोच्छे [ अ ] यं** । **छो**ऽक्ष्यादौ । **सेवादौ** वा[2] प्राप्ते **द्वितीयतुर्य०** ॥ १.१६१ ॥

## अउः पौरादौ च ॥ १.१६२ ॥

**[ पउरिसं ]** । पौरुष । **पुरुषे** रोरिति रोः उकारस्य इः ॥ १.१६२ ॥

## आच्च गौरवे ॥ १.१६३ ॥

## नाव्यावः ॥ १.१६४ ॥

**नावा** । **आत्** - आप् ॥ १.१६४ ॥

## एत् त्रयोदशादौ स्वरस्य सस्वरव्यञ्जनेन ॥ १.१६५ ॥

**[ तेरह ]** । त्रयोदश । जसन्तः सिद्धम् । **सङ्ख्यागद्गदे** रः - दस्य रत्वम् । **दशपाषाणे** हः - शस्य हत्वम् ॥

---

१. सुंदरिअं - **मु.ता.** । २. (प्रायोऽत्र **तैलादौ** इत्यनेन भाव्यम् ।)

**[ तेवीसा ]** । त्रयोविंशति । **विं**शत्यादेर्लुक् । **ई**ज्जिह्वासिंह० ॥ १.१६५ ॥

**स्थविर-विचकिला-ऽयस्कारे ॥ १.१६६ ॥**

**[ वेइल्लं, एक्कारो ]** । विचकिल, अयस्कार । **तै**लादौ - द्वित्वम् ॥ १.१६६ ॥

**वा कदले[1] ॥ १.१६७ ॥**

**वेतः कर्णिकारे ॥ १.१६८ ॥**

**[ कण्णिआरो ]** । कर्णिकार । **क**र्णिकारे वा इति निषेधपक्षे **अ**नादौ० - द्वित्वम् ॥ १.१६८ ॥

**अयौ वैत् ॥ १.१६९ ॥**

**बीहेमि** । ञिभींक् भये । **भि**यो भाबीहौ । मिव् । **तृ**तीयस्य मिः । **व्य**ञ्जनाददन्ते । **व**र्तमानापञ्चमीशतृषु वा - ए ॥

**[ उम्मत्तिए ]** । उन्मत्तिका । **न्मो** मः । **अ**नादौ० - द्वित्वम् । **क**गेति कलुक् । **अ**न्त्यव्यञ्जनस्येति सिलुक् । **वा**प ए - [आ]कारस्य एत्वम् ॥ १.१६९ ॥

**ओत् पूतर-बदर-नवमालिका-नवफलिका-पूगफले ॥ १.१७० ॥**

**नोहलिया** । **फो** भहौ - फस्य हः ॥

**[ पोप्फलं ][2]** । पूगफल । **स**मासे वा प्राप्ते **द्वि**तीयतुर्य० ॥ १.१७० ॥

**नवा मयूख-लवण-चतुर्गुण-चतुर्थ-चतुर्दश-चतुर्वार-सुकुमार-कुतूहलोदूखलोलूखले ॥ १.१७१ ॥**

**[ चोग्गुणो ]** । चतुर्गुण । **तै**लादौ - द्वित्वम् ॥

**[ चोद्दह ]** । चतुर्दश । सिद्धः । **द**शपाषाणे हः ॥

**[ सोमालो ]** । सुकुमार । **ह**रिद्रादौ लः ॥

**[ कोउहल्लं ]** । कुतूहल । **कु**तूहले वा ह्रस्वश्चेति ओत्वं ह्रस्वश्च । **से**वादौ वा - द्वित्वम् ॥

**[ तह ]** । तथा । **वा**ऽव्ययोत्खातादावेति अत्वम् ॥

१. द्वित्वम् । **वा** कदले । केचित् कदलीवाचकं कदलशब्दमाहुः । कदलप्रकृतिः । **जाते**रयान्तेति ङीप्र० । केली । शेषं सुगमम् । वेतः० - **क.** । २. तैला० - **ताटि.** ।

**[ मन्ने ]** । मन्ये । **अ**धो मन० । **अ**नादौ० - द्वित्वम् ॥

**[ कोहलिए ]** । कुतूहलिका । **वा**प ए ॥

**[ ओक्खलं ]**[1] । उलूखल । **से**वादौ० प्राप्तौ **द्वि**तीयतु० ॥ १.१७१ ॥

## अवापोते ॥ १.१७२ ॥

**ओसारिअं** । **लु**गावी क्त० - णिग्लोपः । **व्य**ञ्जनाददन्ते । **अ**देल्लुक्यादेरत आ - अकारस्य आत्वम् । **क्ते** - इत्वम् ॥ १.१७२ ॥

## ऊच्चोपे ॥ १.१७३ ॥

**[ ऊज्झाओ ]** । उपाध्याय । **सा**ध्वसध्यह्यां झः । **तै**लादिप्राप्तौ **द्वि**तीयतु० ॥ १.१७३ ॥

## उमो निषण्णे ॥ १.१७४ ॥

## प्रावरणे अङ्ग्वाऊ ॥ १.१७५ ॥

## स्वरादसंयुक्तस्याऽनादेः ॥ १.१७६ ॥

## क-ग-च-ज-त-द-प-य-वां प्रायो लुक् ॥ १.१७७ ॥

**[ सयढं ]** । शकट । **स**टाशकटकैटभे ढः - टस्य ढः ॥

**[ जई ]** । यति । **आ**देर्यो जः ॥

**[ सुउरिसो ]** । सुपुरुष । **पु**रुषे रोः ॥

**[ वलयाणलो ]** । वडवानल । **डो** लः - डस्य लः ॥

**[ विजणं ]** । व्यजन । **अ**धो मनयाम् - यलुक् । **इः** स्वप्नादौ - व(व-अ)कारस्य इ । विजन ॥

**नक्कंचरो** इत्यत्र क्वचित् संयुक्तस्याऽपि लोप इत्यनेन अधस्तनस्य तकारस्य लोपः ॥

**विसंतवो** । द्विषन्तप ॥

**[ संवुडो[2] ]** । संवृत । **उ**दृत्वादौ । **प्र**त्यादौ डः ॥

**वणो**[3] । व्रणप्रकृति ।

---

१. **स**मासे० - **ताटि.** । २. बाहुलकात् **पो** वः - **ताटि.** (ततोऽत्र 'संपुट' इति प्रकृतित्वेन स्वीकृतं स्यात् ।)
३. वण्णो - **मु.** । वणो - **ता.** (तदुपरि) व्रण प्र. - **ताटि.** ।

**बहुतरो** । बहु तरति । **लिहा**दिभ्यः - अच् ॥

**[ इंधं ]** । **चिह्ने** न्धो वा - न्धादेशः । **ङ्**ञणनो व्यञ्जने ॥

**[ अमुगो ]** । अमुक । अम गतौ । कञ्चुकांशुकेति निपातः (उणादि. ५७) ॥

**[ आगरिसो ]** । आकर्ष । **र्श**र्षतप्तवज्रे वा - षात् प्राक् इः ॥ १.१७७ ॥

**यमुना-चामुण्डा-कामुका-ऽतिमुक्तके मोऽनुनासिकश्च ॥ १.१७८ ॥**

**[ अणिउँतयं ]**[१] । अतिमुक्तक । **ग**र्भितातिमुक्तेति तस्य णः । **क**गटडेति कलुक् ॥

**अइमुंतयं** । **व**क्रादावन्तः ॥ १.१७८ ॥

**नाऽवर्णात् पः ॥ १.१७९ ॥**

**अवर्णो यश्रुतिः ॥ १.१८० ॥**

**कुब्ज-कर्पर-कीले कः खोऽपुष्पे ॥ १.१८१ ॥**

**[ बंधेउं ]** । बन्धंश् । क्त्वा । **क्त्व**स्तुमत्तूणतुआणा इति क्त्वास्थाने तुम् । **व्य**ञ्जनाददन्ते । **ए**च्च क्त्वातुम्[तव्य]भविष्यत्सु - एत्वम् ॥ १.१८१ ॥

**मरकत-मदकले गः, कन्दुके त्वादेः ॥ १.१८२ ॥**

**[ गेंदुअं ]** । कन्दुक । **ए**च्छय्यादौ - एत्वम् ॥ १.१८२ ॥

**किराते चः ॥ १.१८३ ॥**

**[ चिलाओ ]** । **ह**रिद्रादौ लः ॥

**नमिमो** । णम् । मस् । **तृ**तीयस्य मोमुमाः - मो । **व्य**ञ्जनाददन्ते । **इ**च्च मोमुमे वा इति आकारस्य इः ॥ १.१८३ ॥

**शीकरे भ-हौ वा ॥ १.१८४ ॥**

**चन्द्रिकायां मः ॥ १.१८५ ॥**

**निकष-स्फटिक-चिकुरे हः ॥ १.१८६ ॥**

---

१. अणिउंतयं - **ता.**, (तदुपरि) **व**क्रा० अनेन कृतस्याऽनुनासिकस्याऽनुस्वारः - **ताटि.** ।

**[ फलिहो ]** । स्फटिक । **स्फ**टिके लः इति टस्य लः ॥ १.१८६ ॥

## ख-घ-थ-ध-भाम् ॥ १.१८७ ॥

**लाहइ** । श्लाघृङ् । वर्तमाना ते । **त्या**दीनामितीच् । **व्य**ञ्जनाददन्ते । **क**गटडेति शलुक् ॥

**कहइ**[1] । कथण् । तिव् → इच् । **व्य**ञ्जनाददन्ते ॥

**वाहो** । व्याध ।

**बाहइ** । बाधृङ् रोटने ॥

**[ खंभो ]** । स्तम्भ । **स्त**म्भे स्तो वा - **खः** ॥

**अक्खइ**[2] । आख्याति । **ह्र**स्वः संयो०[3] । **अ**धो मनयाम् - यलुक् । **द्वि**तीयेति पूर्वः । **स्व**राणां स्वराः - ह्रस्वः । **क**गेति तलुक् ॥

**अग्घइ**[4] । राजृग् । **रा**जेरग्घछज्जसहेति अग्घादेशः ॥

**सिद्धओ** । सिध्रको वृक्षविशेषः ॥

**लब्भइ** । लभ(भ्य)ते । इच् । क्य । **ग**डा(मा)दीनां द्वित्वं क्यलोपश्च ॥

**गज्जंते** । गर्ज । अन्ति । **ब**हुष्वाद्यस्य न्तिन्तेइरे - न्ते । **व्य**ञ्जनाददन्ते ॥

**गच्छइ** । गम् । **ग**मिष्यमासां छः ॥

**[ सरिसवखलो ]** । सर्षपखल । **र्श**र्षतप्तवज्रे वा - षात् प्राक् इः ॥ १.१८७ ॥

## पृथकि धो वा ॥ १.१८८ ॥

**[ पिधं, पुधं ]** । पृथक् । **इ**दुतौ वृष्टवृष्टीति इत्वम् उत्वं च ॥ १.१८८ ॥

## शृङ्खले खः कः ॥ १.१८९ ॥

## पुन्नाग-भागिन्योर्गो मः ॥ १.१९० ॥

**[ पुन्नामाइँ ]** । जस् । **ज**स्‌शस इँइंणयः सप्राग्दीर्घाः ॥

---

१. कहइ । कथण् । णिग् → अत् । अलोपः । तिव् । **त्या**दीनामिति इच् । **णे**रदे० - [अ]त्वम् - **दी.** । **स्व**राणां० । **अ**देल्लुकीत्यपवादः - **ताटि.** । २. आख्याति अक्षो वा - **ताटि.** । ३. ०संयोगे । **स्व**रादनतो वा - अत् । **लुक्** - अलोपः । अदभावे **स्व**राणां० - **दी.** । ४. अर्घिर्धात्वन्तरम् - **ताटि.** ।

**[ वसंते ]** । वसन्त । ङि । **डे**म्मि ङेः ॥ १.१९० ॥

**छागे लः ॥ १.१९१ ॥**

**ऊत्वे दुर्भग-सुभगे वः ॥ १.१९२ ॥**

**[ दूहवो ]** । दुर्भग । **र्लु**कि दुरो वा - ऊत्वम् ॥

**[ सूहवो ]** । सुभग । **ऊ**त्सुभगेति ऊत्वम् ॥ १.१९२ ॥

**खचित-पिशाचयोश्चः स-ल्लौ वा ॥ १.१९३ ॥**

**जटिले जो झो वा ॥ १.१९४ ॥**

**टो डः ॥ १.१९५ ॥**

**सटा-शकट-कैटभे ढः ॥ १.१९६ ॥**

**[ केढवो ]** । कैटभ । **कै**टभे भो वा - भस्य वः ॥ १.१९६ ॥

**स्फटिके लः ॥ १.१९७ ॥**

**[ फलिहो ]** । स्फटिक । **नि**कषस्फटिकेति कस्य हः ॥ १.१९७ ॥

**चपेटा-पाटौ वा ॥ १.१९८ ॥**

**[ चविला ]** । चपेटा । **ए**त इद्वा वेदनेति एकारस्य इत्वम् ॥

**फाडेइ** । पट गतौ । णिग् । तस्य **णे**रदेदावावे - एत्वम् । **अ**देल्लुक्यादेरत आ इति पकाराकारस्य आत्वम् । **पा**टिपरुषपरिघपरिखापनसपारिभद्रे फः इति फः ॥ १.१९८ ॥

**ठो ढः ॥ १.१९९ ॥**

**[ वेकुंठो ]** । वैकुण्ठ । **ऐ**त एत् ॥

**चिट्ठइ** । स्था । **स्थ**ष्ठाथक्कचिट्ठनिरप्पाः इति चिट्ठ ॥

**ठाइ** । **स्थ**ष्ठेति ठा । तिव् → इच् ॥ १.१९९ ॥

**अङ्कोठे ल्लः ॥ १.२०० ॥**

**[ तेल्लं ]** । **तै**लादौ - द्वित्वम् ॥

**तुप्पं** । म्रक्षितम् । देश्योऽयम् ॥ १.२०० ॥

**पिठरे हो वा, रश्च डः ॥ १.२०१ ॥**

**डो लः ॥ १.२०२ ॥**

[ **मोण्डं, कोण्डं** ] । मुण्ड, कुण्ड । **ओ**त् संयोगे - उकारस्य ओत्वम् ॥

[ **णाडी, णड** ] । नाडी, नडस्तृणविशेषः । **वा**ऽऽदौ - णत्वम् ॥

[ **आमेलो** ] । आपीड । **नी**पापीडे मो वा - पस्य मः । **ए**त् पीयूषापीडेति एत्वम् ॥

[ **गउडो** ] । गौड । **अ**उः पौरादौ च ॥

[ **तडी**[1] ] । तडित् । बाहुलकात् **स्त्रि**यामादविद्युत इति वा । 'संघडियतडिकडप्पुव्व' इत्यादिदर्शनात् ॥ १.२०२ ॥

**वेणौ णो वा ॥ १.२०३ ॥**

**तुच्छे तश्च-छौ वा ॥ १.२०४ ॥**

**तगर-त्रसर-तूवरे टः ॥ १.२०५ ॥**

**प्रत्यादौ डः ॥ १.२०६ ॥**

[ **पाडिप्फद्धी** ] । प्रतिस्पर्द्धिन् । **अ**तः समृद्ध्यादौ वा - पकारो(रा)कारस्य आत्वम् । **ष्प**स्पयोः फः । सि । **अ**न्त्यव्यं० । **अ**क्लीबे सौ - दीर्घः ॥

[ **पडिनिअत्तं** ] । प्रतिनिवृत्त । **स**र्वत्रेति (?) वलुक्[2] । **ऋ**तोऽत् ॥

[ **पडिवया** ] । प्रतिपत् ॥

[ **पडंसुआ** ] । प्रतिश्रुत् । **प**थिपृथिवीति इकारस्य अत्वम् । **व**क्रादावन्तः - अनुस्वारः । **स्त्रि**यामादविद्युतः । तस्य आः ॥

[ **पहुडि, पाहुडं** ] । प्रभृति, प्राभृत । **उ**दृत्वादौ ॥

[ **वावडो** ] । व्यावृत । **ऋ**तोऽत् ॥

[ **बहेडओ** ] । बिभीतक । **प**थिपृथिवी० - अत्वम् । **ए**त्पीयूषेति एत्वम् ॥

---

१. तटी वा - **तांटि.** । २. (अत्र **क**गचजेति सूत्रेण भाव्यम् ।)

**[ हरडई ]** । हरीतकी । **ह**रीतक्यामीतोऽत् ॥

**[ पइण्णा ]** । प्रतिज्ञा । **म्न**ज्ञोर्ण इति ज्ञास्थाने णः ॥ १.२०६ ॥

## इत्वे वेतसे ॥ १.२०७ ॥

## गर्भिता-ऽतिमुक्तके णः ॥ १.२०८ ॥

**[ अणिउंतयं[1] ]** । अतिमुक्तक । **य**मुनाचामुण्डाकामुकेति मलुक् । **व**क्रादावन्त इत्यनुस्वारः ॥ १.२०८ ॥

## रुदिते दिना ण्णः ॥ १.२०९ ॥

**रिऊ** । [ऋतु] । **ऋ**णर्ज्वृषभर्त्वृषौ वा ॥

**[ उऊ । ऋतु ]** । **उ**दृत्वादौ - ऋकारस्य उः ॥

**आकिई[2]** । [आकृति] । **इ**त् कृपादौ ॥

**निव्वुओ** । [निर्वृत] । **उ**दृत्वादौ ॥

**दुइओ** । [द्वितीय] । **द्वि**न्योरुत् - उः । **पा**नीयादिष्वित् ॥ १.२०९ ॥

## सप्ततौ रः ॥ १.२१० ॥

## अतसी-सातवाहने लः ॥ १.२११ ॥

**[ सालाहणो ]** । सातवाहन । **क**गचजेति । **स्व**रस्योद्वृत्ते इति बाहुलकात् सन्धिरेव ॥

**सालाहणी[3]** । सातवाहनो देवताऽस्य । अण् । **प्र**त्यये ङी नवा ॥ १.२११ ॥

## पलिते वा ॥ १.२१२ ॥

## पीते वो ले वा ॥ १.२१३ ॥

## वितस्ति-वसति-भरत-कातर-मातुलिङ्गे हः ॥ १.२१४ ॥

**[ विहत्थी ]** । वितस्ति । **स्त**स्य थोऽसमस्तस्तम्बे - थादेशः ॥

**[ काहलो ]** । कातर । **ह**रिद्रादौ लः ॥ १.२१४ ॥

---

१. अणिउँतयं - **मु.** । २. अकिई । अकृति - **ता.** । ३. सातवाहनस्येयम् । **तस्ये**दम् - अण् - **ताटि.** ।

## मेथि-शिथिर-शिथिल-प्रथमे थस्य ढः ॥ १.२१५ ॥

**[ सिढिलो ]** । शिथिर । **हरिद्रादौ** लः ॥

**[ सढिलो[१] ]** । शिथिल । **शिथिलेङ्गुदे वा** - अत्वम् ॥ १.२१५ ॥

## निशीथ-पृथिव्योर्वा ॥ १.२१६ ॥

**[ पुढवी ]** । पृथिवी । **पथिपृथिवीत्यत्** ॥ १.२१६ ॥

## दशन-दष्ट-दग्ध-दोला-दण्ड-दर-दाह-दम्भ-दर्भ-कदन-दोहदे दो वा डः ॥१.२१७॥

**[ डट्ठो ]** । दष्ट । **ष्टस्याऽनुष्ट्रेष्टेति** ठः ॥

**[ डड्ढो ]** । दग्ध । **दग्धविदग्धवृद्धीति** ग्धस्थाने ढः ॥

**[ डोहलो[२] ]** । दोहद । **प्रदीपिदोहदे** लः ॥ १.२१७ ॥

## दंश-दहोः ॥ १.२१८ ॥

**[ डसइ[३] ]** । दशति सिद्धः ॥ १.२१८ ॥

## सङ्ख्या-गद्गदे रः ॥ १.२१९ ॥

**[ एआरह, बारह ]** । एकादशादयः संस्कृतसिद्धाः । **दशपाषाणे हः** - शस्य हः ॥

**तेरह** । **एत्त्रयोदशादौ** ॥

**ते** । तद् । **अन्त्यव्यं०** । जस् । **अतः सर्वादेर्डेर्जसः** - जस्स्थाने डेरादेशः ॥ १.२१९ ॥

## कदल्यामद्रुमे ॥ १.२२० ॥

**केली** । **वा** कदले - कस्य एः ॥ १.२२० ॥

## प्रदीपि-दोहदे लः ॥ १.२२१ ॥

**पलीवेइ** । **णेरदेदा०[४]** ॥ १.२२१ ॥

---

१. सिढिलो - **मु.** । २. दशनादिसाहचर्यात् आदिभूतस्यैव डः । तेन दोहद इत्यत्र अन्त्यस्य दस्य डो न भवति । दोहं ददाति दुग्धे पूरयत्यभिलाप्यवस्तूनि दुग्धे पूर्यमाणो गर्भं वा कुमुदेति (उणादि. २४४) साधुः (?) - **ताटि.** । ३. **विंशत्यादे०** - **ताटि.** । ४. **णेरदेदा०** । दोहद । **अनादेरित्यधिकारात्** आदेर्न भवति । **दशनदष्टेत्यत्र** तु अन्येषां साहचर्यात् आदेरेव भवति । **कदम्बे** - **क.** ।

**कदम्बे वा ॥ १.२२२ ॥**

**दीपौ धो वा ॥ १.२२३ ॥**

**दिप्पइ**[1] । दीपैचि । ते → इच् । **श**कादीनां द्वित्वम् । **ह्रस्वः** संयोगे ॥ १.२२३ ॥

**कदर्थिते वः ॥ १.२२४ ॥**

[ **कवट्टिओ** ] । कदर्थित । **वृ**त्तप्रवृत्तमृत्तिकापत्तनकदर्थिते टः । द्वित्वम् ॥ १.२२४ ॥

**ककुदे हः ॥ १.२२५ ॥**

**निषधे धो ढः ॥ १.२२६ ॥**

**वौषधे ॥ १.२२७ ॥**

**नो णः ॥ १.२२८ ॥**

**माणइ** । मानि पूजायाम् । ते → इच् । **व्य**ञ्जना० ॥ १.२२८ ॥

**वाऽऽदौ ॥ १.२२९ ॥**

**नेइ**[2] । णींग् । **यु**वर्णस्य गुणः ॥ १.२२९ ॥

**निम्ब-नापिते ल-ण्हं वा ॥ १.२३० ॥**

**पो वः ॥ १.२३१ ॥**

[ **कासवो** ] । काश्यप[3] । **अ**धो मनयाम् । **श**षोः सः । **लु**प्तयरवेति दीर्घः ॥

[ **महिवालो** ] । महीपाल । **दी**र्घह्रस्वौ मिथो वृत्तौ ॥

**गोवइ**[4] । गुपि गोपन० । **यु**वर्णस्य गुणः ॥

[ **सुहेण** ] । सुख । टा । **टा**-आमोर्णः । **टा**णशस्येत् ॥

**पढइ** । **ठो** ढः ॥ १.२३१ ॥

**पाटि-परुष-परिघ-परिखा-पनस-पारिभद्रे फः ॥ १.२३२ ॥**

**फालेइ** । **णे**रदेदावावे - एत्वम् । **च**पेटापाटौ वा - टस्य लः । **टो** डः ॥

---

१. **श**कादीनां द्वित्वं साध्यावस्थायाम् । दीप्यते वा प्रकृतिः । तदा **अ**धो मनयाम्, **अ**नादौ० - द्वित्वम्, **स्व**राणां स्वराः - ह्रस्वः - **ताटि.** । २. **स्व**राणां०, **यु**वर्णस्येति वा गुणः - **ताटि.** । ३. (**लु**प्तयरवेति सूत्रनिर्देशादत्र 'कश्यप' इति स्यात् ।) ४. गो-वइ - **मु.** । (गो-पति इतीह प्रकृतित्वेन चिन्तितं स्यात् ।)

[ **फलिहो, फलिहा, फालिहद्दो** ]। सर्वत्र हरिद्रादौ लः ॥ १.२३२ ॥

**प्रभूते बः[१] ॥ १.२३३ ॥**

[ **बहुत्तं[२]** ]। प्रभूत । **तैलादौ** । **ह्रस्वः** सं० ॥ १.२३३ ॥

**नीपा-ऽऽपीडे मो वा ॥ १.२३४ ॥**

**आमेलो** । **एत्** पीयूषापीडेति ईकारस्य एत्वम् ॥ १.२३४ ॥

**पापर्द्धौ रः ॥ १.२३५ ॥**

**फो भ-हौ ॥ १.२३६ ॥**

**गुंफइ** । गुफ गुंफत् ग्रन्थने ॥

[ **पुप्फं** ]। पुष्प । **ष्पस्पयोः** फः । फस्य भूतपूर्वकन्यायेन स्वरात् परत्वं ज्ञेयमन्यथा द्व्यङ्गविकलव्यावृत्तिः[३] स्यात् ॥

[ **कसणफणी** ]। कृष्णफणिन् । **कृष्णे** वर्णे वा - णात् प्राक् अकारः ॥ १.२३६ ॥

**बो वः ॥ १.२३७ ॥**

**बिसिन्यां भः ॥ १.२३८ ॥**

**बिसतंतुपेलव** । आम् । **टा**-आमोर्णः । **जस्**शस्ङसित्तोदोद्वामि दीर्घः[४] ॥ १.२३८ ॥

**कबन्धे म-यौ ॥ १.२३९ ॥**

**कैटभे भो वः ॥ १.२४० ॥**

**केढवो** । **सटा**शकटेति ढः ॥ १.२४० ॥

**विषमे मो ढो वा ॥ १.२४१ ॥**

**मन्मथे वः ॥ १.२४२ ॥**

[ **वम्महो** ]। मन्मथ । **न्मो** मः । **ख**घथ० ॥ १.२४२ ॥

**वाऽभिमन्यौ ॥ १.२४३ ॥**

---

१. प्रभूते वः - **मु.** । २. वहुत्तं - **मु.** । ३. (स्वरादपरत्वं संयुक्तत्वं चेति द्व्यङ्गविकलता । तत्कृता सूत्रप्रवर्तनव्यावृत्तिः द्व्यङ्गविकलव्यावृत्तिः ।) ४. **क्त्वा**स्यादेरनुस्वार.....वाचकपेलवशब्द.... - **खटि.** ।

## भ्रमरे सो वा ॥ १.२४४ ॥

**भसलो** । **ह**रिद्रादौ लः ॥ १.२४४ ॥

## आदेर्यो जः ॥ १.२४५ ॥

## युष्मद्यर्थपरे तः ॥ १.२४६ ॥

[ **तुम्हारिसो** ] । युष्मादृश । **प**क्ष्मश्मष्मस्मह्मां म्हः । **दृ**शः क्विप्टक्सकः ॥

**तुम्हकेरो** । युष्माकमयम् । **दोरीयः** । **अन्त्यव्यं०** - दलुक् । **इ**दमर्थस्य केर इतीयस्य केरः ॥ १.२४६ ॥

## यष्ट्यां लः ॥ १.२४७ ॥

[ **उच्छुलट्ठी** ] । इक्षुयष्टि । **प्र**वासीक्षौ - उत्वम् । **छो**ऽक्ष्यादौ । **ष्ट**स्याऽनुष्ट्रेष्टेति ठः ॥ १.२४७ ॥

## वोत्तरीया-ऽनीय-तीय-कृद्ये ज्जः ॥ १.२४८ ॥

[ **उत्तरिज्जं** ] । उत्तरीय ॥

[ **जवणिज्जं**[१] । यापनीय ] । **वा**ऽव्ययोत्खातादावदातः[२] ॥

[ **बिइओ** ] । द्वितीय । **पा**नीयादिष्वित् ॥ १.२४८ ॥

## छायायां होऽकान्तौ वा ॥ १.२४९ ॥

[ **वच्छस्स** ] । वृक्ष । **ऋ**तोऽत् । **छो**ऽक्ष्यादौ । ङस् । **ङ**सः स्सः ॥

[ **छाही** ] । छाया । **छा**याहरिद्रयोर्ङीः । **लु**गित्य(त्या)लुक् ॥ १.२४९ ॥

## डाह-वौ कतिपये ॥ १.२५० ॥

## किरि-भेरे रो डः ॥ १.२५१ ॥

## पर्याणे डा वा ॥ १.२५२ ॥

**पल्लाण** । **प**र्यस्तपर्याणे लः[३] ॥ १.२५२ ॥

## करवीरे णः ॥ १.२५३ ॥

---

१. यवनीयं जपनीयं वा यापनीयं वा । **वा**ऽव्ययोः० । आर्षाद्वा । **स्व**राणां० वा - **ताटि.** । २. अथवा **या**पेर्जवः - **दी.** ।
३. ०णेति ल्लः - **क.ख.** ।

## हरिद्रादौ लः ॥ १.२५४ ॥

**[ हलद्दी[१] ]** । हरिद्रा । **प**थिपृथिवीति अत्वम् । **द्रे** रो नवा - रलुक् । **छा**याहरिद्रयोर्ङीः । **लु**गित्यालुक् ॥

गणे दरिद्रातीतिधातुग्रहणाद् दरिद्र-दारिद्र्यादावपि भवति ।

**जहुट्ठिलो** । [युधिष्ठिर ।] **उ**तो मुकुलादिष्वत् । **यु**धिष्ठिरे वा - उः ॥

**सिढिलो** । [शिथिर] । **मे**थिशिथिरशिथिलेति ढः ॥

**इंगालो** । [अङ्गार] । **प**क्वाङ्गारेति इः ॥

**सोमालो** । [सुकुमाल] । **न**वा मयूखेति कुशब्देन सह ओत्वम् ॥

**चिलाओ** । [किरात] । **कि**राते चः ॥

**[ फलिहा, फलिहो, फालिहद्दो ]** । [परिखा, परिघ, पारिभद्र] । **पा**टिपरुष० ॥

**काहलो** । [कातर] । **वि**तस्तिवसतिभरतकातरेति तस्य हः ॥

**लुक्को** । [रुग्ण] । **श**क्तमुक्तदष्टरुग्णेति कः ॥

**भसलो** । [भ्रमर] । **भ्र**मरे सो वा ॥

**[ दुवालसंगे ]** । द्वादशाङ्गे । आर्षत्वाद् वात् प्राक् उः, दस्य लश्च । **ह्र**स्वः संयोगे । **ङ**ञणनो व्यञ्जने । सि । **अ**त एत् सौ पुंसि मागध्याम् - अत एः ॥ १.२५४ ॥

## स्थूले लो रः ॥ १.२५५ ॥

**[ थोरं ]** । **ओ**त् कूष्माण्डीतूणीरेति ओत्वम् ॥ १.२५५ ॥

## लाहल[२]-लाङ्गल-लाङ्गूले वाऽऽदेर्णः ॥ १.२५६ ॥

**[ णंगलं ]** । लाङ्गू(ङ्ग)ल । **ह्र**स्वः संयोगे । **ङ**ञणनो व्यञ्जने ॥ १.२५६ ॥

## ललाटे च ॥ १.२५७ ॥

**[ णिडालं ]** । ललाट । **प**क्वाङ्गारेति इः । **ल**ललाटे लडोर्व्यत्ययः ॥ १.२५७ ॥

१. हलिद्दी - **मु.** । हलद्दी - **ता.** । **प**थिपृथिवी० - **ताटि.** । २. (अस्य सूत्रस्य 'णाहलो' इत्युदाहरणस्योपरि) नाहलशब्दस्य भविष्यतीति न वाच्यं, यतो **वा**ऽऽदाविति विकल्पः प्राप्नोति । ततश्च नाहलरूपनिवृत्त्यर्थं वचनम् । नाहलशब्दस्य प्रयोगो न भवतीति भावार्थः - **खटि.** । नाहलशब्दस्य एतद्रूपं सिध्यति । परं **वा**ऽऽदौ विकल्पो मा भूदित्येवमर्थं - **ताटि.** ।

**शबरे[1] वो मः ॥ १.२५८ ॥**

**स्वप्न-नीव्योर्वा ॥ १.२५९ ॥**

**[ सिमिणो ]** । स्वप्न । **इः** स्वप्नादौ । **सर्वत्र** ल० । **पो** वः । अनेन मः । **स्वप्ने** नात् - इः ॥ १.२५९ ॥

**श-षोः सः ॥ १.२६० ॥**

**[ निसंसो ]** । नृशंस । **इत्** कृपादौ ॥

**सोहइ**[2] । शुभि दीप्तौ । ते → इच् । **व्यञ्जनाददन्ते** । **युवर्णस्य** गुणः ॥

**[ निहसो ]** । निकष । **निकषस्फटिकचिकुरे** हः ॥ १.२६० ॥

**स्नुषायां ण्हो वा ॥ १.२६१ ॥**

**दश-पाषाणे हः ॥ १.२६२ ॥**

दशादयः संस्कृतसिद्धाः । अन्यथा **जस्शस्ङसित्तोदोद्वामि** दीर्घः स्यात् ॥

**बारह** । **सङ्ख्यागद्गदे** रः ॥

**तेरह** । **एत्** त्रयोदशादौ ॥ १.२६२ ॥

**दिवसे सः ॥ १.२६३ ॥**

**हो घोऽनुस्वारात् ॥ १.२६४ ॥**

**[ सीहो ]** । सिंह । **मांसादेर्वा** । **ईर्जिह्वा०** ॥ १.२६४ ॥

**षट्-शमी-शाव-सुधा[3]-सप्तपर्णेष्वादेश्छः ॥ १.२६५ ॥**

**[ छत्तिवण्णो ]** । सप्तपर्ण । **सप्तपर्णे** वा - इः ॥ १.२६५ ॥

**[4]सिरायां वा ॥ १.२६६ ॥**

**लुग् भाजन-दनुज-राजकुले जः सस्वरस्य नवा ॥ १.२६७ ॥**

---

१. **शबरे** बो मः - **मु.** । **शबरे** वो मः - **दी.** । **शवरे** वो मः - **ता.** । (ता. प्रतौ अत्र 'समरो' इत्युदाहरणस्योपरि **बो** वः इति टिप्पितं वर्तते । तेन 'शबरे वो मः' इति पाठः सम्यक् प्रतिभाति ।) २. **स्वराणां०** - **ताटि.** । ३. अमृतवाचकस्य तु सुहा इत्येव बाहुलकात् - **ताटि.** । ४. शिरायां वा - **मु.** । सिरायां वा । सिराशब्दे.... - **ता.** ।

**व्याकरण-प्राकारा-ऽऽगते क-गोः ॥ १.२६८ ॥**

**किसलय-कालायस-हृदये यः ॥ १.२६९ ॥**

**[ सहिआ ]** । सहृदय । **इत्** कृपादौ । **जस्**शसोर्लुक् । **जस्**शस्ङसि० - दीर्घः ॥

**जाला** । यद् । **अन्त्यव्यं०** । सप्तम्येकवचनं ङिः । **ङे**र्डाहिडालाइआ काले इति ङिस्थाने डाला ॥

**[ सहिअएहिं ]** । सहृदय । भिस् । **भिसो** हिहिं० । **भिस्**भ्यस्सुपि - एत्वम् ॥

**घि( घे )प्पंति** । ग्रहीश् । अन्ते । **बहु**ष्वाद्यस्येति । क्य । **ग्रहे**र्घेप्प । क्यलुक् च । **व्य**ञ्जनाददन्ते ॥

**[ निसमणुप्पिअहिअस्स ]** । निशमने- श्रवणेऽर्पितं हृदयं येन स निशमनार्पितहृदय । **वा**ऽऽर्पौ इति अर्पेरकारस्य उत्वम् । **ङसः** स्स इति ॥ १.२६९ ॥

**दुर्गादेव्युदुम्बर-पादपतन-पादपीठेऽन्तर्दः ॥ १.२७० ॥**

**[ पावडणं ]** । पादपतन । **सं**[1]दपतोर्डः ॥

**पावीढं** । **ठो** ढः ॥ १.२७० ॥

**यावत्-तावज्जीविता-ऽऽवर्त्तमाना-ऽवट-प्रावारक-देवकुलैवमेवे वः ॥ १.२७१ ॥**

**इति मलधारिशिष्य-पण्डितनरचन्द्रविरचिते प्राकृतप्रबोधे**
**प्रथमः पादः ॥**

卐 卐 卐

---

१. शदपतोर्डः - **ख.ग.** ।

## ॥ द्वितीयः पादः ॥

### संयुक्तस्य ॥ २.१ ॥

### शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा ॥ २.२ ॥

[ **डक्को** ] । दष्ट । **द**शनदष्टदग्धदोलादण्डदरेति डः ॥

[ **लुक्को, लुग्गो** ] । रुग्ण । **ह**रिद्रादौ लः । **क्ते**नाऽप्फुण्णादयः - णलुक् [१]॥

[ **माउक्कं, मउत्तणं** ] । मृदुत्व । **आत्** कृशामृदुक० [२]। **त्व**स्य डिमात्तणौ वा ॥ २.२ ॥

### क्षः खः क्वचित्तु छ-झौ ॥ २.३ ॥

**झिज्जइ** । क्षि क्षये । ते → इच् । क्य । **ईअइज्जौ** क्यस्य । **लुगिति** इलुक् [३]॥ २.३ ॥

### ष्क-स्कयोर्नाम्नि ॥ २.४ ॥

[ **पोक्खरं** ] । पुष्कर । **ओत्** संयोगे [४]॥

**निक्कओ** । निष्क्रय ॥

[ **नमोक्कारो** ] । नमस्कार । **न**मस्कारपरस्परे - ओत्वम् [५]॥

[ **सक्कयं, सक्कारो** ] । संस्कृत, संस्कार । **विं**शत्यादेर्लुक् [६]॥ २.४ ॥

### शुष्क-स्कन्दे वा ॥ २.५ ॥

---

१. यद्वा लत्वे कृते निमित्ताभावे नैमित्तिकाभावात् णत्वाभावे **अ**धोमनयाम् - नलोपः - **खटि.** । २. मृदुकमृदुत्वे वा आकारः । पक्षे त्वस्य० - **दी.** । (तेन त्वस्य ककाराभावे **आत्**कृशेति सूत्रं न लगतीति फलितं भवति ।) मउत्तणं - **ता.** । माउत्तणं - **मु.** । ३. क्षयति वा । **म**ध्ये च स्वरान्ताद्वेति प्रकृतिप्रत्यययोर्मध्ये ज्जः - **ख.** । ४. **ओत्**संयोगे । **तै**लादौ द्वित्वप्रसङ्गे **द्वि**तीय० - **ताटि.** । ५. ओकारः । **स**मासे वा - **ताटि.** । ६. अनुस्वारस्य व्यञ्जनत्वाश्रयणाद् **धुटो** धुटि स्वे वेति सलुक् - **खटि.** ।

**क्ष्वेटकादौ ॥ २.६ ॥**

**[ खेडओ ]**। क्षयति जनोऽनेनेति घटाघाटाघण्टादयः (उणादि. १४१) इति टे क्ष्वेटः। **स्वार्थे** के क्ष्वेटकः।

**[ खोडओ ]**। क्ष्वोटको वृक्षविशेषः ॥ २.६ ॥

**स्थाणावहरे ॥ २.७ ॥**

**[ थाणुओ ]**। स्थाणु। ङस्। **ङसिङसोः** पुंक्लीबे वा - णो ॥ २.७ ॥

**स्तम्भे स्तो वा ॥ २.८ ॥**

**थ-ठावस्पन्दे ॥ २.९ ॥**

**रक्ते गो वा ॥ २.१० ॥**

**शुल्के ङ्गो वा ॥ २.११ ॥**

**कृत्ति-चत्वरे चः ॥ २.१२ ॥**

**त्योऽचैत्ये ॥ २.१३ ॥**

**पच्चओ**। प्रत्यय ॥

**[ चइत्तं ]**। चैत्य। **अइर्दैत्यादौ** च इत्यैकारस्य अइः ॥ २.१३ ॥

**प्रत्यूषे षश्च हो वा ॥ २.१४ ॥**

**त्व-थ्व-द्व-ध्वां च-छ-ज-झाः क्वचित् ॥ २.१५ ॥**

**भोच्चा। ओत्** संयोगे ॥

**णच्चा। म्नज्ञोर्णः** ॥

**पिच्छी। इत्** कृपादौ।

**विज्जं**। विद्वस्[1]। **अन्त्यव्यं०**। सि[2]। बाहुलकात् **वा** स्वरे मश्चेत्यन्त्यव्यञ्जनस्याऽपि मकारः। **मोऽ**नुस्वारः ॥

**[ सयलं ]**। सकला। अम्। **ह्रस्वोऽमि**। **अमोऽस्य** ॥

१. यद्वा विद्वानिति सिद्धप्रकृतिः। **वा**ऽव्ययोत्खातेत्यादिना ह्रस्वः - **खटि.**। २. अन्त्यव्यञ्जनस्य - सिलुक् - **दी.**। (अत्र विद्वस्-प्रकृतिस्थसकारस्यैव मकारोऽभिप्रेतः। प्रबोधे तु सिप्रत्ययस्थसकारस्य।)

**[ पिच्छि ]** । पृथ्वी । अम् । हस्वे **शेषे**ऽदन्तवदिति न्यायाद**मो**ऽस्य ॥

**[ अणण्णयग्गामि ]** । अनन्यकगामिन् । क्रियाविशेषणत्वादमि संस्कृतसिद्धः[1] ॥

**चइऊण** । त्यजं हानौ । क्त्वा । **त्यो**ऽचैत्ये - चः । **क्त्व**स्तुमत्तूण इति तूणः । **व्य**ञ्जनाद० । **ए**च्च क्त्वातुम्तव्येति इः ॥

**काउं** । कृग् । क्त्वा । **क्त्व**स्तुमत्तूणेति तुम् । **आः** कृगो भूतेत्याः ॥ २.१५ ॥

## वृश्चिके श्चेञ्चुर्वा ॥ २.१६ ॥

**[ विंचुओ, विंछिओ[2] ]** । वृश्चिक । **इत्** कृपादौ । **ङ**ञणनो० । पक्षे **ह्र**स्वात् थ्यश्चः० - छः । **व**क्रादावन्तः ।

संयुक्ताधिकारे श्चिग्रहणमत्र सस्वरार्थम् ॥ २.१६ ॥

## छोऽक्ष्यादौ ॥ २.१७ ॥

**[ उच्छू ]** । इक्षु । **प्र**वासीक्षौ - उः ॥

**[ छीअं ]** । क्षुत । **ई**[3] क्षुते ॥

**[ सरिच्छो ]** । सदृक्ष । **दृ**शः क्विप्टक्सकः - रि ॥

**[ वच्छो ]** । वृक्ष । **ऋ**तोऽत् ॥

**[ छुहा ]** । [क्षुध्] । **क्षु**धो हा[4]॥

**[ कुच्छेअयं[5] ]** । कौक्षेयक । **कौ**क्षेयके वा - उः ॥

**[ उच्छा ]** । उक्षन् । **पुं**स्यन इत्यतिदेशाद् **रा**ज्ञ इत्यात्वम् ॥ २.१७ ॥

## क्षमायां कौ ॥ २.१८ ॥

**[ छमा ]** । [क्ष्मा] । **क्ष्मा**श्लाघारत्नेऽन्त्यव्यञ्जनादिति मात् प्राक् अकारः ॥ २.१८ ॥

## ऋक्षे वा ॥ २.१९ ॥

**[ रिच्छं, रिक्खं ]** । ऋक्ष । **रिः** केवलस्य । पक्षे **क्षः** खः क्वचिदिति क्षस्य खः ॥ २.१९ ॥

---

१. संस्कृते सिद्धः - **ख.** ।० सिद्धः । सम्बोधनवाक्यमिदम् - **दी.** । २. विञ्छिओ - **मु.** । विंछिओ - **ता.** । ३. **ईः** क्षुते - **मु.** । ई क्षुते - **ताटि.** । ४. हा ॥ **[ छुणो** (?) । क्षुण्ण (?)] । **क्ते**नाऽप्फुण्णादय इति णलुक् । कौक्षे० - **खः** । ५. गुणाद्याः० - **ताटि.** ।

## क्षण उत्सवे ॥ २.२० ॥

## ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले ॥ २.२१ ॥

**पच्छा** । पथ्या ॥

**[ अच्छेरं ]** । आश्चर्य । **ह्रस्वः** सं० । **वल्ल्युत्करे**ति एत्वम् । **आश्चर्ये - रः** ॥

**[ पच्छा ]** । पश्चात् ॥

**[ मच्छलो ]** । मत्सर । **ह**रिद्रादौ ल इति लत्वम् [१]॥

**चिइच्छइ** । चिकित्सति ॥

**लिच्छइ** । लिप्सते ॥

**जुगुच्छइ** । जुगुप्सते ॥

**[ अच्छरा ]** । अप्सरस् । **अन्त्य**व्यं० । आप् [२]॥

**[ ऊसारिओ ]** । उत्सारित । **अनु**त्साहोच्छन्नेति उकारस्य दीर्घः ॥ २.२१ ॥

## सामर्थ्योत्सुकोत्सवे वा ॥ २.२२ ॥

**ऊसुओ** । **अनु**त्साहोच्छन्नेति ॥ २.२२ ॥

## स्पृहायाम् ॥ २.२३ ॥

**निप्पिहो** । निर्स्पृह । **अन्त्य**व्यं० । **क**गटड० । **इत्** कृपादौ [३]॥ २.२३ ॥

## द्यय्यर्यां जः ॥ २.२४ ॥

**[ वेज्जो ]** । वैद्य । **ऐ**त एत् ॥

**जुई** । द्युति ॥

**जोओ** । द्योत ॥

**जज्जो** । जय्य ॥

---

१. बाहुलकाद् वा लत्वम् - **खटि.** । २. अप्सरस् । आप् । **स्त्रि**यामादविद्युतः - आत्वम् - **दी.** । **स्त्रि**यामाद० - आत्वम् - **खटि.** । ३. लुंकि निरः - दीर्घत्वं, ह्रस्वः संयोगे - **खटि.** ।

**[ सेज्जा ]** । शय्या । **एच्छय्यादौ** ॥

**[ भारिआ ]** । भार्या । **स्याद्**भव्यचैत्येति यात् प्राक् इः ॥

**वज्जं** । वर्य्य ॥

**पज्जाओ** । पर्याय ॥

**पज्जत्तं** । पर्याप्तम् ॥ २.२४ ॥

**अभिमन्यौ ज-ञ्जौ वा ॥ २.२५ ॥**

**[1]साध्वस-ध्य-ह्यां झः ॥ २.२६ ॥**

**बज्झए** । बध्यते ॥

**सज्झाओ** । स्वाध्याय । **ह्रस्वः** सं० ॥

**मज्झं** । मह्यम् । चतुर्थ्यन्तः संस्कृतसिद्धः ॥

**नज्झइ** । नह्यति ॥ २.२६ ॥

**ध्वजे वा ॥ २.२७ ॥**

**इन्धौ झा ॥ २.२८ ॥**

**विज्झाइ** । ञिइन्धैपि विपूर्वः । ते । **त्या**दीनामाद्यत्रयस्य० - इच् । **लुगि**ति उपसर्गेकारस्य लुक् ॥ २.२८ ॥

**वृत्त-प्रवृत्त-मृतिका-पत्तन-कदर्थिते टः ॥ २.२९ ॥**

सर्वेषु **ऋ**तोऽत् ॥

**[ कवट्टिओ ]** । कदर्थित । **क**दर्थिते वः ॥ २.२९ ॥

**र्त्तस्याऽधूर्त्तादौ ॥ २.३० ॥**

**[ केवट्टो ]** । कैवर्त्त । **ऐ**त एत् ॥

**जट्टो** । जर्त्त ।

---

१. साधूनप्यस्यति **लिहादिभ्यः** - अच् - **खटि.** ।

**पयट्टइ** । वृतूङ् प्रपूर्वः । ते → इच् । **व्य**ञ्जनाददन्ते । **ऋ**वर्णस्याऽर्[१] ॥

**रायवट्टयं**[२] । राजावर्त्तक[३] । **स्व**राणां स्वराः[४] ॥

**नट्टई** । नर्त्तकी ॥

**निव्वत्तओ** । निर्वर्त्तक ॥

**वट्टा** । वार्त्ता ॥ २.३० ॥

## वृन्ते ण्टः ॥ २.३१ ॥

**वेण्टं । इदे**दोद् वृन्ते ॥ २.३१ ॥

## ठोऽस्थि-विसंस्थुले ॥ २.३२ ॥

## स्त्यान-चतुर्था-ऽर्थे वा ॥ २.३३ ॥

**[ थीणं ]** । [स्त्यान] । **ई** स्त्यानखल्वाटे । **स्त**स्य थोऽसमेति थः ॥ २.३३ ॥

## ष्टस्याऽनुष्ट्रेष्टासन्दिष्टे ॥ २.३४ ॥

**[ लट्ठी ]** । यष्टि । यष्ट्यां लः ॥

**[ दिट्ठी, सिट्ठी ]** । दृष्टि, सृष्टि । **इ**त् कृपादौ ॥

**[ पुट्ठो ]** । पुष्ट ॥

**[ उट्टो ]** । उष्ट्र । **क**गटडेति षलुक् । **स**र्वत्र लव० ॥ २.३४ ॥

## गर्त्ते डः ॥ २.३५ ॥

**गड्डा** । **स्व**स्रादेर्डा ॥ २.३५ ॥

## सम्मर्द-वित्तर्दि-विच्छर्द-च्छर्दि-कपर्द-मर्दिते र्दस्य ॥ २.३६ ॥

**छड्डइ** । छर्दण् । णिच् । तिव् → इच् । **णे**रदेदावावे - णिच् → अकारः ॥ २.३६ ॥

---

१. लाक्षणिकस्य तावत् कार्यं न भवति, पुनः **क्व**थवर्द्धां ढ इति निर्देशात् स्यात् - **खटि.** । (अयमत्र भावः - वृत्तौ र्त्तस्य टो भवतीति यद् उक्तं तद् वृतूङ्धातोर्गुणे सति जायमानस्य र्त्तस्य न स्यात्, लक्षणतो (-व्याकरणसूत्रेण) निष्पन्नस्य तस्य लाक्षणिकत्वात्, अलाक्षणिके विधौ सम्भवति सति लाक्षणिके तस्य प्रतिषिद्धत्वात् । परं **क्व**थवर्द्धां ढ इति सूत्रे वर्धेरिव कृत - गुणस्य वृधेर्यद् ग्रहणं कृतं तेन ज्ञायते यद् अलाक्षणिकस्येव लाक्षणिकस्याऽपि क्वचिद् विधिर्भवति । तथैवाऽत्राऽपि लाक्षणिकस्याऽपि विधेयमिति ।) २. राइवट्टयं - **क.** । ३. राजवर्त्तक - **ग.दी.** । ०र्त्तक, रत्नविशेषः । स्वराणां० - **ख.दी.** । ४. यद्वा दीर्घह्रस्वौ मिथो वृत्तौ - **दी.** ।

**गर्दभे वा ॥ २.३७ ॥**

**कन्दरिका-भिन्दिपाले ण्डः ॥ २.३८ ॥**

**स्तब्धे ठ-ढौ ॥ २.३९ ॥**

**दग्ध-विदग्ध-वृद्धि-वृद्धे ढः ॥ २.४० ॥**

**वुड्ढी, वुड्ढो** । उदृत्वादौ ॥

**विद्ध** । **इत्** कृपादौ ॥ २.४० ॥

**श्रद्धर्द्धि-मूर्धा-ऽर्धेऽन्ते वा ॥ २.४१ ॥**

**इड्ढी** । इत् कृपादौ ॥

**रिद्धी** । **रिः** केवलस्य ॥

**[ मुंढा ]** । मूर्द्धन् । **ह्रस्वः** संयोगे । **वक्रादावन्तः** । **अन्त्यव्यं०** - नलुक् । सि । **पुंस्यन** इत्यतिदेशाद् **राज्ञ** इत्यात्वम् । **अन्त्यव्यं०** - सिलुक् ॥ २.४१ ॥

**म्न-ज्ञोर्णः ॥ २.४२ ॥**

**पञ्चाशत्-पञ्चदश-दत्ते ॥ २.४३ ॥**

**[ पण्णासा ]** । पञ्चाशत् । **अन्त्यव्यं०** । **आत्** - आप् ॥

**[ पण्णरह ]** । पञ्चदश सिद्धः । **सङ्ख्यागद्गदे रः** । **दशपाषाणे हः** ॥

**[ दिण्णं ]** । दत्त । **इः** स्वप्नादौ ॥ २.४३ ॥

**मन्यौ न्तो वा ॥ २.४४ ॥**

**स्तस्य थोऽसमस्त-स्तम्बे ॥ २.४५ ॥**

**सत्थि** । स्वस्ति ॥ २.४५ ॥

**स्तवे वा ॥ २.४६ ॥**

**पर्यस्ते थ-टौ ॥ २.४७ ॥**

**[ पल्लट्टो[१] ]** । **पर्यस्तपर्याणेति ल्लः** ॥ २.४७ ॥

१. ननु एकस्य संयुक्तस्य उभावपि कथं न भवतः ? न । द्विवचनसामर्थ्यात् - **ताटि.** ।

**वोत्साहे थो हश्च रः ॥ २.४८ ॥**

**[ उच्छाहो ]** । उत्साह । **ह्रस्वात्** थ्यश्च० ॥ २.४८ ॥

**आश्लिष्टे ल-धौ ॥ २.४९ ॥**

**ला**दिति विश्लेषबाधनार्थं लग्रहणम् ॥ २.४९ ॥

**चिह्ने न्धो वा ॥ २.५० ॥**

**इंधं** । प्रायोग्रहणादादेरपि[1] **क**गचजेति चस्य लुक् ॥

**चिण्हं** । **सूक्ष्म**श्नष्णेति ण्हः ॥ २.५० ॥

**भस्मा-ऽऽत्मनोः पो वा ॥ २.५१ ॥**

**[ अप्पा, अप्पाणो ]** । आत्मन् । सि । **पुंस्यन** इत्यनेनाऽतिदेश आणश्च ॥ २.५१ ॥

**ड्म-क्मोः ॥ २.५२ ॥**

**कुंपलं** । [कुड्मल] । **व**क्रादा० ॥

रुच्ममस्याऽस्ति रुच्मी ॥ २.५२ ॥

**ष्प-स्पयोः फः ॥ २.५३ ॥**

**[ पाडिप्फद्धी ]** । प्रतिस्पर्द्धिन् । **अतः** समृद्ध्यादौ० । **प्र**त्यादौ डः ॥

**[ बुहप्फई ]** । बृहस्पति । **वा** बृहस्पतौ - उः ॥

**निप्पहो** । निःप्रभं[2] ॥

**[ परोप्परं ]** । परस्पर । **न**मस्कारपरस्परे द्वितीयस्य - ओ ॥ २.५३ ॥

**भीष्मे ष्मः ॥ २.५४ ॥**

संयुक्ताधिकारादेव सिद्धे ष्मग्रहणमुत्तरार्थम् । न चोत्तरत्राऽपि **ला**दिति बाधनात् ष्मस्यैव भविष्यतीति वाच्यं, तस्य पक्षे[3] चरितार्थत्वात् ॥ २.५४ ॥

---

१. ('क्वचिदादेरपि' इत्यनेन ।) २. निष्प्रभ - **क.ख.दी.** । ३. ('तस्य पक्षे' इत्यस्याऽयं भावः - यदा बहुलाधिकाराद् **ला**दित्यनेन लकारात् पूर्वमिकारागमो न भवति तदा 'श्लेष्मन्-शब्दे संयुक्तस्य फो भवती'ति विधाने सति 'श्ले'-'ष्म' - इत्यनयोः कस्य फकारो भवतीति संशयः स्यादेव । तन्निराकरणायाऽत्र ष्मग्रहणमिति ।)

## श्लेष्मणि वा ॥ २.५५ ॥

**[ सिलिम्हो ]** । **ला**दिति लात् प्राक् इकारः । **ह्रस्वः** सं० । **प**क्ष्मश्मष्म० ॥ २.५५ ॥

## ताम्रा-ऽऽम्रे म्बः ॥ २.५६ ॥

## ह्वो भो वा ॥ २.५७ ॥

**जीहा** । **ई**ज्जिह्वा० ॥ २.५७ ॥

## वा विह्वले वौ वश्च ॥ २.५८ ॥

**विहलो** । **स**र्वत्र० - वलोपे **र**होरिति द्वित्वनिषेधः ॥ २.५८ ॥

## वोर्ध्वे ॥ २.५९ ॥

## कश्मीरे म्भो वा ॥ २.६० ॥

**[ कम्हारा ]** । कश्मीर । जस् । **ज**स्शसोर्लुक् । **ज**स्शस्ङसि० । **आ**त् कश्मीरे । **प**क्ष्मश्मष्म० ॥ २.६० ॥

## न्मो मः ॥ २.६१ ॥

**[ वम्महो ]** । मन्मथ । **म**न्मथे वः ॥ २.६१ ॥

## ग्मो वा ॥ २.६२ ॥

## ब्रह्मचर्य-तूर्य-सौन्दर्य-शौण्डीर्ये र्यो रः ॥ २.६३ ॥

**[ बम्हचेरं, बम्हचरिअं ]** । ब्रह्मचर्य । **प**क्ष्मश्म० । **ब्र**ह्मचर्ये चः । **स्या**द्भव्येति इश्च ॥ **सुंदेरं** । उत् सौन्दर्यादौ । **ए**च्छय्यादौ ॥ २.६३ ॥

## धैर्ये वा ॥ २.६४ ॥

**धीरं** । **ई**द् धैर्ये [१]॥ २.६४ ॥

## एतः पर्यन्ते ॥ २.६५ ॥

**पेरंतो** । **व**ल्ल्युत्कर० ॥ २.६५ ॥

---

१. ईधैर्ये - **ग.** । ई धैर्ये - **ताटि.** ।

**आश्चर्ये ॥ २.६६ ॥**

**अच्छेरं** । **व**ल्ल्युत्कर० । **ह्र**स्वात् थ्यश्च० ॥ २.६६ ॥

**अतो रिआ-ऽर-रिज्ज-रीअं ॥ २.६७ ॥**

**पर्यस्त-पर्याण-सौकुमार्ये ल्लः ॥ २.६८ ॥**

**[ पल्लट्टं, पल्लत्थं ]** । **प**र्यस्त । **प**र्यस्ते थ-टौ ॥

**[ सोअमल्लं ]** । सौकुमार्य । **औ**त ओत् । **उ**तो मुकुलादिष्वत् । **ह्र**स्वः सं० ॥

**[ पलिअंको ]** । पर्यङ्क । **स्या**द्भव्य० ॥ २.६८ ॥

**बृहस्पति-वनस्पत्योः सो वा ॥ २.६९ ॥**

**बहप्फई** । **ऋ**तोऽत् । **ष्प**स्पयोः फः ॥

**भयस्सई** । **बृ**हस्पतौ बहो भयं ॥ २.६९ ॥

**बाष्पे होऽश्रुणि ॥ २.७० ॥**

**[ बप्फो ]** । बाष्प । **ष्प**स्पयोः फः ॥ २.७० ॥

**कार्षापणे ॥ २.७१ ॥**

**दुःख-दक्षिण-तीर्थे वा ॥ २.७२ ॥**

**दाहिणो** । **द**क्षिणे हे इत्यात्वम् । पक्षे - **[ दक्खिणो ]** । **क्षः** खः० ॥

**तूहं** । **ती**र्थे हे - ऊ ॥ २.७२ ॥

**कूष्माण्ड्यां ष्मो लस्तु ण्डो वा ॥ २.७३ ॥**

**[ कोहण्डी ]** । **ओ**त् कूष्माण्डीतूणीर० । **ह्र**स्वः सं० ॥ २.७३ ॥

**पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः ॥ २.७४ ॥**

**[ पम्हाइं ]** । पक्ष्मन् । **अ**न्त्यव्यं० । जस् । **ज**स्शस इँइं० ॥

**[ कुम्हाणो ]** । कुश्मानो देशविशेषः ॥

**कम्हारा** । **आ**त् कश्मीरे ॥

[ **उम्हा** ] । उष्मन् । सि । **अन्त्यव्यञ्ज०** । **पुंस्यन** इत्यात्वम् ॥

**अम्हारिसो** । **दृशः** क्विप्टक्सकः - रि ॥

[ **बम्हचेरं** ] । ब्रह्मचर्य । **ब्रह्मचर्ये** चः - ए । **ब्रह्मचर्यतूर्य०** - रः ॥ २.७४ ॥

**सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः ॥ २.७५ ॥**

**सण्हं** । **अदूतः** सूक्ष्मे वा - अत्वम् ॥

**सण्हं** । श्लक्ष्ण ॥

[ **कसणो** ] । कृष्ण । **कृष्णे** वर्णे वा - अः ॥

[ **कसिणो** ] । कृत्स्न । **ईः**श्रीह्रीकृत्स्नेति इः ॥ २.७५ ॥

**ह्लो ल्हः ॥ २.७६ ॥**

**क-ग-ट-ड-त-द-प-श-ष-स-●क-⌣पामूर्ध्वं लुक् ॥ २.७७ ॥**

[ **छप्पओ** ] । षट्पद । **षट्शमीशावेति** च्छः ॥

[ **मोग्गरो** ] । मुद्गर । **ओत्** संयोगे ॥

**चुअइ**[१] । च्युत् (श्च्युत्) । तिव् → इच् । **व्यञ्जनाद०** ॥

[ **छट्ठो** ] । षष्ठ । **षट्शमीशा०** ॥ २.७७ ॥

**अधो म-न-याम् ॥ २.७८ ॥**

**वाहो**[२] । व्याध[३] ॥ २.७८ ॥

**सर्वत्र ल-व-रामवन्द्रे ॥ २.७९ ॥**

[ **लोद्धओ** ] । लुब्धक । **ओत्** संयोगे ॥

**पिक्कं** । **पक्वाङ्गारललाटे** वा - इः ॥

[ **धत्थो** ] । ध्वस्त । **स्तस्य** थो० । **द्वितीयतुर्य०** ॥

---

१. **स्वराणां** स्वराः - **ताटि.** । २. नाहो - **मु.** । वाहो - **ता.** । ३. व्याध । अथवा बाह्य । बहिर्भवो **गम्भीर**पञ्चजन० अल्पे बाह्या वा । क्वचित् **सा**ध्वसध्यह्यां झ इति न भवति - **ख.** ।

**[ बीओ ]** । द्वितीय । **क**गचज० - तलुक् । **स्व**रस्योद्वृत्ते इति क्वचिद् वा सन्धिः ॥

**दुआई** । **द्वि**न्योरुत् ॥ २.७९ ॥

## द्रे रो न वा ॥ २.८० ॥

[१]स्थितिपरिवृत्तौ । **ह्र**दे हदोरिति व्यत्यये इत्यर्थः ॥

**सिक्खंतु** । शिक्षि विद्योपादाने । अन्ताम् । **ब**हुषु न्तुहमो - न्तु । **व्य**ञ्जनाद० । **क्षः** खः० ॥

**वोद्रहीउ**[२] । जस् । **स्त्रि**यामुदोतौ वा - उत्वम् ॥

**[ पडिआ ]** । पतिता । **स**दपतोर्डः ॥ २.८० ॥

## धात्र्याम् ॥ २.८१ ॥

## तीक्ष्णे णः ॥ २.८२ ॥

## ज्ञो ञः ॥ २.८३ ॥

**[ णाणं ]** । ज्ञान । **म्न**ज्ञोर्णः ॥

**अप्पण्णू**[३] । **ज्ञो** णत्वेऽभिज्ञादाविति उः । **भ**स्मात्मनोः पो वा ॥

**[ दइवज्जो ]** । दैवज्ञ । **ए**च्च दैवे - अइः ॥

**[ सण्णा ]** । संज्ञा । **मां**सादेर्वा - लुक् ॥ २.८३ ॥

## मध्याह्ने हः ॥ २.८४ ॥

**[ मज्झण्हो ]** । **सा**ध्वसध्यह्यां झः । **ह्र**स्वः सं० । **सू**क्ष्मश्नष्ण० ॥ २.८४ ॥

## दशार्हे ॥ २.८५ ॥

## आदेः श्मश्रु-स्मशाने ॥ २.८६ ॥

**मासू**[४] । **लु**प्तयरवशषसां दीर्घः ॥

**मंसू** । **व**क्रादावन्तः । **मां**सादिष्वनुस्वारे - ह्रस्वः ॥

**मस्सू** । प्रथमं **अ**नादौ द्वित्वे ततो **लु**प्तयरवेति दीर्घत्वे **ह्र**स्वः सं० ॥ २.८६ ॥

---

१. (अत्र वृत्तिस्थस्याऽस्य पदस्याऽर्थश्चिन्त्यते ।) २. वोद्रहीओ - **मु.** । ३. अल्पज्ञ-आत्मज्ञाभ्यां सिद्धम् - **ख.** । ४. मासू । **वा**ऽक्ष्यर्थेति पुंस्त्वम् । लुप्तय० - **ख.** ।

## श्चो हरिश्चन्द्रे ॥ २.८७ ॥

## रात्रौ वा ॥ २.८८ ॥

## अनादौ शेषा-ऽऽदेशयोर्द्वित्वम् ॥ २.८९ ॥

**[ डक्को ]** । दष्ट । **दशनदष्टदग्धदोलेति** डः । **शक्तमुक्तदष्टरुग्णेति** कः ॥

**[ रग्गो ]** । रक्त । **रक्ते** गो वा - गः ॥

**[ किच्ची ]** । कृत्ति । **इत्** कृपादौ । **कृत्तिचत्वरे** चः ॥

**[ रुप्पी ]** । रुक्मिन् । **ड्मक्मोः** ॥

**[ कसिणो ]** । **ऋतो**ऽत् । **ईश्रीह्री०** - नात् प्राक् इः ॥

**[ थेरो ]** । स्थविर । **स्थविरविचकिलायस्कारे** - विशब्देन सह ए ॥

**[ खंभो ]** । **स्तम्भे** स्तो वा - खः ॥

**[ विञ्चुओ ]** । वृश्चिक । **वृश्चिके** श्चेर्ञ्चुर्वा ॥

**[ भिण्डिवालो ]** । भिन्दिपाल । **कन्दरिकाभिन्दिपाले** ण्डः ॥ २.८९ ॥

## द्वितीय-तुर्ययोरुपरि पूर्वः ॥ २.९० ॥

**[ मज्झं ]** । मध्य । **साध्वस०** ॥

**[ पट्ठी ]** । स्पृष्टि[१] । **ऋतो**ऽत् । **ष्टस्या**ऽनुष्ट्रे० - ठः ॥

**[ वुड्ढो ]** । वृद्ध । **उदृत्वादौ** । **दग्धविदग्धवृद्धेति** ढः ॥

**[ आलिद्धो ]** । आश्लिष्ट । **आश्लिष्टे** लधौ ।

**[ भिब्भलो ]** । विह्वल । **वा** विह्वले वौ वश्च ॥

**[ ओक्खलं ]** । उदूखल । **न** वा मयूखेति दूशब्देन सह ओत्वम्[२] ॥

**कइद्धओ** । कपिध्वज ॥

**खाओ** । ख्यात[३] ॥ २.९० ॥

१. पृष्टि - **ग.** । २. ओत्वम् । **तैलादौ** - द्वित्वम् - **ख.** । ३. खात - **ताटि.** ।

## दीर्घे वा ॥ २.९१ ॥

## न दीर्घा-ऽनुस्वारात् ॥ २.९२ ॥

**[ छूढो ]** । क्षिप्त । **वृ**क्षक्षिप्तयो रुक्खछूढौ ॥

**[ नीसासो ]** । निर्-श्वास[1] । **लुं**कि निरः ।

**[ फासो ]** । स्पर्श[2] । **लु**प्तयरव० ॥

**ओमालं** । [अवमाल्य] । **अ**वापोते - ओ ॥

**आणा** । [आज्ञा] । **म्न**ज्ञोर्णः ॥

**तंसं** । [त्र्यस्र] । **व**क्रादा० ॥

**[ कंसालो ]** । कांस्यताल[3] । **ह्र**स्वः सं० । **क**गचज० - तलुक् । **स्व**रस्योद्वृत्ते इति क्वचित् सन्धिः ॥ २.९२ ॥

## र-होः ॥ २.९३ ॥

**[ सुंदेरं ]** । सौन्दर्य । **उ**त् सौन्दर्यादौ । **ए**च्छय्यादौ । **ब्र**ह्मचर्यतूर्यपर्यन्त० ॥

**[ पेरंतं ]** । पर्यन्त । **व**ल्ल्युत्कर० । **ए**तः पर्यन्ते ॥

**[ विहलो ]** । विह्वल । **स**र्वत्र ल० ॥

**[ कहावणो ]** । कार्षापण । **ह्र**स्वः सं० । **का**र्षापणे हः ॥ २.९३ ॥

## [4]धृष्टद्युम्ने णः ॥ २.९४ ॥

## कर्णिकारे वा ॥ २.९५ ॥

## दृप्ते ॥ २.९६ ॥

**[ दरिअसीहेण ]** । दृप्तसिंह । **अ**रिर्दृप्ते । **मां**सादेर्वा । **ई**ज्जिह्वा० । टा । **टा**-आमोर्णः । **टा**णशस्येत् ॥ २.९६ ॥

---

१. निर्श्वास । **नि**र्दुरोर्वा - रलुग् । **लुं**कि निरः - **क.** । २. **स्पृ**शः फासफंस० - फासआदेशः - **दी.** । ३. कांश्यताल - **ख.** । कांशताल - **ग.** । कांस्यताल - **तादि.** । ४. **ऋ**तोऽत् । **ष्ट**स्याऽनुष्ट्रेति ठः । **द्य**य्यर्यां जः - ज । **म्न**ज्ञोर्णः - णः । सूत्रेण द्वित्वनिषेधः - **क.** ।

## समासे वा ॥ २.९७ ॥

[ **नइग्गामो** ] । नदीग्राम । **दी**र्घह्रस्वौ मिथो वृत्तौ ॥

[ **हरक्खंदा** ] । हरस्कन्द । औ । **द्वि**वचनस्य बहुवचनम् - जस् । **ज**स्शसोर्लुक् । **ज**स्शस्ङसि० । **शु**ष्कस्कन्दे वा - खः[१] ॥

[ **आणालक्खंभो** ] । आलानस्तम्भ । **आ**लाने लनोर्व्यत्ययः । **स्त**म्भे स्तो वा - खः ॥

[ **पम्मुक्कं** ] । प्रमुक्त । **श**क्तमुक्तदृष्टेति कः ॥

[ **अद्दंसणं** ] । अदर्शन । **व**क्रादा० ॥ २.९७ ॥

## तैलादौ ॥ २.९८ ॥

[ **वेइल्लं** ] । विचकिल । **स्थ**विरविचकिलायेति चेन सह ए ॥

[ **अज्जू** ] । ऋजु । **उ**दृत्वादौ ॥

[ **बहुत्तं** ] । प्रभूत । **प्र**भूते बः ॥

**विस्सोअसिआ** । व्रतभङ्गपरिणामे विषयेच्छा ॥ २.९८ ॥

## सेवादौ वा ॥ २.९९ ॥

[ **नेड्डं** ] । नीड । **नी**डपीठे वा - ए ॥

[ **माउक्कं** ] । मृदुक । **आ**त् कृशामृदुक० ॥

[ **कोउहल्लं** ] । कुतूहल । **कु**तूहले वा ह्रस्वश्च ॥

[ **थोरो** ] । स्थूल । **ओ**त् कूष्माण्डी० । **स्थू**ले लो रः ॥

[ **दइव्वं** ] । दैव । **ए**च्च दैवे ॥

[ **तुण्हिक्को** ] । तूष्णीक । **पा**नीयादिष्वित् ॥

[ **खण्णू** ] । स्थाणु । **स्था**णावहरे - खः ॥

[ **थिण्णं** ] । स्त्यान । **ई** स्त्यान० । **स्त**स्य थो० ॥

१. अथवा **ष्क**स्कयोर्नाम्नि - खः - **दी.** । **ष्क**स्कयोः - **ताटि.** ।

**[ अम्हक्केरं ]** । अस्मदीय । **इदमर्थस्य केरः** । **अन्त्यव्यं०** - दलुक् ॥ २.९९ ॥

## शार्ङ्गे ङात् पूर्वोऽत् ॥ २.१०० ॥

## क्ष्मा-श्लाघा-रत्नेऽन्त्यव्यञ्जनात् ॥ २.१०१ ॥

**[ छमा ]** । **क्ष्**मायां कौ - छः ॥ २.१०१ ॥

## स्नेहा-ऽग्न्योर्वा ॥ २.१०२ ॥

## प्लक्षे लात् ॥ २.१०३ ॥

## र्ह-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित् ॥ २.१०४ ॥

**नाणं** । ज्ञान । **म्नज्ञोर्णः** । **व्यत्ययश्चे**ति न्यायात् **नो** णः[1] ॥ २.१०४ ॥

## र्श-र्ष-तप्त-वज्रे वा ॥ २.१०५ ॥

**आयंसो** । आदर्श । **व**क्रादावन्तः ॥

**वासं** । [वर्ष] । **लुप्तयरव०** - दीर्घः ॥ २.१०५ ॥

## लात् ॥ २.१०६ ॥

**पिलुट्ठं** । प्लुष्ट ॥

**[ सुक्किलं ]** । शुक्ल । **से**वादौ वा ॥

**किलम्मइ**[2] । क्लमूच् । तिव् । **श**कादीनां द्वित्वम् ॥

**उप्पावेइ** । उत्प्लुङ् । णिग् । **उवर्णस्याऽऽवः** । तिव् → इच् । **णेर**देदावा० । **अदेल्लु**क्यादेः ॥ २.१०६ ॥

## स्याद्-भव्य-चैत्य-चौर्यसमेषु यात् ॥ २.१०७ ॥

**सिआवाओ** । स्याद्वाद ॥

---

१. (अत्रेदं प्रतिभाति - **व्यत्ययश्चे**ति सूत्रस्य वृत्तौ त्याद्यादेशानामपि व्यत्ययो भवतीति ज्ञापितमस्ति । ततो **नो** ण इति सूत्रेण यथा नकारस्य णकारो विधीयते, तथा **व्यत्ययश्चे**ति सूत्रबलेन तेन णकारस्य नकारोऽपि विहितो भवेत् । ततश्च ज्ञानशब्दस्थ-ज्ञकारस्य णकारे कृते **व्यत्ययश्च**-सूत्रार्पितबलेन **नो** ण इति सूत्रेण तस्य णकारस्य नकारो विधीयते । एवं च 'नाण' इति शब्दस्य निष्पत्तिरिति ।) २. क्लाम्यति । यदा साध्यं तदा **श**कादौ द्वित्वम् - **ताटि.** ।

**गहीरिअं**[१] । गम्भीरे साधु । **तत्र** साधौ - यः ॥

[ **आइरिओ**[२] ] । **आ**चार्ये चोऽच्च - चकारस्य इः ॥

[ **सुंदरिअं** ] । सौन्दर्य । उत् सौन्दर्या० ॥

**सोरिअं** । शौर्यम् ॥

[ **धीरिअं** ] । धैर्य । **ई**र्धैर्ये ॥

[ **बंभचरिअं** ] । ब्रह्मचर्य । **ह्मो** म्भो वा ॥ २.१०७ ॥

## स्वप्ने नात् ॥ २.१०८ ॥

[ **सिविणो** ] । स्वप्न । **इः** स्वप्नादौ ॥ २.१०८ ॥

## स्निग्धे वाऽदितौ ॥ २.१०९ ॥

## कृष्णे वर्णे वा ॥ २.११० ॥

## उच्चाऽर्हति ॥ २.१११ ॥

**अरुहो**[३] । **सुग्द्वि**षार्ह इति शतृ (अतृश्) ॥

**अरुहंतो**[४] । **श**त्रानशः - न्त । **व्य**ञ्जनाद० ॥ २.१११ ॥

## पद्म-छद्म-मूर्ख-द्वारे वा ॥ २.११२ ॥

**पोम्मं** । [पद्म] । **ओ**त् पद्मे । **से**वादौ वा[५] ॥

**देरं** । [द्वार] । **द्वा**रे वा - ए ॥ २.११२ ॥

## तन्वीतुल्येषु ॥ २.११३ ॥

[ **गरुवी** ] । गुर्वी । **उ**तो मुकुलादिष्वत् ॥

[ **पुहुवी** ] । पृथ्वी । **उ**दृत्वादौ ॥ २.११३ ॥

---

१. (गम्भीरे साध्विति व्युत्पत्त्यनुरोधेनाऽत्र 'गम्भीरिअं' इत्यनेन भवतिव्यम् ।) २. आयरिओ- **मु.** । आइरिओ - **ता.** । ३. अरुहो इत्यादि प्रथमोदाहरणेषु (- अरुहो, अरहो, अरिहो इत्येतेषु) **अ**न्त्यव्यञ्जनस्येति तलुक् । ततो **अ**तः सेर्डोः - **खटि.** । ('अर्हत्' इति प्रकृतित्वेनेत्थं सिध्यति ।) अर्ह मह पूजायाम् । अर्हतीति **अर्हो**ऽच् - अ-प्र. । अर्ह इति प्रकृतिः **दी.** । अर्हत् प्र० - **ताटि.** । ४. अतृश् स्थाने **गौ**णादयः - न्त । यदा शतृ तदा - **खटि.** । ५. **तै**लादौ - **ताटि.** ।

**एकस्वरे श्वः-स्वे ॥ २.११४ ॥**

**[ सुवे ]** । श्वस् । **अन्त्यव्यं०** । ङि । **डेम्मि ङेः**[१] ॥

**[ सुवे ]** । स्व । जस् । **अतः** सर्वादेर्डेर्जसः ॥ २.११४ ॥

**ज्यायामीत् ॥ २.११५ ॥**

**करेणू-वाराणस्यो र-णोर्व्यत्ययः**[२] **॥ २.११६ ॥**

**आलाने ल-नोः ॥ २.११७ ॥**

**अचलपुरे च-लोः ॥ २.११८ ॥**

**महाराष्ट्रे ह-रोः ॥ २.११९ ॥**

**[ मरहट्ठं ]** । महाराष्ट्र । **म**हाराष्ट्रे - ह्रस्वः ॥ २.११९ ॥

**ह्रदे ह-दोः ॥ २.१२० ॥**

**[ हरए ]** । ह्रद । सि । **अत** एत् सौ पुंसि० । **अन्त्यव्य०** ॥

**[ महपुंडरिए**[३] **]** । महापुण्डरीक । **दीर्घ**ह्रस्वौ मिथो वृत्तौ । **पा**नीयादिष्वित् ॥ २.१२० ॥

**हरिताले र-लोर्न वा ॥ २.१२१ ॥**

**लघुके ल-होः ॥ २.१२२ ॥**

**ललाटे ल-डोः ॥ २.१२३ ॥**

**ह्ये ह्योः ॥ २.१२४ ॥**

**स्तोकस्य थोक्क-थोव-थेवाः ॥ २.१२५ ॥**

**दुहितृ-भगिन्योर्धूआ-बहिण्यौ ॥ २.१२६ ॥**

**[ दुहिआ ]** । दुहितृ । **स्व**स्रादेर्डा ॥ २.१२६ ॥

**वृक्ष-क्षिप्तयो रुक्ख-छूढौ ॥ २.१२७ ॥**

**वनिताया विलया ॥ २.१२८ ॥**

---

१. **अव्यय**स्येति ङिलुकि **ए**च्छय्यादौ - एत्वमिति वा । **कयं** । कृतम् । **सम्भाव**ने सिद्धवत् - क्तः - **खटि.** । २. सूत्रेण रकार-णकारयोर्व्यत्ययः सस्वरो नैव । स्वराः स्वस्थाने एव तिष्ठन्ति - **खटि.** । ३. **अत** एत् सौ० - **खटि.** ।

**गौणस्येषतः कूरः ॥ २.१२९ ॥**

**[ पिक्का ]**[1] । पक्व । **प**क्वाङ्गारेति इः ॥

**ईसि** । ईषत् । **इः** स्वप्नादौ ॥ २.१२९ ॥

**स्त्रिया इत्थी ॥ २.१३० ॥**

**धृतेर्दिहिः ॥ २.१३१ ॥**

**मार्जारस्य मञ्जर-वञ्जरौ ॥ २.१३२ ॥**

**वैडूर्यस्य वेरुलिअं ॥ २.१३३ ॥**

**एण्हिं-एत्ताहे इदानीमः ॥ २.१३४ ॥**

**इयाणिं** । **पा**नीयादिष्वित् ॥ २.१३४ ॥

**पूर्वस्य पुरिमः ॥ २.१३५ ॥**

**त्रस्तस्य हित्थ-तट्ठौ ॥ २.१३६ ॥**

**बृहस्पतौ बहो भयः ॥ २.१३७ ॥**

**[ भयस्सई ]** । **बृ**हस्पति-वनस्पत्योः सो वा ॥

पक्षे - **[ भयप्फई ]** । **ष्प**स्पयोः फः ॥

**[ भयप्पई ]** । **क**गटडेति सलुक् ॥ २.१३७ ॥

**मलिनोभय-शुक्ति-छुप्ता-ऽऽरब्ध-पदाते-**
**मइला-ऽवह-सिप्पि-छिक्का-ऽऽढत्त-पाइक्कं ॥ २.१३८ ॥**

**[ अवहोआसं ]** । उभयावकाशे[2] । **अ**वापोते - उः ॥ २.१३८ ॥

**दंष्ट्राया दाढा ॥ २.१३९ ॥**

**बहिसो बाहिं-बाहिरौ ॥ २.१४० ॥**

**बाहिरं** । सेर्बाहुलकाद् **मो**ऽनुस्वार इत्यनुस्वारः ॥ २.१४० ॥

---

१. **[ चिंच व्व ]** । चिञ्चा प्रकृतिः । इव । **मि**वपिवविवव्वेति वः । **ह्र**स्वः सं० । **[ कूरपिक्का ]** । ईषत्पक्व। ईषत्स्थाने कूरः । **स**र्वत्रेति वलुक् । **प**क्वाङ्गा० - **ख.** । २. उभयः सूर्यकृतो दीपकृतश्चाऽवकाशो यत्र - **खटि.** ।

**अधसो हेट्ठं[1] ॥ २.१४१ ॥**

**मातृ-पितुः स्वसुः सिआ-छौ ॥ २.१४२ ॥**

ऋकारस्य **गौ**णान्त्यस्येति उः ॥ २.१४२ ॥

**तिर्यचस्तिरिच्छिः ॥ २.१४३ ॥**

**पेच्छइ** । दृशृं । **दृ**शो नियच्छपेच्छा० ॥

**तिरिआ** । **आर्ष**त्वाद् दीर्घः ॥ २.१४३ ॥

**गृहस्य घरोऽपतौ ॥ २.१४४ ॥**

**शीलाद्यर्थस्येरः ॥ २.१४५ ॥**

**[ हसिरो ]** । हस । तृन् ॥

**[ रोविरो ]** । रुदृक् । तृन् । **युवर्ण**स्य गुणः । **रु**दनमोर्वा - दस्य वः ॥

**[ लज्जिरो ]** । लस्ज् । **इङि**तो व्यञ्जनाद्यन्तादनः ॥

**जंपिरो** । **क**थेर्वज्जरपज्जरोप्पाल० । तृन् ॥

**[ वेविरो ]** । वेपृङ् । **चाल**शब्दार्थादकर्मकादनः ॥

**[ भमिरो ]** । **भ्र**मूच् । **शम**ष्टकाद् घिनण् ॥

**ऊससिरो** । **अ**नुत्साहोच्छन्ने० - ऊ ॥

**[ नमिरो ]** । नम् । **स्म्यज**सहिंसेति रः ॥

**[ गमिरो ]** । गम् । **शॄक**मगमेत्यादिना उकण् । शीलधर्मसाधुषु ॥ २.१४५ ॥

**क्त्वस्तुम-ऽत्-तूण-तुआणाः ॥ २.१४६ ॥**

**[ दट्ठुं ]** । दृशृं । **दृ**शस्तेन ट्ठ इति शस्य द्विरुक्तः ठः ॥

**[ मोत्तुं ]** । मुच्लृंती । **रु**दभुजमुचां तोऽन्त्यस्य - तः ॥

**[ भमिअ ]** । भ्रम् । **व्य**ञ्जनाद० । **ए**च्च क्त्वातुम्तव्य० ॥

**[ घेत्तूण ]** । ग्रहीश् । **क्त्वा**तुम्तव्येषु घेत् ॥

---

१. हेट्ठं - **मु.** । अमकारान्तनिर्देशो 'हेट्ठिट्ठियसूरनिवारणाय' इत्यादिसिद्ध्यर्थमेवं 'बाहिर' इत्य[त्राऽ]प्यभ्यूह्यम् - **ताटि.** ।

**[ काऊण ]** । कृग् । **आः** कृगो भूत० ॥

**वंदित्तुं**[1] । **मां**सादेर्वा - अनुस्वारलोपः[2] ॥

**कट्टु** । कृत्वा ॥ २.१४६ ॥

## इदमर्थस्य केरः ॥ २.१४७ ॥

**[ तुम्हकेरो ]** । युष्मदीय । **युष्मद्यर्थपरे** तः । **अन्त्यव्यं०** - दलुक् ॥

**[ पाणिणीआ ]** । पाणिनेरिमे च्छात्राः । **दोरीयः** ॥ २.१४७ ॥

## पर-राजभ्यां क्क-डिक्कौ च ॥ २.१४८ ॥

**[ पारक्कं ]** । परस्येदम् । **पर**जनराज्ञोऽकीयः । **अतः** समृद्ध्या० ॥ २.१४८ ॥

## युष्मदस्मदोऽञ एच्चयः ॥ २.१४९ ॥

**[ तुम्हेच्चयं ]** । **वा युष्म**दस्मदोऽञीनञौ युष्माकास्माकमित्याद्यञ् । **युष्मद्यर्थ**परे तः ॥ २.१४९ ॥

## वतेर्व्वः ॥ २.१५० ॥

**[ महुरव्व ]** । मथुरा[या]मिव [3]**तत्रे**ति वत्-प्रत्ययः ॥[4] २.१५० ॥

## सर्वाङ्गादीनस्येकः ॥ २.१५१ ॥

## पथो णस्येकट् ॥ २.१५२ ॥

**[ पहिओ[5] ]** । पान्थः । **विंशत्या**देर्लुक् ॥ २.१५२ ॥

## ईयस्याऽऽत्मनो [6]णयः [7]॥ २.१५३ ॥

## त्वस्य डिमा-त्तणौ वा ॥ २.१५४ ॥

**पीणदा**[8] । **तो** दोऽनादौ शौरसेन्याम्० ॥ २.१५४ ॥

---

१. वंदित्तुं - **क. ख. ग.** । **तै**लादौ - **ताटि.** । २. **विं**शत्यादेर्लुक् - **ताटि.** । ३. **स्यादे**रिवे - वत् - **क. ख.** । **तत्रे**ति वत् - **ताटि.** । ४. मतान्तरे इद(वा?)न्तः, स्वमते तु वत् - **दी.** । ५. (**ख.** प्रतौ साधनिकान्तरं - ) पथिन् । नित्यं पन्थानं वहति । **नित्यं** णः पन्थश्च - णप्र०, पन्थादेशः । वृद्धिः । अनेन इकट् । निमित्ताभावात् पुनः पथिन्रूप । **अन्त्य०** - नलोपः । **लुक्**- इलुक् । **ख**घथध० ॥ **ह्रस्वः** संयोगे । **विं**शत्यादे० - **ताटि.** । ६. आत्मीय । अनेन णय । **भ**स्मात्मनोः प० - त्म → प । **अ**नादौ - द्वित्वम् । **अन्त्य०** - नलुक् - **खटि.** । ७. त्मनोऽणयः - **ता.** । ८. पीनस्य भावः । पुष्पस्य भावः । **भावे** त्वतल् । **नो** णः । **ष्प**स्पयोः फः । अनेन । पीणदा - **क.** । पीनस्य भावः । पुष्पस्य भावः । **भावे** त्वतल् । **नो** णः । **डित्य०**- अलुक् । **वे**माञ्जल्याद्याः० - पुंस्त्वम् । पीणदा - **ख.** ।

## अनङ्कोठात् तैलस्य डेल्लः ॥ २.१५५ ॥

**[ अंकोलतेल्लं ]** । अङ्कोठ । **अङ्कोठे** ल्लः । अङ्कोठस्य स्नेहः । **तिला**दिभ्यः स्नेहे० - तैलप्रत्ययः । **तैला**दौ - द्वित्वम् ॥ २.१५५ ॥

## यत्-तदेतदोऽतोरित्तिअ, एतल्लुक् च ॥ २.१५६ ॥

## इदं-किमश्च डेत्तिअ-डेत्तिल-डेद्दहाः ॥ २.१५७ ॥

## कृत्वसो हुत्तं ॥ २.१५८ ॥

**[ हुत्तं ]** । अभिमुखार्था देशी ॥ २.१५८ ॥

## आल्विल्लोल्लालवन्तमन्तेत्तेरमणा मतोः ॥ २.१५९ ॥

**लज्जालुआ** । **स्वार्थे** कश्च वा ॥

**[ सोहिल्लो ]** । शोभावान् । **लु**गित्यादिलुक् ॥

**[ जामइल्लो ]** । यामवान् । बाहुलकाल्लुगित्यकारस्य न लुक् ॥

**मंसुल्लो** [1] । श्मश्रुवा(मा)न् । **आदेः** श्मश्रु० - शलुक् । **व**क्रादा० ॥

**[ जोण्हालो ]** । ज्योत्स्नावान् । **क**गटडेति तलुकि **सू**क्ष्मश्नष्णस्न० ॥

**हणुमंतो** [2] । उर्भ्रूहनूमत्० ॥

**[ सिरिमंतो ]** । श्रीमान् । **ई**श्रीह्री० - इः । **दीर्घ**ह्रस्वौ मिथो० ॥

**रेहिरो** । रेखावान् ॥

**[ धणी ]** । धनी । **शिखा**दिः ॥

**अत्थिओ** । अर्थोऽस्याऽस्ति । [3] **अतो**ऽनेकस्वरात् - इक-प्र० ॥ २.१५९ ॥

## त्तो-दो तसो वा ॥ २.१६० ॥

**एगदो** [4] । **अना**दौ स्वरादसंयुक्तानां कखतथपफां गघदधबभाः ॥

**कत्तो** । किम् । तस् । **किमः** कस्त्रतसोश्च ॥ २.१६० ॥

---

१. मांस । **मां**सादिष्व० - **ताटि.** । २. केचिदनजिरादौ वदन्ति - **ताटि.** । (**अन**जिरादि०-सूत्रस्याऽत्र सन्दर्भः ।) अनजिरादौ पठन्ति तन्मते दीर्घत्वं न । इह तु **उर्भ्रू**० - दी । **३. अर्था**ऽर्थान्ताद् भावादिति बलात् **अतो**ऽनेकस्वरात् - **दी.** । **४.** एकदो - मु. । एगदो - **ता.** । अनादौ स्वराद० - **ताटि.** ।

**त्रपो हि-ह-त्थाः ॥ २.१६१ ॥**

**वैकाद् दः सि-सिअं-इआ ॥ २.१६२ ॥**

**एक्कसिअं**[1] । **से**वादौ० ॥ २.१६२ ॥

**डिल्ल-डुल्लौ भवे ॥ २.१६३ ॥**

**गामिल्लिआ**[2] । ग्रामे भवाः । डिल्लः । **स्वार्थे**० - कः । आप् । **अस्या**ऽयत्तत्क्षिपका० ॥

**हेट्ठिल्लं** । **अ**धसो हेट्ठ ॥ २.१६३ ॥

**स्वार्थे कश्च वा ॥ २.१६४ ॥**

[ **धरणीहरपक्खुब्भंतयं** ] । धरतीधरपक्षोद्भ्रान्त ॥

[ **दुहिअए** ] । दुःखिते(त) । **दुः**खदक्षिणतीर्थे वा - हः ॥

[ **इहयं** ] । इहक । सि । बाहुलकाद् **वा** स्वरे मश्चेति सेर्म् ॥

**आलिद्धुयं**[3] । **ष्टस्या**ऽनुष्ट्रे० । **विंश**त्यादेर्लुक् । कः । सि । बाहुलकाद् **वा** स्वरे० ॥

[ **वतनके, वतनकं** ] । [4]वंदनक । **त**दोस्तः । **डे**म्मि ङेः । **अ**मोऽस्य ॥

[ **समप्पेत्तून** ] । समर्पि । क्त्वा । **क्त्व**स्तूनः । **णे**रदेदा० ॥

**मह** । अस्मद् । ङस् । **मे**मइममहमहं० ॥ २.१६४ ॥

**ल्लो नवैकाद् वा ॥ २.१६५ ॥**

**उपरेः संव्याने ॥ २.१६६ ॥**

[ **अवरिल्लो** ] । उपरि । **वो**परौ - अः । **पो** वः ॥

**अवरिं** । **व**क्रादावन्तः ॥ २.१६६ ॥

**भ्रुवो मया-डमया ॥ २.१६७ ॥**

[ **भुमया** ] । **उ**र्भ्रूहनूमत्० ॥ २.१६७ ॥

---

१. इक्कसिअं - **क. ग.** । २. ग्रामे भवाऽनेन डिल्लः । ततो **अ**जातेः पुंस इति ङीः । तदन्तात् **स्वार्थे** कः । ततो आपि **पा**नीयादित्वात् ईकारस्य इकारः - **ताटि.** । ३. आलेद्धुअं - **मु.** । ४. वन्दनक - **ग.** । वेदनक - **क. ख.** ।

**शनैसो डिअं ॥ २.१६८ ॥**

**मनाको न वा डयं च ॥ २.१६९ ॥**

**मिश्राड्डालिअः ॥ २.१७० ॥**

**[ मीसालिअं ]** । मिश्र । लुप्तयरव० ॥ २.१७० ॥

**रो दीर्घात् ॥ २.१७१ ॥**

**त्वादेः सः ॥ २.१७२ ॥**

**[ मउअत्तयाइ ]** । मृदुकत्वशब्दादनेन तल् ॥ २.१७२ ॥

**विद्युत्-पत्र-पीता-ऽन्धाल्लः ॥ २.१७३ ॥**

**पीवलं** । **पी**ते वो ले वा ॥ २.१७३ ॥

**गोणादयः ॥ २.१७४ ॥**

**गावीओ । जा**तेरयान्त० - ङी । जस् । **स्त्रि**यामुदोतौ वा - ओ ॥

**[ आऊ ]** । अप् । अनेन आउ । **ज**स्शसोर्लुक् । **ज**स्शस्ङसित्तोदो० - दीर्घः ॥

**[ पाडिसिद्धी ]** । प्रतिस्पर्द्धायाः पडिसिद्धि । **अ**तः समृद्ध्यादौ वा - आत्वम् । **अ**क्लीबे सौ - दीर्घः ॥

**[ भिमोरो ]**[1] । हिमस्य उरो मध्यं हिमोरः ॥

**गउओ** । गो । **ग**व्यउआअः - अउः । **स्वा**र्थे० - कः । सि → डो ॥

**आहित्थं** । चलितं कुपितमाकुलं च ॥

**लल्लक्कं** । भीषणम् ॥

**विड्डिर( रो? )** । आभोगः ॥

**पच्चड्डिअं** । क्षरितम् ॥

**उब्भेहडं** । उद्भटम् ॥

**मडप्फरो** । गर्वः ॥

१. शीतलः - **ताटि.** ।

**पड्डिच्छिरं** । सदृशम् ॥

**अट्टमट्टं** । आलमालम् ॥

**विहडप्फडो** । व्याकुलः ॥

**उज्जल्ल** । वेलामोदिका[1] ॥

**हल्लप्फल** । आनन्दः ॥

**अवयासइ** । अवकाशं ददाति ॥

[2]**फुंफुलइ** । टिरिटिरिं करोति फलति वा[3] ॥

**उप्फालेइ** । उत्पाटयति कथयति वा ॥

**विउसा** । विद्वस् । आर्षत्वाद् विउस । जस् । लुक् । **ज**स्शस्ङसि० - दीर्घः ॥

**पुणो** । पुनः । सिद्धः । **अ**तो डो० ॥ २.१७४ ॥

**अव्ययम् ॥ २.१७५ ॥**

**तं वाक्योपन्यासे ॥ २.१७६ ॥**

**आम अभ्युपगमे ॥ २.१७७ ॥**

**[ वणोली ]** । वनाली । **ओ**दाल्यां पङ्क्तौ ॥ २.१७७ ॥

**णवि वैपरीत्ये ॥ २.१७८ ॥**

**हा** । संस्कृतसिद्धः ॥ २.१७८ ॥

**पुणरुत्तं कृतकरणे ॥ २.१७९ ॥**

**अइ** । सम्भावने ॥

**सुप्पइ** । स्वप् । ते → इच् । क्य । **स**र्वत्र ल० । **स्व**पावुच्च । **ग**मादीनां द्वित्वम् । क्यलुक् च ॥

**[ पंसुलि ]** । पांसुल । **मां**सादिष्वनुस्वारे - अत्[4] । **अ**जातेः पुंसः - ङी । **लु**गित्यलुक् । सि । **ई**दूतौ ह्रस्वः । **अ**न्त्यव्यं० - सिलुक् ॥

**[ णीसहेहिं[5] ]** । निर्सह । **र्लु**कि निरः । भिस् । **भि**सो हिहिँहिं । **भि**स्भ्यस्सुपि - एत्वम् ॥ २.१७९ ॥

---

१. हठः - **ताटि.** । २. पंफुलइ - **ख.** । ३. चपलीभवति - **दी.** । ४. ह्रस्वः संयोगे - **ताटि.** । ५. णीसहेहिँ - **मु.** । णीसहेहिं - **ता.** ।

## हन्दि विषाद-विकल्प-पश्चात्ताप-निश्चय-सत्ये ॥ २.१८० ॥

**[ चलणे ]** । चरण । **ह**रिद्रादौ० ॥

**हुज्ज**[1] । भू । यात् । **अ**विति **हु:** । **व**र्त्तमानाभविष्यन्त्योश्च ज्जज्जा वा ॥

**[ एत्ताहे ]** । इदानीम् । **एण्हि**एत्ताहे इदानीमः ॥

**होही** । भू । **भु**वेर्होहुव० । स्यति । **त्या**दीनामिच् । **भ**विष्यति हिरादिः । बाहुलकात् **प**दयोः सन्धिर्वेत्येकपदेऽपि सन्धिः ॥

**भणिरी** । भण् । तृन् । **शी**लाद्यर्थस्येरः । **अ**जातेः पुंसः - ङी ॥

**सिज्जइ**[2] । स्विदांच् । **स्वि**दां ज्जः ॥

**[ तुह ]** । युष्मद् । ङस् । **त**इतुतेतुम्हंतुह० ॥ २.१८० ॥

## हन्द च गृहाणार्थे ॥ २.१८१ ॥

**पलोएसु** । लोकृण् प्रपूर्वः । पञ्चमी स्व । **दु**सुमु विध्यादिषु - सु । **व्य**ञ्जनाद० । **व**र्त्तमानापञ्चमीशतृषु वा - ए ॥

**[ इमं ]** । इदम् । अम् । **इ**दम इमः । **अ**मोऽस्य । **मो**ऽनुस्वारः ॥ २.१८१ ॥

## मिव-पिव-विव-व्व-व-विअ इवार्थे वा ॥ २.१८२ ॥

## जेण-तेण लक्षणे ॥ २.१८३ ॥

**गौणात्** समयेति द्वितीया ॥ २.१८३ ॥

## णइ-चेअ-चिअ-च्च अवधारणे ॥ २.१८४ ॥

**[ गईए ]** । गति । टा[3] । **टा**ङस्ङेरदादिदे० - ए दीर्घश्च ॥

**[ मउलणं ]** । मुकुलन । **उ**तो मुकुलादिष्वत् ॥

**[ लोअणाण[4] ]** । लोचन । आम् । **टा**आमोर्णः । **ज**स्शस्ङसित्तोदो० ॥

**[ ते ]** । तद् । **अ**न्त्यव्यं० । जस् । **अ**तः सर्वादेर्डेर्जसः ॥

**[ सुपुरिसा[5] ]** । पुरुष । **पु**रुषे रोः - इः ॥ २.१८४ ॥

---

१. भू । सप्तमी यात् । **व**र्त्तमानाभविष्य० । **भु**वेर्हो० । **म**ध्ये च स्वरान्ता० - **ताटि.** । २. सिध्यति प्र० - **ताटि.** । ३. ङस् - **ताटि.** । ४. लोअणाणं - **मु.** । लोअणाण - **ता.** । ५. सुवुरिसा - **ता.** ।

**बले निर्धारण-निश्चययोः ॥ २.१८५ ॥**

**किरेर-हिर किलार्थे वा ॥ २.१८६ ॥**

**[ कल्लं ]** । कल्य । ङि । **स**प्तम्या द्वितीया - अम् । **अ**मोऽस्य । **मो**ऽनुस्वारः ॥

**[ पिअवयंसो ]** । प्रियवयस्य । **व**क्रादा० ॥

**[ सिविणए ]** । स्वप्न । **इः** स्वप्नादौ । **स्व**प्ने नात् - इः ॥ २.१८६ ॥

**णवर केवले ॥ २.१८७ ॥**

**[ पिआइं ]** । प्रिय । जस् । **ज**स्शस इँ० ॥

**णिव्वडंति** । भू । **पृ**थक्स्पष्टे णिव्वडः[1] ॥ २.१८७ ॥

**आनन्तर्ये णवरि ॥ २.१८८ ॥**

**[ से ]** । तद् । ङस् । **वे**दन्तदेतदो ङसाभ्यां सेसिमौ ॥ २.१८८ ॥

**अलाहि निवारणे ॥ २.१८९ ॥**

**अण-णाइँ[2] नञर्थे ॥ २.१९० ॥**

**अमुणंती**[3] । ज्ञांश् । **ज्ञो** जाणमुणौ । शतृ । **श**त्रानशः । न्त । [4]**प्र**त्यये० - ङी ॥

**करेमि** । कृग् । मिव् । **तृ**तीयस्य मिः । **ऋ**वर्णस्याऽर् । **व्य**ञ्जनाद० । **व**र्त्तमानापञ्चमीशतृषु वा - ए ॥ २.१९० ॥

**[5]माइँ मार्थे ॥ २.१९१ ॥**

**काहीअ** । कृग् । दि । **सी**हीहीय भूतार्थस्य । **आः** कृगो० ॥ २.१९१ ॥

**हद्धी निर्वेदे ॥ २.१९२ ॥**

**धाह धाह** । धावूग् । पञ्चमी त । **म**ध्यमस्येत्थाहचौ - ह । **खाद**धावोर्लुक् । **भृशा**भीक्ष्ण्या-विच्छेदे द्विः० ॥ २.१९२ ॥

**वेव्वे भय-वारण-विषादे ॥ २.१९३ ॥**

**[ त्ति ]** । इति । **इतेः** स्वरात् तश्च द्विः - इलुक् द्विश्च ॥

---

१. निव्वड - **ग.** । २. णाइं - **मु.** । ३. नञ्पूर्वो ज्ञाधातुः - **ताटि.** । ४. अजातेः पुंसः - **ताटि.** । ५. माइं - **मु.** ।

**जूरणे** । खिदिंच् । **खि**देर्जूरविसूरौ । अनट् ॥

**उल्लाविरीइ** । उल्लपतीत्येवंशीला । तृन् । **शी**लाद्यर्थस्येरः । **स्व**राणां स्वरा - आत्वम् । **अ**जातेः पुंसः - ङी । स् । **टा**ङस्ङे० ॥

**[ वि ]** । अपि । **प**दादपेर्वा । **पो** वः ॥

**[ तुहं ]** । युष्मद् । ङस् । **त**इतुतेतुम्हं० ॥

**[ मयच्छि ]** । मृगाक्षी । **ऋ**तोऽत् । **ह्र**स्वः संयोगे । **छो**ऽक्ष्यादौ । **ई**दूतोर्ह्रस्वः । **अ**न्त्यव्यं० - सिलुक् ॥

**[ किं ]** । किम् । सि । **कि**मः किम् ॥

**[ णेयं ]** । ज्ञेय । **म्न**ज्ञोर्णः ॥

**[ उल्लावेंतीए ]** । उल्लापि । शतृ । **श**त्रानशः - न्त । **णे**रदेदा० - ए । **ङ**ञणनो० । टा । **टा**ङस्ङे० ॥

**जूरंतीए** । खिदिंच् । **खि**देर्जूरविसूरौ ॥

**उव्वाडिरीए** । वट परिभाषणे (धा. १०३१) उत्पूर्वः । तृन् । **शी**लाद्यर्थस्येरः । **स्व**राणां स्वराः । **अ**जातेः पुंसः - ङी ॥

**[ तीए ]** । तद् । **अ**न्त्यव्यं० । **किं**यत्तदोऽस्यमामि - ङी ॥

**विम्हरिमो** । विस्मृ । **वि**स्मुः पम्हुसविम्हरवीसराः । मस् । **तृ**तीयस्य मो० । **व्य**ञ्जनाद० । **इ**च्च मोमु० ॥ २.१९३ ॥

## वेव्व च आमन्त्रणे ॥ २.१९४ ॥

**[ गोले ]** । गोला । सि । **वा**प ए । **अ**न्त्यव्यं० - सिलुक् ॥

**[ वहसि ]** । वहीं । सिव् । **द्वि**तीयस्य सिसे ॥ २.१९४ ॥

## मामि-हला-हले सख्या वा ॥ २.१९५ ॥

**पणवह** । णमं । पञ्चमी त । **म**ध्यमस्येत्थाहचौ । **व्य**ञ्जनाद० । **रु**दनमोर्वः ॥

**[ माणस्स ]** । मान । अम् । **क्व**चिद् द्वितीयादेः - ङस् । **ङ**सः स्सः ॥

**[ एरिसि च्चिअ ]** । ईदृशी । **एत्** पीयूषापीड० । **दृशः** क्विप्टक्सकः - रिः ॥ **णइ** चेअ० । **सेवादौ** वा । **ह्रस्वः** सं० ॥ २.१९५ ॥

## दे संमुखीकरणे च ॥ २.१९६ ॥

**[ पसिअ ]** । प्रसीद । **पा**नीयादिष्वित् ॥

**आ** इति वाक्यालङ्कारे ॥ २.१९६ ॥

## हुं दान-पृच्छा-निवारणे ॥ २.१९७ ॥

[१]**गेण्ह** । ग्रहीश् । **ग्रहो** बलगेण्ह० । हि । **दुसुमु** विध्यादिषु - सु । **व्यञ्ज**नाद० । **अत** इज्जस्विज्जहिज्जेलुको वा ॥

**[ अप्पणो ]** । **स्वय**मोऽर्थे अप्पणो नवा ॥

**साहसु** । कथण् । **क**थेर्वज्जरपज्जरोप्पाल० - साह । हि । **दुसुमु**० । **व्यञ्ज**नाद० ॥

**समोसर** । समपसर । **अ**वापोते - ओ ॥ २.१९७ ॥

## हु-खु निश्चय-वितर्क-सम्भावन-विस्मये ॥ २.१९८ ॥

**[ णवरं ]** । **ण**वर केवले । **व**क्रादावन्तः ॥

**[ संगहिआ ]** । सङ्गृहीता । **पा**नीयादिष्वित् ॥

**तरिउं** । शकृंट् । **श**केश्चयतरतीर० । तुम् । **व्यञ्ज**नाद० । **ए**च्च क्त्वातुम्० ॥

**[ इमं ]** । इदम् । **इ**दम इमः[२] ॥

**[ को ]** । किम् । सि । **किमः** कस्त्रतसोश्च ॥ २.१९८ ॥

## ऊ गर्हा-ऽऽक्षेप-विस्मय-सूचने ॥ २.१९९ ॥

**मए** । अस्मद् । टा । **मि**मेममंममएममाइमइ० ॥

**कह** । कथम् । **मां**सादेर्वा ॥

**अहयं** । **अस्मदो** म्मिअम्मिअम्हिहंअहयं सिना ॥ २.१९९ ॥

---

१. गिण्ह - **ग.** । २. ०इमः । आप् । ह्रस्वोऽमि । केवलमिमां नदीं तरितुं न सम्भावयामीत्यर्थः- **ख.** ।

## थू कुत्सायाम् ॥ २.२०० ॥

## रे-अरे सम्भाषण-रतिकलहे ॥ २.२०१ ॥

**मडहं**[१] । तुच्छम् । देश्योऽयम् ॥

**[ सरिआ ]** । सरित् । **स्त्रि**यामादविद्युतः ॥

**मए** । अस्मद् । टा । **मि**मेममंममए० ॥

**करेसु** । कृग् । हि । **दुसुमु** विध्या० । **ऋ**वर्णस्याऽर् । **व्य**ञ्जनाद० । **व**र्त्तमानापञ्चमीशतृषु वा - ए ॥ २.२०१ ॥

## हरे क्षेपे च ॥ २.२०२ ॥

**[ पुरिसा ]** । पुरुष । **पुरुषे** रोः । सि[२] । **डो**दीर्घौ वा । **अन्**त्यव्यं० - सिलुक् ॥ २.२०२ ॥

## ओ सूचना-पश्चात्तापे ॥ २.२०३ ॥

**[ अविणयतत्तिल्ले ]** । अविनयतप्तिमत् । **आ**ल्विल्लोल्लालेति इल्ल । **लु**गिति इलुक् । आप् । सि । **वा**प ए । **अन्**त्यव्यं० - सिलुक् ॥

**इत्तिआए** । एतावत् । **य**त्तदेतदोऽतोरित्तिअ एतल्लुक् च । आप् । **टा**ङस्ङे० ॥

**[ ओ ]** । उत । सिद्धः । **अ**वापोते ॥

**विरएमि** । रचण् । णिच् । मिव् । **तृ**तीयस्य मि । **णे**रदेदा० । **व**र्त्तमानापञ्चमीशतृषु वा - ए ॥

**[ नह० ]** । नभस्० । **अन्**त्यव्यं० ॥ २.२०३ ॥

## अव्वो सूचना-दुःख-सम्भाषणा-ऽपराध-विस्मया-ऽऽनन्दा-ऽऽदर-भय-खेद-विषाद-पश्चात्तापे ॥ २.२०४ ॥

**[ किमिणं ]** । किम् । सि । **किमः** किम् । इदम् । सि । **क्ली**बे स्यमेदमिण० । **वा** स्वरे मश्च ॥

**[ तह ]** । तथा । **वा**ऽव्ययोत्खातादा० ॥

**[ वि ]** अपि । सिद्धः । **प**दादपेर्वा । **पो** वः ॥

**वेसा** । द्वेष्याः ॥

---

१. मडहं । अल्प । **गो**णादयः - मडह आदेशः - **क.** । २. आमन्त्रणे सि - **ख.** ।

**[ अज्जम्ह ]** । अद्य । **द्य**य्ययां जः । अम्ह । अस्मद् । **णे**णोमज्झअम्ह० । **त्य**दाद्यव्ययात् तत्स्वरस्य लुक् इति अकारलुक् ॥

**[ सप्फलं ]** । सफल । **स**मासे वा ॥

**[ जीअं ]** । जीवित । **या**वत्तावज्जीवितावर्त्तमानेति वलुक् ॥

**[ अइअंमि ]** । अतीत । **पा**नीयादिष्वित् ॥

**तुमे** । [युष्मद् । ङि] **तु**मेतुमएतुमाइ० ॥

**जूरिहिइ** । खिदिंच् । **खि**देर्जूरविसूरौ । स्यते । **त्या**दीनामिच् । **भ**विष्यति हिरादिः । **व्य**ञ्जनाद० । **ए**च्च क्त्वातुम्तव्य० ॥

**[ छित्तं[१] ]** । क्षेत्र । **छो**ऽक्ष्यादौ[२] । **ह्र**स्वः संयोगे ॥

**नासेंति** । नाशि । अन्ति । **ब**हुष्वाद्यस्य० - न्ति । **णे**रदेदा० ॥

**दिहिं** । **धृ**तेर्दिहिः ॥

**वड्ढेंति** । वृधूङ् । णिग् । गुण: । **क्व**थवर्धां ढः । **णे**रदेदा० ॥

**देंति** । दांग्क् । **स्व**राणां स्वराः - ए: ॥

तस्स एव । **लु**गित्यलुकि **तस्सेअ** ।

**[ ते ]** । तद् । **अ**न्त्यव्यं० । जस् । **अ**तः सर्वादेर्डे० ॥

**कह** । कथम् । **मां**सादेर्वा ॥

**[ तह ]** । तथा । **वा**ऽव्ययोत्खातादा० ॥

**[ कस्स ]** । किम् । ङस् । **कि**मः कस्त्रतसोश्च । **ङ**सः स्सः ॥

**[ साहेमि ]** । **क**थेर्वज्जरपज्जरो० । मिव् । **तृ**तीयस्य मिः । **व्य**ञ्जनाद० । **व**र्त्तमानापञ्चमीशतृषु वा - ए ॥ २.२०४ ॥

## अइ सम्भावने ॥ २.२०५ ॥

**[ दिअर ]** । देवर । **ए**त इद्वा वेदनाचपेटा० ॥

**पेच्छसि । दृ**शो निअच्छपेच्छा० ॥ २.२०५ ॥

---

१. छेत्तं - मु. ता. । २. क्षः खः क्वचित्तु छझौ - दी. ।

**वणे निश्चय-विकल्पा-ऽनुकम्प्ये च ॥ २.२०६ ॥**

**देमि** । दांग्क् । मिव् । **स्वराणां स्वराः** - ए ॥

**[ मुच्चइ ]** । मुच्यते । मुच्लृंती । ते → इच् । क्य । **गमादीनां** द्वित्वं क्यलुक् ॥

**[ नत्थि ]** । न । अस्ति । **अत्थिस्त्यादिना** । **लुगि[ति]** अकारलुक् ॥ २.२०६ ॥

**मणे विमर्शे ॥ २.२०७ ॥**

**अम्मो आश्चर्ये ॥ २.२०८ ॥**

**पारिज्जइ** । **शकेश्चयतरतीरपाराः** । ईयइज्जौ क्यस्य ॥

**स्वयमोऽर्थे अप्पणो न वा ॥ २.२०९ ॥**

**विसयं**[1] । विशदम्[2] ॥

**[ करणिज्जं ]** । करणीय । **वोत्तरीयानीयतीयकृद्ये** ज्जः ॥ २.२०९ ॥

**प्रत्येकमः पाडिक्कं-पाडिएक्कं ॥ २.२१० ॥**

**उअ पश्य ॥ २.२११ ॥**

**इहरा इतरथा ॥ २.२१२ ॥**

**[ नीसामन्नेहि ]**[3] । निर्सामान्य । **अन्त्यव्यं०** । **र्लुकि** निरः । **भिसो** हिहिँ० । **भिस्भ्यस्सुपि** ॥ २.२१२ ॥

**एक्कसरिअं झगिति-सम्प्रति ॥ २.२१३ ॥**

**मोरउल्ला मुधा ॥ २.२१४ ॥**

**दराऽर्धा-ऽल्पे ॥ २.२१५ ॥**

**किणो प्रश्ने ॥ २.२१६ ॥**

**धुवसि** । धूग्ट् । **धूगेर्धुवः** । सिव् । **द्वितीयस्य** सिसे । **व्यञ्जनाद०** ॥ २.२१६ ॥

---

१. क्रियाविशेषणं - **ताटि.** । २. (कमलसरा इत्यत्र) कमलसरस् । **अन्त्यव्यं०** - सलुक् । **स्नमदामशिरोनभः** - पुंस्त्वम् । **जस्शसोर्लुक्** । **जस्शस्ङसीति** दीर्घः - **खटि.** । ३. नीसामन्नेहिँ - **मु.** ।

## इ-जे-राः पादपूरणे ॥ २.२१७ ॥

**[ न उणा ]** । न पुनर् । **ना**त् पुनर्यादाई वा ॥

**[ अच्छीइं ]** । अक्षि । **छो**ऽक्ष्यादौ । **ज**स्शस इँइं० ॥

**वोत्तुं** । वचंक् वचने । तुम् । **व**चो वोत् ॥

**गेण्हइ** । **ग्र**हो बलगेण्ह० ॥ २.२१७ ॥

**॥ इति श्रीमलधारिशिष्य-पण्डितनरचन्द्रविरचिते प्राकृतप्रबोधे द्वितीयः पादः ॥**

卐 卐 卐

## ॥ तृतीयः पादः ॥

### वीप्स्यात् स्यादेर्वीप्स्ये स्वरे मो वा ॥ ३.१ ॥

**एक्केक्कं** । **प्लुप्** चादावेकस्य स्यादेर्द्वित्वं स्यादिलुक् च । **से**वादौ वा - द्वित्वम् ॥ ३.१ ॥

### अतः सेर्डोः ॥ ३.२ ॥

### वैतत्-तदः ॥ ३.३ ॥

**[ एस ]** । एतद् ।[1] **त**दश्च तः सो० ॥ ३.३ ॥

### जस्-शसोर्लुक् ॥ ३.४ ॥

**वच्छे** । **टा**णशस्येत् ॥ ३.४ ॥

### अमोऽस्य ॥ ३.५ ॥

### टा-आमोर्णः ॥ ३.६ ॥

**वच्छाण** । **ज**स्शस्ङसित्तोदो० ॥ ३.६ ॥

### भिसो हि-हिँ-हिं ॥ ३.७ ॥

**[ छाही ]** । छाया । **छा**यायां होऽकान्तौ वा । **छा**याहरिद्रयोर्डी । **लु**गित्यालुक् ॥ ३.७ ॥

### ङसेः त्तो-दो-दु-हि-हिंतो-लुकः ॥ ३.८ ॥

**[ वच्छत्तो ]** । **ज**स्शस्ङसित्तोदो० । **ह्र**स्वः संयोगे ॥ ३.८ ॥

---

१. **[ एसो ]** एतद् । **अ**न्त्येति दलोपः । तस्य स । **अ**तः सेर्डो । पक्षे - **अ**न्त्येति सिलुक् । एवं तच्छब्दस्याऽपि । **वै**सेणमिणमो सिना - अनेन एस इति रूपे सिद्धे यद् एतद्-ग्रहणं तदेवं ज्ञापयति - **वै**सेणमिणमो इति सूत्रे एस-रूपं प्रायिकम्; तेन एसा महीत्यादि प्रयोक्तव्यम् - **क.** ।

**भ्यसः त्तो-दो-दु-हिंतो-सुंतो ॥ ३.९ ॥**

सर्वत्र **भ्य**सि वेति दीर्घः, **भि**स्भ्यस्सुपि - एत्वम् ॥

**वच्छत्तो** । ह्रस्वः सं० ॥ ३.९ ॥

**ङसः स्सः ॥ ३.१० ॥**

**[ पेम्मस्स ]** । प्रेमन् । **तै**लादौ ॥

**[ सीअलत्तणं ]** शैत्यमित्यर्थकथनम् । प्रकृतिस्तु शीतलत्वम् । **त्व**स्य डिमात्तणौ वा ॥ ३.१० ॥

**डे-म्मि ङेः ॥ ३.११ ॥**

**जस्-शस्-ङसि-त्तो-दो-द्वामि दीर्घः ॥ ३.१२ ॥**

**भ्यसि वा ॥ ३.१३ ॥**

**टाण-शस्येत् ॥ ३.१४ ॥**

**[ अप्पणा, अप्पणिआ, अप्पणइआ ]** । आत्मन् । टा । **पुं**स्यन इत्यतिदेशात् **टा** णा वा । **आ**त्मनष्टो णिआणइआ ॥ ३.१४ ॥

**भिस्-भ्यस्-सुपि ॥ ३.१५ ॥**

**इदुतो दीर्घः ॥ ३.१६ ॥**

**शेषे**ऽदन्तवदिति न्यायात् - इदुदन्तादिति[१] **भि**सो हि[हिँ]हिमित्यादयः ॥

**ठिअं**[२] । **स्थ**ष्ठाथक्कचिट्ठनिरप्पाः । क्ते **स्व**रादनतो वा । **क्ते** - इ । **लु**गित्यालुक् ॥[३]

**[ दिअभूमिसु ]** । द्विजभूमिषु । द्विजा- ब्राह्मणा एव सुकृतबीजप्ररोहहेतुत्वाद् भूमय इव तासु ॥

**[ दाणजलोल्लिआइं ]** । दानजल-आर्द्रितानि । **उदो**द् वार्द्रे । **लु**गिति लकारा-ऽकारलुक् । **ह**रिद्रादौ लः । **तै**लादौ - द्वित्वम् ॥

**[ गिरिं ]** । गिरि । अम् । **शेषे**ऽदन्तवद् न्यायात् **अमो**ऽस्य ॥ ३.१६ ॥

---

१. (**भि**सो हिहिँहिमित्यादिषु 'अतः' इत्येव नियमः । तत्र 'अतः' स्थाने 'इदुदन्ता'दिति **शेषे**ऽदन्तवदित्यनेन स्थाप्यते इतीह भावः ।) २. ठियं - **ग.** । ३. (स्था + क्त → ठा + क्त → ठाअ + क्त → ठाइ + क्त → ठि + क्त → ठिअं - इतीह प्रक्रिया ।)

## चतुरो वा ॥ ३.१७ ॥

## लुप्ते शसि ॥ ३.१८ ॥

**गिरिणो** । **ज**स्‌शसोर्णो वा ॥

णवि[१] प्रतिषेधो **न** दीर्घो णो इत्यनेन ॥ ३.१८ ॥

## अक्लीबे सौ ॥ ३.१९ ॥

## पुंसि जसो डउ-डओ वा ॥ ३.२० ॥

**अग्गी** । लुप्ते शसि - दीर्घः ॥ ३.२० ॥

## वोतो डवो ॥ ३.२१ ॥

पक्षे **[ साहओ, साहउ, साहू, साहुणो ]** । क्रमेण **पुं**सि जसो डउ-डओ वा, **ज**स्‌शसोर्लुक्, **ज**स्‌शसोर्णो वा ॥ ३.२१ ॥

## जस्-शसोर्णो वा ॥ ३.२२ ॥

**रेहंति** । राजेरग्घछज्ज० ॥ ३.२२ ॥

## ङसि-ङसोः पुं-क्लीबे वा ॥ ३.२३ ॥

**भ्यस**श्च हिः, **ङ**सेर्लुगिति हि-लोपनिषेधः ।

**गिरिणा** । **टो** णा ॥

**बुद्धीअ** । **टा**ङस्ङेरदादिदेदिति अः दीर्घश्च ॥ ३.२३ ॥

## टो णा ॥ ३.२४ ॥

**[ गामणिणा ]** । ग्रामणी । **क्विप** इति ह्रस्वः ॥

**दहिं** । **क्ली**बे स्वरान् म् सेः ॥ ३.२४ ॥

## क्लीबे स्वरान् म् सेः ॥ ३.२५ ॥

**[ पेम्मं ]** । प्रेमन् । **तै**लादौ ॥ ३.२५ ॥

---

१. णवि अदन्त इति न्यायेन (**शेषे**ऽदन्तवदिति) **ज**स्‌शसेत्यादिना दीर्घस्तु प्राप्तोऽपि **न** दीर्घो णो इत्यनेन निषेत्स्यते लक्षानुरोधार्थः इति प्रयोगाननुसृत्य शसौ न सर्वत्र दीर्घत्वं, किन्तु यथादर्शनं क्वचिद् दीर्घत्वं क्वचिदेवं चेत्यर्थः - **खटि.**।

## जस्-शस इँ-इं-णयः सप्राग्दीर्घाः ॥ ३.२६ ॥

**अम्हे** । **अम्ह**अम्हेअम्हो० ॥

**जेम** । भुजंप् । **भु**जो भुंजजिमजेम० । पञ्चमी सु । **दु**सुमु० - सु । **व्य**ञ्जना० । **अत** इज्जस्विज्जहीज्जे - लुक् ॥

**हुंति** । **अ**विति हुः ॥ ३.२६ ॥

## स्त्रियामुदोतौ वा ॥ ३.२७ ॥

पक्षे **ज**स्शसोर्लुक्, **ज**स्शस्ङसित्तोदोद्वामि दीर्घः ॥ ३.२७ ॥

## ईतः सेश्चा वा ॥ ३.२८ ॥

**हसंती**[१] । **प्र**त्यये ङी० ॥

**गोरीओ** । गौरी । **औ**त ओत् । जस् । **स्त्रि**यामुदोतौ वा ॥ ३.२८ ॥

## टा-ङस्-ङेरदादिदेद्, वा तु ङसेः ॥ ३.२९ ॥

[ **मुद्धिआअ** ] । मुग्धा । क । **इच्चा**ऽपुंसोऽनित्क्याप्परे - इः ॥

**विहवो** । विभवः ॥ ३.२९ ॥

## नाऽऽत आत् ॥ ३.३० ॥

## प्रत्यये ङीर्न वा ॥ ३.३१ ॥

**साहणी** । साध्यतेऽनया । **कर**णाधारे - अनट् ॥

**कुरुचरी** । कुरुषु चरति । **चरेष्टः** ॥ ३.३१ ॥

## अजातेः पुंसः ॥ ३.३२ ॥

**सुप्पणही** । सूर्पनखा ॥

**इमीइ** । **इ**दम इमः । **टा**ङस्ङेरदा० ॥

**इमीणं** । **टा**आमोर्णः । **क्त्वा**स्यादेर्णस्वोर्वा ॥ ३.३२ ॥

---

१. अजातेः पुं० - **ताटि.** ।

## किं-यत्-तदोऽस्यमामि ॥ ३.३३ ॥

**कं, जं, तं** । **ह्रस्वो**ऽमि ॥ ३.३३ ॥

## छाया-हरिद्रयोः ॥ ३.३४ ॥

**[ छाही ]** । **छा**यायां होऽकान्तौ वा ॥

**[ हलद्दी ]** । हरिद्रा । **ह**रिद्रादौ लः । **प**थिपृथिवीप्रतिश्रुत्० ॥ ३.३४ ॥

## [1]स्वस्रादेर्डा ॥ ३.३५ ॥

**गउआ**[2] । **ग**व्यउआअः । * अथवा गवय । **ग**वये व उः ॥ ३.३५ ॥

## ह्रस्वोऽमि ॥ ३.३६ ॥

## नाऽऽमन्त्र्यात् सौ मः ॥ ३.३७ ॥

सर्वे**ष्व**न्त्यव्यं० - सिलुक् ॥ ३.३७ ॥

## [3]डो-दीर्घौ वा ॥ ३.३८ ॥

**दोण्णि** । द्वि । औ । **द्वि**वचनस्य बहुवचनम् । **दु**वे दोण्णि बेण्णि च जस्शसा ॥

**[ पहू ]** । प्रभु । सि । **अ**न्त्यव्यं० । **अ**क्लीबे सौ - दीर्घः ॥

**[ जिअलोए ]** । जीवलोक । **पा**नीयादिष्वित् ॥

**[ चप्फलया ]** । मिथ्यावादक । **गो**णादयः - चप्फल ॥

**[ निग्घिणया ]** । निर्घृण **स्वार्थे**० - कः ॥ ३.३८ ॥

## ऋतोऽद् वा ॥ ३.३९ ॥

**पिअरं**[4] । **ना**म्न्यरं वा ॥

**दायार** । **आ**रः स्यादौ ॥ ३.३९ ॥

## नाम्न्यरं वा ॥ ३.४० ॥

**कत्तार** । **आ**रः स्यादौ ॥ ३.४० ॥

---

१. स्वस्रा० । **दुहिआसुओ** । दुहितरि दुहितुः सकाशात् वा सुतः । अन्यथा षष्ठ्या लुक् न स्यात् संस्कृते **ऋतां** विद्यायोनि-सम्बन्धे । आत्वं प्राकृते अनेन । गउआ - **क.ख.** । २. गो । क प्र० । **गव्यउआअ** - **ताटि.** । ३. **डो**दीर्घो वा - **मु.** । **डो**दीर्घौ वा - **ता.** । ४. पियरं - **ग.** ।

## वाऽऽप ए ॥ ३.४१ ॥

**पज्जिए** । प्राजिका[1] ॥

**[ पिउच्छा ]** । पितृस्वसृ । **गौणान्त्यस्य** - उः ।[2] **मातृपितुः** स्वसुः सिआच्छौ ॥

**अम्मो** । अम्ब । **सर्वत्र** लव० ॥

**भणामि** । **मौ** वा - दीर्घः ॥ ३.४१ ॥

## ईदूतोर्ह्रस्वः ॥ ३.४२ ॥

## क्विपः ॥ ३.४३ ॥

## ऋतामुदस्यमौसु वा ॥ ३.४४ ॥

[3]**भत्तओ** । **पुंसि** जसो डउडओ वा ॥

**भत्तारा** । **आरः** स्यादौ ॥

ङसि - **भत्तुणो** । **ङसिङसोः** पुंक्लीबे वा - णो ॥

**भत्तूसु** । **इदुतो** दीर्घः ॥

**पिऊहिं** । **इदुतो** दीर्घः ॥

**पिआ** । **आ** सौ नवा ॥

**पिअरं** । **नाम्यरः** ॥ ३.४४ ॥

## आरः स्यादौ ॥ ३.४५ ॥

## आ-अरा मातुः ॥ ३.४६ ॥

[4]**माआओ** । जस् । **स्त्रियामुदोतौ** वा ॥

**माअं** । **ह्रस्वोऽमि** ॥

**माअराण** । **चतुर्थ्याः** षष्ठी ॥

**[ माइदेवो ]** । मातृदेव[5] । **मातुरिद्** वा ॥ ३.४६ ॥

---

१. प्रार्यिका - **क.** । पद्यिका प्रार्यिका वा प्र० - **ताटि.** । २. ०स्य उः । **स्वस्रादेर्डा** । **मातृ०** - **ख.** । ३. ऋता० । भत्तउ, भत्तओ । पुंसि० - **क.ख.** । ४. आअ० । माआउ । माआओ - **क.ख.** । ५. मातुर्देव - **क.दी.** ।

**नाम्न्यरः ॥ ३.४७ ॥**

**आ सौ न वा ॥ ३.४८ ॥**

**राज्ञः ॥ ३.४९ ॥**

पक्षे **पुंस्यन** आण० ॥

**हे रायं** । **मो** वा - नस्य मः ॥ ३.४९ ॥

**जस्-शस्-ङसि-ङसां णो ॥ ३.५० ॥**

**रायाणो** । **ज**स्‌शस्ङसित्तोदोद्वामि दीर्घः ॥

**राइणो** । **इ**र्जस्य णोणाङौ ॥

**रण्णो** । **आ**जस्य टाङसिङस्सु सणाणोष्वण् ॥ ३.५० ॥

**टा णा ॥ ३.५१ ॥**

**इर्जस्य णो-णा-ङौ ॥ ३.५२ ॥**

**इणममामा ॥ ३.५३ ॥**

**राईणं** । **ई**द् भिस्भ्यसाम्सुपि - ई । **क्त्वा**स्यादेर्ण० ॥ ३.५३ ॥

**ईद् भिस्-भ्यसाम्-सुपि ॥ ३.५४ ॥**

पक्षे **पुंस्यन**० ॥ ३.५४ ॥

**आजस्य टा-ङसि-ङस्सु स-णाणोष्वण् ॥ ३.५५ ॥**

**पुंस्यन आणो, राजवच्च ॥ ३.५६ ॥**

**अप्पाणकयं** । आत्मना कृतमात्मकृतम् ॥

**अप्पाणो चिट्ठंति पेच्छ** वा । **ज**स्शस्ङसिङसां णो ॥

**गावाणो** । ग्रावन् ॥

**निएइ** । **दृ**शो नियच्छपेच्छेति निअ । **व**र्तमानापञ्चमीशतृषु वा - ए ॥

**[ सुकम्माणो[१] ]** । सुकर्मन् । **अन्त्यव्यं॰** - लुक् । शस् । **ज**स्शस्ङसिङसां णो । **ज**स्शस्ङसि॰ - दीर्घः ॥ ३.५६ ॥

**आत्मनष्टो णिआ-णइआ ॥ ३.५७ ॥**

**पाउसे[२]** । प्रावृष् । **उदृत्वादौ** । **दिक्प्रावृषोः** सः ॥

**[ विअड्डि-खाणिआ ]** । वितर्दिश्चाऽऽसौ खानिता च । प्राकृतत्वाद्[३] विशेष्यस्याऽपि प्राग्निपातः । **संमर्दवितर्दीति** **ड्डः** ॥ ३.५७ ॥

**अतः सर्वादेर्डेर्जसः ॥ ३.५८ ॥**

**एक्के** । **से**वादौ ॥

**सव्वाओ** । **स्त्रिया**मुदोतौ वा ॥

**रिद्धीओ** । **रिः** केवलस्य ॥ ३.५८ ॥

**ङेः स्सि-म्मि-त्थाः ॥ ३.५९ ॥**

**अमुम्मि** । **डे**म्मि ङेः । **मुः** स्यादौ ॥ ३.५९ ॥

**न वाऽनिदमेतदो हिं ॥ ३.६० ॥**

**इमस्सि** । **इदम** इमः ॥ ३.६० ॥

**आमो डेसिं ॥ ३.६१ ॥**

**किं-तद्भ्यां डासः ॥ ३.६२ ॥**

**किं-यत्-तद्भ्यो ङसः ॥ ३.६३ ॥**

**ईद्भ्यः स्सा-से ॥ ३.६४ ॥**

**किं**यत्तदोऽस्यमामीति सर्वत्र ङी ॥ ३.६४ ॥

**ङेर्डाहे-डाला-इआ काले ॥ ३.६५ ॥**

**जाअंति** । **ज**नो जाजम्मौ । **स्व**रादनतो वा ॥

---

१. सुकम्माणे - **मु.** । सुकम्माणो - **ता.** । २. पाउसो - **ग.** । ३. प्राकृतशब्दत्वाद् - **ग.** ।

**ते** । **अतः** सर्वादेर्डे० ॥

**[ सहिअएहि ]** । सहृदय । **इत्** कृपादौ ॥

[1]**घेप्पंति** । **ग्रहेर्घेप्पः**[2], क्यलुक् च ॥

**कहिं** । **किमः** कस्त्रतसोश्च । **न**वाऽनिदमेतदो हिं - ङेर्हिं ॥

**[ कस्सि, कम्मि, कत्थ ]**[3] । **ङेः** स्सिम्मित्थाः ॥ ३.६५ ॥

**ङसेर्म्हा ॥ ३.६६ ॥**

**तदो डो[4] ॥ ३.६७ ॥**

**किमो डिणो-डीसौ ॥ ३.६८ ॥**

**इदमेतत्-किं-यत्-तद्भ्यष्टो डिणा ॥ ३.६९ ॥**

**तदो णः स्यादौ क्वचित् ॥ ३.७० ॥**

**[ सोअइ अ ]** । शोचति च ॥

**तो** । तद् । ङसि । **त**दो डो ॥ ३.७० ॥

**किमः कस्त्र-तसोश्च ॥ ३.७१ ॥**

**कत्थ** । **त्र**पो हिहत्थाः ॥

**कओ** । **अ**तो डो विसर्गस्य ॥

**कत्तो, कदो** । **त्तो**दो तसो वा ॥ ३.७१ ॥

**इदम इमः ॥ ३.७२ ॥**

**इमे** । **अतः** सर्वादेर्डे० ॥

**इमे** । **जस्**शसोर्लुक् । **टा**णशस्येत् ॥ ३.७२ ॥

**पुं-स्त्रियोर्न वाऽयमिमिआ सौ ॥ ३.७३ ॥**

**[ वाणिअधूआ ]** । वणिगेव वाणिजः, **प्रज्ञा**द्यण् । **दुहितृभगिन्योर्धू**आ० ॥ ३.७३ ॥

---

१. घिप्पंति - **ग.** । २. ०घिप्पः - **ग.** । ३. शेषेसु ङेः स्सिं० - **क.ख.** । ४. तदो डोः - **मु.** ।

**स्सिं-स्सयोरत् ॥ ३.७४ ॥**

**ङेः** स्सिम्मित्थाः । **ङसः** स्सः ॥ ३.७४ ॥

**ङेर्मेन हः ॥ ३.७५ ॥**

**न त्थः ॥ ३.७६ ॥**

**णोऽम्-शस्-टा-भिसि ॥ ३.७७ ॥**

**अमेणम् ॥ ३.७८ ॥**

**क्लीबे स्यमेदमिणमो च ॥ ३.७९ ॥**

**किमः किं ॥ ३.८० ॥**

**तुह** । **त**इतुतेतुम्हंतुहतुहं ॥

**[ पडिहा ]** । प्रतिभा ॥

अतियोगे **गौणा**त्समयेत्यादिशब्दात् किमो द्वितीया ॥ ३.८० ॥

**वेदं-तदेतदो ङसाम्भ्यां से-सिमौ ॥ ३.८१ ॥**

**इमेसिं** । **इदम इमः** । **आमो** डेसिं ॥ ३.८१ ॥

**वैतदो ङसेस्त्तो-ताहे ॥ ३.८२ ॥**

**एत्तो** । **त्थे** च तस्य लुक् ॥ ३.८२ ॥

**त्थे च तस्य लुक् ॥ ३.८३ ॥**

**एत्थ** । **ङेः** स्सिम्मित्थाः ॥ ३.८३ ॥

**एरदीतौ म्मौ वा ॥ ३.८४ ॥**

**वैसेणमिणमो सिना ॥ ३.८५ ॥**

**तदश्च तः सोऽक्लीबे ॥ ३.८६ ॥**

**वाऽदसो दस्य हो, नोदाम् ॥ ३.८७ ॥**

**अह णे हिअएण** । **अम्हे**अम्होअम्हणे शसा ॥

**अमू** । **मुः** स्यादौ । **अ**क्लीबे सौ ॥ ३.८७ ॥

## मुः स्यादौ ॥ ३.८८ ॥

**अमुणो** । **ज**स्शसोर्णो वा ॥

[१]**अमूओ** । **स्त्रि**यामुदोतौ वा ॥

**अमूहि** । **इ**दुतो दीर्घः ॥

**अमुणो** । **ङ**सिङसोः पुंक्लीबे वा - णो ॥

**अमूसु** । **इ**दुतो दीर्घः ॥ ३.८८ ॥

## म्मावयेऔ वा ॥ ३.८९ ॥

## युष्मदस्तं-तुं-तुवं-तुह-तुमं सिना ॥ ३.९० ॥

## भे-तुब्भे-तुब्भं[२]-तुम्ह-तुय्हे-उय्हे जसा ॥ ३.९१ ॥

**चिट्ठह** । पञ्चमी त । **ब**हुषु न्तुहमो ॥[३]

एवं चाऽऽष्टरूप्यम् । अष्टावेव रूपाणि, न तु दश । यतो तुब्भ इत्यत्र **ब्भो** म्हज्झौ वेति न प्रवर्तते, अत्र सूत्रे तुम्ह इति पृथग्गणनात् । यदि ङ्यादेशो भविष्यति[४] तदा तुम्ह इति ॥ ३.९१ ॥

## तं-तुं-तुमं-तुवं-तुह-तुमे-तुए अमा ॥ ३.९२ ॥

**वंदामि** । वदुङ् । नोऽन्तः[५] । ए । **तृ**तीयस्य मिः । **व्य**ञ्जनाददन्ते । **मौ** वा ॥ ३.९२ ॥

## वो-तुब्भं[६]-तुब्भे-तुय्हे-उय्हे-भे शसा ॥ ३.९३ ॥

## भो-दि-दे-ते-तइ-तए-तुमं-तुमइ-तुमए-तुमे-तुमाइ टा ॥ ३.९४ ॥

## [७]भे-तुब्भेहि-उब्भेहि-उम्हेहि-तुय्हेहि-उय्हेहि भिसा ॥ ३.९५ ॥

## तइ-तुव-तुम-तुह-तुब्भा ङसौ ॥ ३.९६ ॥

**तइत्तो** । **ङ**सेस्त्तोदो० । **ज**स्शस्ङसित्तोदो० - दीर्घः । **ह्र**स्वः सं० ॥ ३.९६ ॥

---

१. अमूउ, अमूओ - **क.ख.** । २. ०तुब्भेतुज्झतुम्ह० - **मु.** । ०तुब्भेतुब्भतुम्ह० - **ता.** । ३. ०हमो । **तं**तुंतुमं - **क.ख.** । ४. (तुतुवतुमतुहतुब्भा ङौ इत्यनेन) ५. (**उ**दितः स्वरान्नोऽन्तः ।) ६. **वो**तुज्झ० - **मु.** । ७. **भो**तुब्भेहिंउज्झेहिंउम्हेहिंतुय्हेहिंउय्हेहिं भिसा - **मु.** ।

**तुय्ह-तुब्भ-तहिंतो ङसिना ॥ ३.९७ ॥**

**तुब्भ-तुय्होय्होम्हा भ्यसि ॥ ३.९८ ॥**

**तइ-तु-ते-तम्हं[१]-तुह-तुहं-तुव-तुम-तुमे-तुमो-तुमाइ-दि-दे-इ-ए-तुब्भोब्भोय्हा ङसा ॥ ३.९९ ॥**

**तु-वो-भे-तुब्भ-तुब्भं-तुब्भाण-तुवाण-तुमाण-तुहाण-उम्हाण आमा ॥३.१००॥**

**तुमे-तुमए-तुमाइ-तइ-तए ङिना ॥ ३.१०१ ॥**

**तु-तुव-तुम-तुह-तुब्भा ङौ ॥ ३.१०२ ॥**

**सुपि ॥ ३.१०३ ॥**

**ब्भो म्ह-ज्झौ वा ॥ ३.१०४ ॥**

**अस्मदो म्मि-अम्मि-अम्हि-हं-अहं-अहयं सिना ॥ ३.१०५ ॥**

**पम्हुट्ठो** । प्रमुषित । **क्तेना**ऽप्फुणादयः साधुः ॥ ३.१०५ ॥

**अम्ह-अम्हे-अम्हो-मो-वयं-भे जसा ॥ ३.१०६ ॥**

**भणामो** । भण् । मस् । **तृतीयस्य** मोमुमाः । **व्यञ्जनाद०** । **इच्च** मोमुमे वा ॥ ३.१०६ ॥

**णे-णं-मि-अम्मि-अम्ह-मम्ह-मं-ममं-मिमं-अहं अमा ॥ ३.१०७ ॥**

**अम्हे-अम्हो-अम्ह-णे शसा ॥ ३.१०८ ॥**

**मि-मे-ममं-ममए-ममाइ-मइ-मए-मयाइ-णे टा ॥ ३.१०९ ॥**

**अम्हेहि-अम्हाहि-अम्ह-अम्हे-णे भिसा ॥ ३.११० ॥**

**मइ-मम-मह-मज्झा ङसौ ॥ ३.१११ ॥**

**ममा-ऽम्हौ भ्यसि ॥ ३.११२ ॥**

**ममाहिंतो** । **भ्य**सि वा - दीर्घः[२] ॥

**ममेसुंतो** । **भ्य**सस्त्तोदोदु० । **भिस्**भ्यस्सुपि - ए ॥ ३.११२ ॥

---

१. तुम्हं - **मु.** । २. ममेहिंतो अम्हेहिंतो इत्यपि - **खटि.** ।

**मे-मइ-मम-मह-महं-मज्झ-मज्झं-अम्ह-अम्हं ङसा ॥ ३.११३ ॥**

**णे-णो-मज्झ-अम्ह-अम्हं-अम्हे-अम्हो-अम्हाण-ममाण-महाण-मज्झाण आमा ॥ ३.११४ ॥**

**मि-मइ-ममाइ-मए-मे ङिना ॥ ३.११५ ॥**

सर्वत्र ङि[१] ॥ ३.११५ ॥

**अम्ह-मम-मह-मज्झा ङौ ॥ ३.११६ ॥**

**सुपि ॥ ३.११७ ॥**

**त्रेस्ती तृतीयादौ ॥ ३.११८ ॥**

**तिण्हं**[२] । **स**ङ्ख्याया आमो ण्हण्हं । **ह्र**स्वः सं० ॥ ३.११८ ॥

**द्वेर्दो-वे ॥ ३.११९ ॥**

**दुवे-दोण्णि-वेण्णि च जस्-शसा ॥ ३.१२० ॥**

सर्वेषु **द्वि**वचनस्य बहुवचनम्[३] ॥ ३.१२० ॥

**त्रेस्तिण्णिः ॥ ३.१२१ ॥**

**चतुरश्चत्तारो-चउरो-चत्तारि ॥ ३.१२२ ॥**

**सङ्ख्याया आमो ण्ह-ण्हं ॥ ३.१२३ ॥**

**चउण्ह** । **अ**न्त्यव्यं० ॥

**छण्ह** । **ष**ट्शमीशावेति छः ॥

**पण्णरसण्हं** । **प**ञ्चाशत्पञ्चदशदत्ते - ण्णः । **स**ङ्ख्यागद्गदे रः ॥

**[ अट्ठारसण्हं ]** । अष्टादशन् । **ष्ट**स्याऽनुष्ट्रेष्टा० ॥

**[ समणसाहस्सीणं ]** । श्रमणसहस्र । **अतः** समृद्ध्या० । **आर्ष**त्वात् स्त्रीत्वे[४], **अजातेः** पुंसः - ङी ॥ ३.१२३ ॥

---

१. (अस्याः वृत्तेः मर्म न सम्यग् ज्ञायते । कदाचिदेतदनन्तरसूत्रवृत्तिस्थ-'अम्हम्मि-ममम्मि' इत्याद्युदाहरणसम्बन्धिनी 'सर्वत्र ङेः स्सिम्मित्थाः' इति वृत्तिः स्यात्, सा च लेखकेनाऽनवधानेनाऽस्मिन् सूत्रे त्रुटितरूपेण योजिता स्यादिति संभाव्यते ।) **मि**मइ० । **अम्ह**मम० । सर्वत्र **ङेः** स्सिम्मित्थाः - **दी.** । (**अम्ह**मम० सूत्रे -) '**ङेः** स्सिम्मित्थाः' - **ताटि.** । (**मि**मइ० सूत्रे न काऽपि टिप्पणी ता. प्रतौ वर्तते ।) २. तिण्ह - **ग.** । ३. ०वचनम् । **स**र्वत्र लव० । **ज**स्शसोर्लुक् - **ख.** । ०वचनम् । **ज**स्शसोर्लुक् - **क.** । ४. **वे**माञ्जल्याद्याः० - स्त्रीत्वं - **खटि.** । अञ्जल्यादित्वात् स्त्रीत्वं - **ताटि.** ।

## शेषेऽदन्तवत् ॥ ३.१२४ ॥

**सहिं, वहुं** । ह्रस्वोऽमि ॥

**गामणिं, खलपुं** । **क्विपः** - ह्रस्वः ॥

**[ हाहाण ]** । हाहा देवगायनः।[1] आम् । **टाणशस्येदिति** एत्वस्य **एत्** इत्यनेन निषेधः ॥

**[ गिरीण, गुरूण ]** । गिरि, गुरु । **इदुतो** दीर्घः ॥

[2]ङे-निषेधः **ङेर्डेरि**त्यनेन ॥

**भिस्**भ्यस्सुपीत्यस्य निषेधः **एत्** इत्यनेन ॥ ३.१२४ ॥

## न दीर्घो णो ॥ ३.१२५ ॥

**अग्गिणो** । **जस्**शसोर्णो वा ॥

**अग्गी** । **जस्**शसोर्लुकि **जस्**शस्ङसित्तोदो० ॥

**अग्गीओ** । ङसेस्त्तोदोदुहि० ॥ ३.१२५ ॥

## ङसेर्लुक् ॥ ३.१२६ ॥

## भ्यसश्च हिः ॥ ३.१२७ ॥

## ङेर्डेः ॥ ३.१२८ ॥

## एत् ॥ ३.१२९ ॥

**मालाओ** । शस् । **स्त्रियामुदोतौ** वा ॥

**[ अग्गिणो[3], वाउणो ]** । अग्नि, वायु । शस् । **जस्**शसोर्णो वा ॥ ३.१२९ ॥

## द्विवचनस्य बहुवचनम् ॥ ३.१३० ॥

**दोहिं** । **द्वे**र्दोवे० ॥ ३.१३० ॥

## चतुर्थ्याः षष्ठी ॥ ३.१३१ ॥

## तादर्थ्यङेर्वा ॥ ३.१३२ ॥

---

१. ०गायन - **क.ग.** । २. वेति(?)निषेधः - **ग.** । ३. अग्गिओ - **मु.** । अग्गिणो - **ता.** ।

## वधाड्डाइश्च ॥ ३.१३३ ॥

## क्वचिद् द्वितीयादेः ॥ ३.१३४ ॥

**[ सीमाधरस्स ]** । सीमां धरति, **लिहा**द्यच् ॥

**तिस्सा** । **किं**यत्तदोऽस्यमामि - ङी । ङस् । **ईद्भ्यः** स्सासे ॥

**भरिमो** । **स्मरे**र्झरिति । **तृ**तीयस्य मोमु० । **इ**च्च मोमु० ॥

**[ मुक्का ]** । मुक्ता । **श**क्तमुक्तदष्ट० - **क**ः ॥

**तेसिं** । **आमो** डेसिं । **वा** स्वरे मश्च ॥

चरिसमानार्थः स्तृ(चृ?) इति धात्वन्तरम् । आचीर्णमिति प्रयोगः । आचरितमिति त्वर्थकथनम् ॥

**बीहइ** । **भि**यो भाबीहौ ॥

**इयराइं जाण** । इतराणि जानीहि । **ज्ञो** जाणमुणौ ॥

**[ पायंतिमिल्ल ]** । पादान्तिम । **स्वार्थे** कश्च वेति डिल्लप्रत्ययः ॥

**पिट्ठीए** । पृष्ट । **जा**तेरयान्त० - ङी० । **लु**गित्यलुक् । **पृष्ठे** वाऽनुत्तरपदे - इः ॥ ३.१३४ ॥

## द्वितीया-तृतीययोः सप्तमी ॥ ३.१३५ ॥

**[ गामे ]** । ग्राम । **काला**ध्वभावदेशं वेति द्वितीया ॥

**मइं**[1] । **मि**मइममाइमए० ॥

**वेविरीए** । वेपृङ् । **चाल**शब्दार्थादकर्म्मकादित्यनः । **शी**लाद्यर्थस्येरः । **अ**जातेः पुंसः - ङी ॥

**तिसु** । **त्रे**स्ती तृतीयादौ । **पा**नीयादि० ॥

**[ पुहवी ]** । पृथिवी । **उ**दृत्वादौ । **प**थिपृथिवी० - अत् ॥ ३.१३५ ॥

## पञ्चम्यास्तृतीया च ॥ ३.१३६ ॥

**[ अंतेउरे ]** । अन्तर्पुर । **अ**न्त्यव्यं० । **तो**ऽन्तरि - एं[2] ॥ ३.१३६ ॥

---

१. अस्मद् । टा । अनेन ङी - **खटि.** । २. **[ रमिउ ]** । रमिं क्रीडायाम् । रमणं पूर्वं क्त्वा । **क्त्व**स्तुमत्तूणतुआणाः - तुम् । **व्य**ञ्जनाददन्ते । **ए**च्च क्त्वातुम्० - ए(इ)त्वम् । **[ विज्जुज्जोयं ]** । विद्युत्-द्योत । **अ**न्त्य० - तलुक् । **द्य**य्य० - ज । **अ**मोऽस्य - अलोपः । **मो**ऽनुस्वारः । **[ रत्तिं ]** । रात्रि । **ह्र**स्वः संयोगे । अनेन । **अ**मोऽस्य । **मो**ऽनुस्वारः - **खटि.** ।

## सप्तम्या द्वितीया च ॥ ३.१३७ ॥

## क्यङोर्यलुक् ॥ ३.१३८ ॥

**[ गरुआअइ ]**। गुरुक । **गुरौ** के वा[1] - अत्वम् । **च्व्यर्थे** भृशादित्वात् क्यङ् । **स्व**रादनतो वेति बाहुलकात् अकारान्तादपि ॥[2]

**[ दमदमाइ ]**। दमत्[3] । अदमत् दमत् भवति । **अव्य**क्तानुकरणा० - डाच् द्विश्च । **डाच्या**दौ - तलुक् ॥ ३.१३८ ॥

## त्यादीनामाद्यत्रयस्याऽऽद्यस्येचेचौ ॥ ३.१३९ ॥

## द्वितीयस्य सि-से ॥ ३.१४० ॥

## तृतीयस्य मिः ॥ ३.१४१ ॥

**बहुजाणय**[4] । बहु जानाति, णकः । **ज्ञो** जाणमुणौ ॥

**रूसिउं** । **रुषा**दीनां द्वित्वम् । **एच्च** क्त्वा० ॥

**सक्कं** । **श**कादीनां द्वित्वम् ॥

**न मरं** । **ऋ**वर्णस्याऽरः ॥ ३.१४१ ॥

## बहुष्वाद्यस्य न्ति-न्ते-इरे ॥ ३.१४२ ॥

**रक्खसाणं । क्व**चिद् द्वितीयादेरिति पञ्चम्याः षष्ठी ॥

**उप्पज्जंते** । पदिंच् । अन्ते → न्ते । **स्विदां** ज्जः । **व्य**ञ्जना० ॥

**[ कव्वरयणाइं ]** । काव्यरत्न । **क्ष्मा**श्लाघारत्नेऽन्त्यव्यञ्जनात् इति अः ॥

**पहुप्पिरे** । **प्र**भौ हुप्पो वा ।[5] **लुगि**त्यलुक् । बहुवचनम् ॥

**विच्छुहिरे** । **क्षः** खः क्वचित्तु० ॥

**सूसइरे** । शुषंच् । **रुषा**दीनां दीर्घः ॥

**चिक्खल्लो**[6] । देश्यः । संस्कृतस्य चीत्कुर्वन् स्खलति । **पृषो**दरादित्वात् साधुः ॥ ३.१४२ ॥

---

१. के च - **ग.** । २. (इदं च **दीर्घ**श्च्व्यिङ्यक्क्येषु चेति सूत्रप्रवृत्तेः प्रागेव यलोपमङ्गीकृत्य विधानम् । लोपात् पूर्वं **दीर्घ**श्च्वति सूत्रस्य प्रवर्तने 'गरुआ' इति आकारान्त एव धातुर्निष्पद्यते । ततो न तत्र 'बाहुलका'दित्युल्लेखस्याऽऽवश्यकत्वम् । ता. प्रतौ टिप्पण्यामपि केवलं **स्व**रादनतो वेति सूत्रमेव दर्शितम् । न पुनः बाहुलकादित्युल्लिखितम् ।) **३.** अदमत् - **ग.** । **४. ज्ञो** ञः - लुक् - **ताटि.** । **५.** ०हुप्पो वा । **द्वि**वचनस्य बहु० - **क.ख.** । **६.** चिक्खिल्लो । राजादित्वात् साधुः - **ग.** ।

**मध्यमस्येत्था-हचौ ॥ ३.१४३ ॥**

**जं जं ते** । युष्मद् । **चतुर्थ्याः**[1] षष्ठी । **तइतुतेतुम्हं०** ॥ ३.१४३ ॥

**तृतीयस्य मो-मु-माः ॥ ३.१४४ ॥**

**हसामो** । **इच्च** मोमु० ॥

**तुवरामो** ।[2] **त्वर**स्तुवर० ॥ ३.१४४ ॥

**अत एवैच्-से ॥ ३.१४५ ॥**

**वसुआइ** । वांक् गतौ उत्पूर्वः । [3]**उद्वा**केरोरुम्मावसुआ ॥ ३.१४५ ॥

**सिनाऽस्तेः सिः ॥ ३.१४६ ॥**

**अत्थि तुमं** । **द्वि**तीयस्य सिसे इति से । **अ**त्थिस्त्यादिना ॥ ३.१४६ ॥

**मि-मो-मैर्म्हि-म्हो-म्हा वा ॥ ३.१४७ ॥**

**एस म्हि** । एतद् । **वै**सेणमिणमो सिना ॥

**गय म्हो** । गताः स्मः । **ह्रस्वः** सं० ॥ ३.१४७ ॥

**अत्थिस्त्यादिना ॥ ३.१४८ ॥**

**णेरदेदावावे ॥ ३.१४९ ॥**

**दरिसइ** । **वृ**षादीनामरिः ॥

**कारेइ** । **अ**देल्लुक्यादेरत आः ॥

**भावेइ** । **उ**वर्णस्याऽऽवः ॥ ३.१४९ ॥

**गुर्वादेरविर्वा ॥ ३.१५० ॥**

**सोसिअं** । **यु**वर्णस्य गुणः ॥ ३.१५० ॥

**भ्रमेराडो वा ॥ ३.१५१ ॥**

**[ भमाडेइ ]** । भ्रम् । णिग् । **व**र्तमानापञ्चमीशतृषु वा - ए ॥ ३.१५१ ॥

१. चतुर्थ्यां षष्ठी - **ग.** । २. तुवरामो । ञित्वरिष् सम्भ्रमे । वर्त० महे । **त्व**रस्तु० - **ख.** । ३. उद्वाते० - **मु.** ।

## लुगा-ऽऽवी क्त-भाव-कर्मसु[1] ॥ ३.१५२ ॥

## अदेल्लुक्यादेरत आः ॥ ३.१५३ ॥

**पाडइ** । **स**[2]दपतोर्डः ॥

**दूसेइ** । **रु**षादीनां दीर्घः - दीर्घः ॥

**सामलीए** । **अ**जातेः पुंसः - ङी । **टा**ङस्ङेरदादिदे० ॥ ३.१५३ ॥

## मौ वा ॥ ३.१५४ ॥

## इच्च मो-मु-मे वा ॥ ३.१५५ ॥

## क्ते ॥ ३.१५६ ॥

**नविअं** ।[3] **रु**दनमोर्वः ॥

**झायं** । **ध्या**गोर्झागौ ॥

**लूअं** । **स्व**राणां स्वराः ॥

**हूअं** ।[4] भू । **क्ते** हूः ॥ ३.१५६ ॥

## एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु ॥ ३.१५७ ॥

**हासहिइ** । स्यति → इच् । **भ**विष्यति हिरादि० । **व्य**ञ्जनाद० ॥

**काऊण** । **आः** कृगो० ॥ ३.१५७ ॥

## वर्त्तमाना-पञ्चमी-शतृषु वा ॥ ३.१५८ ॥

**हसिम** । **इ**च्च मोमुमे वा ॥

**हसेउ** । **दु**सुमु विध्यादिष्वे० - दु ॥

**सुणेउ** । **चि**जिश्रुहुस्तुलूपूधूगां णो० - ण ॥ ३.१५८ ॥

---

१. [ **कारिअं, कराविअं** ] । कृ । णिग् । **ऋ**वर्णस्याऽरः । क्तप्रत्य० । सूत्रेण प्रथमे णिग्लोपः । द्वितीये णिग्स्थाने आवि-आदेशः । प्रथमे **व्य**ञ्जनाददन्ते - अकारागमः । **क्ते** इति पदेन अस्य इः । **व्य**ञ्जना० । **अ**देल्लुक्यादेरत आकारः । एवं हस्, क्षमौषि सहने क्षम् । णिग् । शेषं पूर्ववत् । डुकृंग् करणे । कृ । ४ वार णिग् प्रत्ययः । **ऋ**वर्णस्याऽरः । सूत्रेण प्रथमे तृतीये स्थाने णिग्लोपः । द्वितीये चतुर्थे सूत्रेण णिगः स्थाने आवि-आदेशः । कर्मणि ते - क्य । **ई**अइज्जौ क्यस्य - ईअ-इज्ज-आदेशः । **त्या**दी० । **अ**देल्लुक्या० - अत आ । हस् । ४ णिग् । शेषं पूर्ववत् - **कटि.** । **२. श**दपतो० - **क.ख.** । **३.** णुक् स्तुतौ । क्त । **उ**वर्णस्याऽऽवः । **व्य**ञ्जनाददन्ते । अनेन इ - **दी.** । **४.** ह्वेंग् स्पर्द्धायाम् । हूयते स्म । क्त प्र० । **यजा**दिवचेः किति - य्वृत् । **दीर्घ**मवोऽन्त्यम् - दीर्घः - **दी.** ।

### ज्जा-ज्जे ॥ ३.१५९ ॥

**हसेज्जा**[१] । **व**र्त्तमानाभविष्यन्त्योश्च ज्जज्जा वा ॥ ३.१५९ ॥

### ईअ-इज्जौ क्यस्य ॥ ३.१६० ॥

**होईअइ** । **अ**विति हुः । **स्व**राणां स्वराः - ओ ॥

**नवेज्ज** । णम् । ते । **व**र्तमानाभविष्यन्त्योश्च ज्जज्जा वा । **रु**दनमोर्वः । **व्य**ञ्जनाद० । **व**र्तमानापञ्च० - ए ॥

**नविज्जेज्ज** । **ई**अइज्जौ० । **व**र्तमानापञ्चमी० - ए ॥

**अच्छेज्ज** । आसिक् । **ग**मिष्यमासां छः ॥ ३.१६० ॥

### दृशि-वचेर्डीस-डुच्चं ॥ ३.१६१ ॥

### सी-ही-हीअ भूतार्थस्य ॥ ३.१६२ ॥

**इणं** । इदम् । अम् । **क्ली**बे स्यमेदमिणमो च ॥ ३.१६२ ॥

### व्यञ्जनादीअः ॥ ३.१६३ ॥

**हुवीयं**[२] । **भु**वेर्होहुव० ॥ ३.१६३ ॥

### तेनाऽस्तेरास्यहेसी ॥ ३.१६४ ॥

### ज्जात् सप्तम्या इर्वा ॥ ३.१६५ ॥

**होज्जइ** । **व**र्त्तमानाभवि० - ज्ज ॥ ३.१६५ ॥

### भविष्यति हिरादिः ॥ ३.१६६ ॥

**होहित्था** । भविष्यन्ती स्यथ । **म**ध्यमस्येत्थाहचौ ॥

**हसिइ** । **व्य**ञ्जनाद० । **ए**च्च क्त्वातुम्त० ॥

**काहिइ** । **आः** कृगो० ॥ ३.१६६ ॥

### मि-मो-मु-मे स्सा-हा न वा ॥ ३.१६७ ॥

### मो-मु-मानां हिस्सा-हित्था ॥ ३.१६८ ॥

---

१. हसिज्जा - **क.ख.** । २. हुवीअ - **मु.** ।

## मेः स्सं ॥ ३.१६९ ॥

**कित्तइस्सं** । कृतण् । णिच् । **कृतः** कीर्तिः । **ह्रस्वः** सं० । **सर्वत्र** ल० । स्यामि । **तृतीयस्य** मिः । **मेः** स्सं । **णेरदेदा**० - अत् । **एच्च** क्त्वातुम्तव्य० ॥ ३.१६९ ॥

## कृ-दो हं ॥ ३.१७० ॥

## श्रु-गमि-रुदि-विदि-दृशि-मुचि-वचि-छिदि-भिदि-भुजां सोच्छं-गच्छं-रोच्छं-वेच्छं-दच्छं-मोच्छं-वेच्छं-छेच्छं-भेच्छं-भोच्छं ॥ ३.१७१ ॥

## सोच्छादय इजादिषु हिलुक् च वा ॥ ३.१७२ ॥

**सोच्छिइ** । स्यति → इच् । **व्य**ञ्जनाद० । **एच्च** क्त्वातु० ॥ ३.१७२ ॥

## दु-सु-मु विध्यादिष्वेकस्मिंस्त्रयाणाम् ॥ ३.१७३ ॥

**हसामु** । **व्य**ञ्जनाद० । **इच्च** मोमुमे वा - आत्वम् ॥

**पेच्छसु** । प्रपूर्व ईक्षिधातुरात्मनेपदार्थं दर्शितः ॥ ३.१७३ ॥

## सोर्हिर्वा ॥ ३.१७४ ॥

**देहि** । **स्वराणां स्वराः** - एः ॥ ३.१७४ ॥

## अत इज्ज-स्विज्ज-हीज्जे-लुको वा ॥ ३.१७५ ॥

**हसेज्जसु** । पञ्चमी हि सप्तमी यास् च । **दुसुमु** विध्यादिषु० - सु । क्वचिदेकपदेऽपि सन्धिरिति **व्य**ञ्जनाददन्ते इत्यस्य इज्जसु-इकारेण सह **अवर्ण**स्येवर्णादिना० - एत्वम् ॥ ३.१७५ ॥

## बहुषु न्तु-ह-मो ॥ ३.१७६ ॥

[१]**हसामो** । **इच्च** मोमु० - आकारः ॥

**तुवरंतु** । **त्वरे**स्तुवरजअडौ ॥ ३.१७६ ॥

## वर्त्तमाना-भविष्यन्त्योश्च ज्ज-ज्जा वा ॥ ३.१७७ ॥

**हसेज्ज** । **ज्जा**ज्जे - एत्वम् ॥

**सुणिज्ज** । **चिजि**श्रुहुस्तु० - ण ॥

---

१. बहु० । तुवरंतु । ञित्वरिष् । **त्वरे**० - **क.ख.** ।

**अइवाएज्जा** । अतिपातयामि[१] । **णे**रदेदा० - अः । **ज्जा**ज्जे - एत्वम् ॥

**अइवायावेज्जा** । **णे**रदेदा० - आवे ॥ ३.१७७ ॥

## मध्ये च स्वरान्ताद् वा ॥ ३.१७८ ॥

**होज्जस्सं** । **मेः** स्सं ॥ ३.१७८ ॥

## क्रियातिपत्तेः ॥ ३.१७९ ॥

[ **वण्णणिज्जो** ] । वर्णनीय । **वो**त्तरीयानीयतीयकृद्ये ज्जः ॥ ३.१७९ ॥

## न्त-माणौ ॥ ३.१८० ॥

अत्र स्थानित्वपरिभाषाया अनित्यत्वाश्रयणाद् न्तादेशे स्याद्युत्पत्तिः ॥

**जइ [ सि ]** । [२]**प्या**दय इति **सि** अव्ययम् ॥

**निवेसंतो** । विशंत् । णिग् । क्रियातिपत्ति स्यस् । **णे**रदेदा० - अत्वम् ॥

**सहंतो** । षहिं । स्यथास् । **व्य**ञ्जनाद० ॥

**तो** । तद् । ङसि । **त**दो डोः ॥ ३.१८० ॥

## शत्रानशः ॥ ३.१८१ ॥

## ई च स्त्रियाम् ॥ ३.१८२ ॥

**॥ इति मलधारिश्रीशिष्य-नरचन्द्रविरचिते प्राकृतप्रबोधे तृतीयः पादः ॥**

卐 卐 卐

१. अतिपातयति - **क.ख.** । २. **सो**च्छादय(?)इति सि - **ग.** ।

## ॥ चतुर्थः पादः ॥

### इदितो वा ॥ ४.१ ॥

### कथेर्वज्जर-पज्जरोप्पाल-पिसुण-संघ-बोल्ल-चव-जंप-सीस-साहाः ॥ ४.२ ॥

पक्षे **कहइ** । कथण् । साध्यत्वादत्र णिजभावः[१] । णिचि वा **णे**रदेदेति अः[२] । **अ**देल्लुक्यादेरत आः । **स्व**राणां स्वरा इत्याकारस्य अत्वम् ॥ ४.२ ॥

### दुःखे णिव्वरः ॥ ४.३ ॥

### जुगुप्सेर्झुण-दुगुच्छ-दुगुंछाः ॥ ४.४ ॥

**[ जुगुच्छइ ]** । **ह्र**स्वात् थ्यश्च०[३] ॥ ४.४ ॥

### बुभुक्षि-वीज्योर्णीरव-वोज्जौ ॥ ४.५ ॥

वीजमिवाऽऽचरतीति **कर्तुः** क्विप्० ॥ ४.५ ॥

### ध्या-गोर्झा-गौ ॥ ४.६ ॥

**झाअइ** । **स्व**रादनतो वा - अत् ॥ ४.६ ॥

### ज्ञो जाण-मुणौ ॥ ४.७ ॥

**णायं**[४] । **म्न**ज्ञोर्णः ॥

**जाणिऊण** । **ए**च्च क्त्वातुम्० ॥ ४.७ ॥

### उदो ध्मो धुमा ॥ ४.८ ॥

---

१. 'प्रायो ण्यन्ताश्चुरादय' इति न्यायात् साध्यत्वाद् वा णिजभावः - **दी.** । २. **णे**रदेदेति आत्व - **ख.ग.** । ३. पक्षे **ह्र**स्वात् थ्यश्च० - छ - **क.ख.** । ४. नायं - **ख.** ।

**श्रदो धो दहः ॥ ४.९ ॥**

**पिबेः पिज्ज-डल्ल-पट्ट-घोट्टाः ॥ ४.१० ॥**

पक्षे **पिअइ** । पां । **स्व**रादनतो वा - अत् । **स्व**राणां स्वराः - इः ॥ ४.१० ॥

**उद्वाकेरोरुम्मा-वसुआ ॥ ४.११ ॥**[१]

**निद्राकेरोहीरोंघौ ॥ ४.१२ ॥**[१]

**आघ्रेराइग्घः ॥ ४.१३ ॥**

**स्नाकेरब्भुत्तः ॥ ४.१४ ॥**[१]

**ण्हाइ** । **सू**क्ष्मश्नष्णस्नेति ण्हः[२] ॥ ४.१४ ॥

**समः स्त्यः खाः ॥ ४.१५ ॥**

**स्थष्ठा-थक्क-चिट्ठ-निरप्पाः ॥ ४.१६ ॥**

**उट्ठिओ** । **स्व**रादन० । **क्ते** - इः । **लु**गित्यालुक् ॥

**पट्ठाविओ** । **लु**गावीक्तभावेति आविः । **लु**गित्यालुक् ॥ ४.१६ ॥

**उदष्ठ-कुक्कुरौ ॥ ४.१७ ॥**

**म्लेर्वा-पव्वायौ ॥ ४.१८ ॥**

[३]**मिलाइ** । **ला**दिति इः ॥ ४.१८ ॥

**निर्मो निम्माण-निम्मवौ ॥ ४.१९ ॥**

**क्षेर्णिज्झरो वा ॥ ४.२० ॥**

**झिज्जइ** । **क्षः** ख इति झः । **म**ध्ये च स्वरान्ताद् वा - ज्जः ॥ ४.२० ॥

**छदेर्णेर्णुम-नूम-सन्नुम-ढक्कौम्वाल-पव्वालाः ॥ ४.२१ ॥**

**छायइ** । **णे**रदेदावावे ॥ ४.२१ ॥

---

१. (त्रिष्वपि स्थानेषु के-स्थाने) ते - **मु.** । २. ण्हः । **सम**ः० । सङ्ख्यायां क्तेः (?) । **स्थष्ठा**० - **क.ख.** । ३. म्ले० । क्षेर्णि० - **ग.** ।

## निव्रि-पत्योर्णिहोडः ॥ ४.२२ ॥

**निवारइ** । वृग् । णिग् । **ऋ**वर्णस्याऽर**ः** - अर् । तिव् → इच् । **णे**रदेदा० - एत्वम् । **अ**देल्लुक्यादेरत आः ॥

**पाडेइ** । **स**दपतोर्डः ॥ ४.२२ ॥

## दूङो दूमः ॥ ४.२३ ॥

## धवलेर्दुमः ॥ ४.२४ ॥

धवलं करोति णिच् धवलइ । णेरत्वे बाहुलकाददेल्लुक्यादेर्न । **स्व**राणां स्वरा वा - पुनरत्वम् ॥ ४.२४ ॥

## तुलेरोहामः ॥ ४.२५ ॥

## विरिचेरोलुण्डोल्लुण्ड-पल्हत्थाः ॥ ४.२६ ॥

**विरेअइ** । **यु**वर्णस्य गुणः ॥ ४.२६ ॥

## तडेराहोड-विहोडौ ॥ ४.२७ ॥

## मिश्रेर्वीसाल-मेलवौ[१] ॥ ४.२८ ॥

## उद्धूलेर्गुण्ठः ॥ ४.२९ ॥

## भ्रमेस्तालिअण्ट-तमाडौ ॥ ४.३० ॥

**भामेइ** । **अ**देल्लुक्यादे० ॥

**भमाडेइ** । **भ्र**मेराडो वेति णेराडः ॥

**भमावेइ** । **णे**रदेदा० - आवे ॥ ४.३० ॥

## नशेर्विउड-नासव-हारव-विप्पगाल-पलावाः ॥ ४.३१ ॥

## दृशेर्दाव-दंस-दक्खवाः ॥ ४.३२ ॥

**दरिसइ** । **वृ**षादीनामरिः ॥ ४.३२ ॥

## उद्घटेरुग्गः ॥ ४.३३ ॥

---

**१.** ०मेलवौ । उद्धूले० । धूलिमुत्क्षिपति । **णिज्** बहुलं - णिच् । पक्षे **णे**रदेदावा० । भ्रमे० - **ख.** ।

**स्पृहः सिहः ॥ ४.३४ ॥**

**सम्भावेरासंघः ॥ ४.३५ ॥**

**उन्नमेरुत्थंघोल्लाल-गुलुगुंछोप्पेलाः ॥ ४.३६ ॥**

**उन्नावइ**[१] । **रुदनमोर्वः** ॥ ४.३६ ॥

**प्रस्थापेः पट्ठव-पेण्डवौ ॥ ४.३७ ॥**

**विज्ञपेर्वोक्का-ऽवुक्कौ ॥ ४.३८ ॥**

**विण्णवइ** । **म्न**ज्ञोर्णः[२] ॥ ४.३८ ॥

**अर्पेरल्लिव-चच्चुप्प-पणामाः ॥ ४.३९ ॥**

**[ अप्पेइ ]** । ऋंक् गतौ अथवा ऋं प्रापणे च । ऋच्छति इयर्ति वा कश्चित् । णिग् । **अर्ति**ह्री इत्यादिना पोऽन्तः । **पुस्पौ** - गुणः-अर् । **णे**रदे० - एत् ॥ ४.३९ ॥

**यापेर्जवः ॥ ४.४० ॥**

**प्लावेरोम्वाल-पव्वालौ ॥ ४.४१ ॥**

**पावेइ**[३] । च्युंङ् ज्युङ् प्लुङ् गतौ । **उवर्णस्या**ऽवः ॥ ४.४१ ॥

**विकोशेः पक्खोडः ॥ ४.४२ ॥**

कुशच् श्लेषे विपूर्वः[४] । विकोशनं विकोशः । **भावाकर्त्रो**र्घञ् ॥ ४.४२ ॥

**रोमन्थेरोग्गाल-वग्गोलौ ॥ ४.४३ ॥**

**कमेर्णिहुवः ॥ ४.४४ ॥**

**प्रकाशेर्णुव्वः ॥ ४.४५ ॥**

**कम्पेर्विच्छोलः ॥ ४.४६ ॥**

---

१. उन्नामइ - **मु.** । **२. म्न**ज्ञोर्णः । **णे**रदेदा० । **स्व**राणां स्वराः - [ए]कारः ह्रस्वश्च । प्लावे० - **क.ग.** । **३.** च्युङ् ज्युङ् जुङ् प्रुङ् प्लुङ् इति दण्डकधातुः । प्लु । प्लवन्तं प्रयुङ्क्ते, णिग् । **णे**रदेदा० - एत् । **स**र्वत्रेति ललोपः । **उ**वर्ण० - **ख.** । **४.** ०विपूर्वः । दोले० - **क.** । ०विपूर्वः । रोम० । रोमन्थं करोति, **रोम**न्थाद् व्याप्यादुच्चर्वणे - णिग् । **त्र्यन्त्य०** - अलुक् । प्रका० । कशिक् गतिशातनयोः (?) । टुवेपृङ् केपृङ् गेपृङ् कपुङ् चलने । दोले० - **ख.** ।

**आरोपेर्वलः ॥ ४.४७ ॥**

**दोले रङ्खोलः ॥ ४.४८ ॥**

दुलण् उत्क्षेपे ॥ ४.४८ ॥

**रञ्जे रावः ॥ ४.४९ ॥**

**घटेः परिवाडः ॥ ४.५० ॥**

**वेष्टेः परिआलः ॥ ४.५१ ॥**

**वेढेइ**[१] । **क**गटडेति षलोपे **वेष्टः** इत्यनेन टस्य ढः ॥ ४.५१ ॥

**क्रियः किणो, वेस्तु के**[२] **च ॥ ४.५२ ॥**

**विक्किणइ** । **तै**लादौ - द्वित्वम् ॥ ४.५२ ॥

**भियो भा-बीहौ ॥ ४.५३ ॥**

**भाइअं**[३] । क्त । **स्व**रादनतो वा - अत् । **क्ते** - इः ॥ ४.५३ ॥

**आलीडोऽल्ली ॥ ४.५४ ॥**

[४]**अल्लिअइ** । लीङ्च् श्लेषणे । **स्व**रादन० । **स्व**राणां स्वराः - इः ॥

**अल्लीणो** । [५]**क्ते**नाऽप्फुण्णादयः ॥ ४.५४ ॥

**निलीङेर्णिलीअ-णिलुक्क-णिरिग्घ-लुक्क-लिक्क-ल्हिक्काः ॥ ४.५५ ॥**

**निलिज्जइ** । **म**ध्ये च स्वरान्ताद् वा - ज्जः । **ह्रस्वः** सं० ॥ ४.५५ ॥

**विलीङेर्विरा ॥ ४.५६ ॥**

**रुके**[६] **रुञ्ज-रुण्टौ ॥ ४.५७ ॥**

[७]टुक्षुरुकुंक् शब्दे । **रवइ** । **उवर्ण**स्याऽवः - अव् ॥ ४.५७ ॥

---

१. वेष्टि वेष्टने - **खटि.** । २. वेस्तु के च - **मु.** । ३. ञिभींक् भये । बिभेति स्म - **खटि.** । ४. अल्लियइ । **स्व**राद० - **क.ख.** । ५. क्ते प्रत्यय नाणादयः(?) - **ग.** । ६. रुते० - **मु.** । ७. रुके० । रवइ - **क.ख.** ।

**श्रुटेर्हणः ॥ ४.५८ ॥**

**सुणइ** । **चि**जि० ॥ ४.५८ ॥

**धूगेर्धुवः ॥ ४.५९ ॥**

**धुणइ** । **चि**जिश्रिहुस्तु० - णो ह्रस्वश्च ॥ ४.५९ ॥

**भुवेर्हो-हुव-हवाः ॥ ४.६० ॥**

**उब्भुअइ** । भुअ आदेशः ॥ ४.६० ॥

**अविति हुः ॥ ४.६१ ॥**

**पृथक्-स्पष्टे णिव्वडः ॥ ४.६२ ॥**

**प्रभौ हुप्पो वा ॥ ४.६३ ॥**

**क्ते हूः ॥ ४.६४ ॥**

**कृगेः कुणः ॥ ४.६५ ॥**

**काणेक्षिते णिआरः ॥ ४.६६ ॥**

**निष्टम्भा-ऽवष्टम्भे णिट्ठुह-संदाणं ॥ ४.६७ ॥**

**श्रमे वावंफः ॥ ४.६८ ॥**

**मन्युनौष्ठमालिन्ये णिव्वोलः ॥ ४.६९ ॥**

**शैथिल्य-लम्बने पयल्लः ॥ ४.७० ॥**

**निष्पाता-ऽऽच्छोटे णीलुंछः ॥ ४.७१ ॥**

**क्षुरे कम्मः ॥ ४.७२ ॥**

**चाटौ गुललः ॥ ४.७३ ॥**

**स्मरेर्झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर-पम्हुहाः ॥ ४.७४ ॥**

**विस्मुः पम्हुस-विम्हर-वीसराः ॥ ४.७५ ॥**

**व्याहृगेः कोक्क-पोक्कौ ॥ ४.७६ ॥**

**प्रसरेः पयल्लोवेल्लौ ॥ ४.७७ ॥**

**महमहो गन्धे ॥ ४.७८ ॥**

**निःसरेर्णीहर-नील-धाड-वरहाडाः ॥ ४.७९ ॥**

**नीसरइ** । लुँकि निरः - दीर्घः ॥ ४.७९ ॥

**जाग्रेर्जग्गः ॥ ४.८० ॥**

**व्याप्रेराअड्डः ॥ ४.८१ ॥**

**संवृगेः साहर-साहट्टौ ॥ ४.८२ ॥**

**आदृङेः सन्नामः ॥ ४.८३ ॥**

**प्रहृगेः सारः ॥ ४.८४ ॥**

**अवतरेरोह-ओरसौ ॥ ४.८५ ॥**

**ओअरइ** । **अ**वापोते - ओत्वम् ॥ ४.८५ ॥

**शकेश्चय-तर-तीर-पाराः ॥ ४.८६ ॥**

**सक्कइ** । **श**कादीनां द्वित्वम् ॥

**चयइ** । त्यज् । **त्यो**ऽचैत्ये - चः ॥ ४.८६ ॥

**फक्कस्थक्कः ॥ ४.८७ ॥**

**श्लाघः सलहः ॥ ४.८८ ॥**

**खचेर्वेअडः ॥ ४.८९ ॥**

[१]खचि सौत्रधातुः सम्बन्धनार्थः ॥ ४.८९ ॥

**पचेः सोल्ल-पउल्लौ[२] ॥ ४.९० ॥**

**मुचेश्छड्डा-ऽवहेड-मेल्लोस्सिक्क-रेअव-णिल्लुंछ-धंसाडाः ॥ ४.९१ ॥**

**दुःखे णिव्वलः ॥ ४.९२ ॥**

**वञ्चेर्वेहव-वेलव-जूरवोमच्छाः ॥ ४.९३ ॥**

---

१. खचि सौत्रः सम्बन्धनार्थः । अथवा खचशहेरश्वत्(?) इति एनं केचित् खचंश् इति पठन्ति - **ख.** । २. ०पउलो - **मु.** ।

**रुचेरुग्गहा-ऽवह-विडविड्डाः ॥ ४.९४ ॥**

**समारचेरुवहत्थ-सारव-समार-केलायाः ॥ ४.९५ ॥**

**सिचेः सिंच-सिंपौ ॥ ४.९६ ॥**

**सेअइ** । **युवर्णस्य** गुणः ॥ ४.९६ ॥

**प्रच्छः पुच्छः ॥ ४.९७ ॥**

**गर्जेर्बुक्कः ॥ ४.९८ ॥**

**वृषे ढिक्कः ॥ ४.९९ ॥**

**राजेरग्घ-छज्ज-सह-रीर-रेहाः ॥ ४.१०० ॥**

**मस्जेराउड्ड-णिउड्ड-बुड्ड-खुप्पाः ॥ ४.१०१ ॥**

**पुञ्जेरारोल-वमालौ ॥ ४.१०२ ॥**

पुञ्जिः सौत्रः ॥ ४.१०२ ॥

**लस्जेर्जीहः ॥ ४.१०३ ॥**

**तिजेरोसुक्कः ॥ ४.१०४ ॥**

**तेअणं** । [१]तिजि क्षमानिशानयोः । तिज्यते निशायते तेजनम्, अनट् ॥४.१०४॥

**मृजेरुग्घुस-लुंछ-पुंछ-पुंस-फुस-पुस-लुह-हुल-रोसाणाः ॥ ४.१०५ ॥**

**मज्जइ** । **ऋ**तोऽत् । **श**कादीनां द्वित्वम् ॥ ४.१०५ ॥

**भञ्जेर्वेमय-मुसुमूर-मूर-सूर-सूड-विर-पविरंज-करंज-नीरंजाः ॥ ४.१०६ ॥**

**अनुव्रजेः पडिअग्गः ॥ ४.१०७ ॥**

**अणुवच्चइ** । **व्र**जनृतमदां च्चः ॥ ४.१०७ ॥

**अर्जेर्विढवः ॥ ४.१०८ ॥**

**युजो जुंज-जुज्ज-जुप्पाः ॥ ४.१०९ ॥**

---

१. तिज् क्षमानिशानयोः । तेअणं । निशायते तेजनं अनट् - **ख.** । तेअणं । निशायते तेजनं अनट् - **क.** ।

**भुजो भुंज-जिम-जेम-कम्माण्ह-चमढ-समाण-चड्डाः ॥ ४.११० ॥**

**वोपेन कम्मवः ॥ ४.१११ ॥**

**उवभुंजइ**[१] । भुजो भुंजजिमजेम० ॥ ४.१११ ॥

**घटेर्गढः ॥ ४.११२ ॥**

**समो गलः ॥ ४.११३ ॥**

**हासेन स्फुटेर्मुरः ॥ ४.११४ ॥**

**मण्डेश्चिंच-चिंचअ-चिंचिल्ल-रीड-टिविडिक्काः ॥ ४.११५ ॥**

**तुडेस्तोड-तुट्ट-खुट्ट-खुडोक्खुडोल्लुक्क-णिलुक्क-लुक्कोल्लूराः ॥ ४.११६ ॥**

**घूर्णो घुल-घोल-घुम्म-पहल्लाः ॥ ४.११७ ॥**

**विवृतेर्ढंसः ॥ ४.११८ ॥**

**विवट्टइ** । वृत् । ते → इच् । **व्यञ्जनाद०** । **ऋवर्णस्याऽरः** । **र्त्तस्याऽधूर्त्तादौ – ट्टः** ॥ ४.११८ ॥

**क्वथेरट्टः ॥ ४.११९ ॥**

क्वथे निष्पाके । **कढइ** । **क्वथवर्द्धां ढः** ॥ ४.११९ ॥

**ग्रन्थो गंठः**[२] **॥ ४.१२० ॥**

**गंठी** । ग्रन्थश् सन्दर्भे ।[३] ग्रन्थनं ग्रन्थिः । पदिपठिपचिस्थलीत्यादिना (उणादि० ६०७) इः । सि । **अन्त्यव्यञ्जनस्य** । **अक्लीबे सौ – दीर्घः** ॥ ४.१२० ॥

**मन्थेर्घुसल-विरोलौ ॥ ४.१२१ ॥**

**ह्लादेरवअच्छः ॥ ४.१२२ ॥**

**नेः सदो मज्जः ॥ ४.१२३ ॥**

**एत्थ**[४] ।[५] अत्र । **त्रपो हिहत्थाः** । **एच्छय्यादौ** ।[६] ४.१२३ ॥

---

१. उवहुञ्जइ – **मु.** । २. ग्रन्थेर्गण्ठः – **मु.** । ३. ०सन्दर्भे । पदिपठि० – **क.ख.** । ४. (अत्ता इत्यत्र) आत्मन् । **ह्रस्वः सं०** । **अधो मन०** । **पुंस्यन आणो राजवच्च** इति बलात् **राज्ञः – आ** । **अन्त्येति** सिलुक् – **खटि.** । ५. एत्थ । एतद् । अत्र – **ग.** । ६. ०य्यादौ । **[ णुमज्जइ ]** षद्लृं । षद् निर् – पू० । **द्विन्योरुत् – उत्वम्** । **वाऽऽदौ – णु** । छिदे० – **ख.** ।

**छिदेर्दुहाव-णिच्छल्ल-णिज्झोड-णिव्वर-णिल्लूर-लूराः ॥ ४.१२४ ॥**

**छिंदइ** ।[1] छिदूंपी द्वैधीकरणे । **छिदभिदो न्दः** ॥ ४.१२४ ॥

**आङा ओअंदोद्दालौ ॥ ४.१२५ ॥**

[2]**अच्छिंदइ** । **तैलादि** द्वित्वम् । **ह्रस्वः** सं० ॥ ४.१२५ ॥

**मृदो मल-मढ-परिहट्ट-खड्डु-चड्डु-मड्डु-पन्नाडाः ॥ ४.१२६ ॥**

**स्पन्देश्चुलुचुलः ॥ ४.१२७ ॥**

**निरः पदेर्वलः ॥ ४.१२८ ॥**

**निप्पज्जइ** । **स्विदां** ज्जः ॥ ४.१२८ ॥

**विसंवदेर्विअट्ट-विलोट्ट-फंसाः ॥ ४.१२९ ॥**

**शदो झड-पक्खोडौ ॥ ४.१३० ॥**

**आक्रन्देर्णीहरः ॥ ४.१३१ ॥**

**खिदेर्जूर-विसूरौ ॥ ४.१३२ ॥**

**खिज्जइ** ।[3] खिदिंच् दैन्ये । **स्विदां** ज्जः ॥ ४.१३२ ॥

**रुधेरुत्थंघः ॥ ४.१३३ ॥**

**रुंधइ** ।[4] रुधूंपी आवरणे । **रुधो** न्धम्भौ च ॥ ४.१३३ ॥

**निषेधेर्हक्कः ॥ ४.१३४ ॥**

**क्रुधेर्जूरः ॥ ४.१३५ ॥**

**कुज्झइ** ।[5] क्रुधंच् कोपे ।[6] **युधबुधगृधक्रुधसिधमुहां** ज्झः ॥ ४.१३५ ॥

**जनो जा-जम्मौ ॥ ४.१३६ ॥**

**तनेस्तड-तड्डु-तड्डुव-विरल्लाः ॥ ४.१३७ ॥**

**तृपस्थिप्पः ॥ ४.१३८ ॥**

---

१. छिंदइ । **छिदभिदो** न्दः - **क.ख.** । २. आछिंदइ - **क.ग.** । ३. खिज्जइ । **स्विदां** ज्जः - **क.ख.** । ४. रुंधइ । रुधो० - **क.ख.** । ५. कुज्झइ । युध० - **क.ख.** । ६. ०कोपे । क्रपि कृपायाम् । **युध०** - **ग.** ।

**उपसर्पेरल्लिअः ॥ ४.१३९ ॥**

कृतगुणस्येति भणनात् **ऋ**वर्णस्याऽर इत्युपान्त्यस्याऽपि अर् ॥ ४.१३९ ॥

**सन्तपेर्झंखः ॥ ४.१४० ॥**

तपिंच् ऐश्वर्ये । **संतप्पइ** । **श**कादीनां द्वित्वम् ॥ ४.१४० ॥

**व्यापेरोअग्गः ॥ ४.१४१ ॥**

**वावेइ** । **व**र्त्तमानापञ्चमीशतृषु वा - एत्वम् ॥ ४.१४१ ॥

**समापेः समाणः ॥ ४.१४२ ॥**

**क्षिपेर्गलत्था-ऽड्डुक्ख-सोल्ल-पेल्ल-णोल्ल-छुह-हुल-परी-घत्ताः ॥ ४.१४३ ॥**

**खिवइ** । **क्षः** खः० । प्राकृतत्वान्न गुणः ॥ ४.१४३ ॥

**उत्क्षिपेर्गुलगुंछोत्थंघा-ऽल्लत्थोब्भुत्तोस्सिक्क-हक्खुवाः ॥ ४.१४४ ॥**

**आक्षिपेर्णीरवः ॥ ४.१४५ ॥**

**स्वपेः कमवस-लिस-लोट्टाः ॥ ४.१४६ ॥**

**सुवइ** ।[1] ञिष्वपंक् शये । **स्व**पावुच्च ॥ ४.१४६ ॥

**वेपेरायंबा-ऽऽयज्झौ ॥ ४.१४७ ॥**

**विलपेर्झंख-वडवडौ ॥ ४.१४८ ॥**

**लिपो लिंपः ॥ ४.१४९ ॥**

**[2]गुपेर्विर-णडौ ॥ ४.१५० ॥**

गुपच् व्याकुलत्वे । पक्षे **[ गुप्पइ ]** । **श**कादीनां द्वित्वम् ॥ ४.१५० ॥

**क्रपोऽवहो णिः ॥ ४.१५१ ॥**

**अवहावेइ** ।[3] क्रपि कृपायाम् । **णे**रदेदावावे ॥ ४.१५१ ॥

**प्रदीपेस्तेअव-संदुम-संधुक्का-ऽब्भुत्ताः ॥ ४.१५२ ॥**

**पलीवेइ** ।[4] दीपैचि दीप्तौ । **प्रदीपि**दोहदे लः ॥ ४.१५२ ॥

---

१. सुवइ । **स्व**पा० - **क.ख.** । २. गुप्येर्वि० - **मु.** । ३. ०हावेइ । **णे**रदे० - **क.ख.** । ४. ०वेइ । **प्रदीपि**० - **क.ख.** ।

**लुभेः संभावः ॥ ४.१५३ ॥**

**लुब्भइ**[१] । लुभच् गार्द्ध्ये । **श**कादीनां द्वित्वमिति प्राप्तौ **द्वि**तीयतुर्ययोरुपरि० ॥ ४.१५३ ॥

**क्षुभेः खउर-पड्डुहौ ॥ ४.१५४ ॥**

**आङो रभे रंभ-ढवौ ॥ ४.१५५ ॥**

**उपालम्भेर्झंख-पच्चार-पेलवाः ॥ ४.१५६ ॥**

**अवेर्जृम्भो जंभा ॥ ४.१५७ ॥**

**भाराक्रान्ते नमेर्णिसुढः ॥ ४.१५८ ॥**

**विश्रमेर्णिव्वा ॥ ४.१५९ ॥**

**वीसमइ**[२] । श्रमूच् खेदतपसोः । **लु**प्तयरव० - **दी**र्घः ॥ ४.१५९ ॥

**आक्रमेरोहावोत्थारच्छुंदाः ॥ ४.१६० ॥**

**भ्रमेष्टिरिटिल्ल-ढुंढुल्ल-ढंढल्ल-चक्कम्म-भम्मड-भमड-भमाड-तलअंट-झंट-झंप-भुम-गुम-फुम-फुस-ढुम-ढुस-परी-पराः ॥ ४.१६१ ॥**

**गमेरई-अइच्छा-ऽणुवज्जा-ऽवज्जसोक्कुसा-ऽक्कुस-पच्चड्डु-पच्छंद-णिम्मह-णी-णीण-णीलुक्क-पदअ-रंभ-परिअल्ल-वोल-परिअल-णिरिणास-णिवहा-ऽवसेहा-ऽवहराः ॥ ४.१६२ ॥**

**णीहम्मइ** । **र्लुकि** निरः - **दी**र्घः ॥ ४.१६२ ॥

**आङा अहिपच्चुअः ॥ ४.१६३ ॥**

**आगच्छइ** । **ग**मिष्यमासां छः ॥ ४.१६३ ॥

**समा अब्भिडः ॥ ४.१६४ ॥**

**अभ्याङोम्मत्थः ॥ ४.१६५ ॥**

**प्रत्याङा पलोट्टः ॥ ४.१६६ ॥**

**पच्चागच्छइ** । **त्यो**ऽचैत्ये - चः । **ग**मिष्य० ॥ ४.१६६ ॥

---

१. लुब्भइ । शका० - **क.ख.** । २. ०मइ । लुप्त० - **क.ख.** ।

**शमेः पडिसा-परिसामौ ॥ ४.१६७ ॥**

**रमेः संखुड्ड-खेड्डोब्भाव-किलिकिंच-कोट्टुम-मोट्टाय-णीसर-वेल्लाः ॥ ४.१६८ ॥**

**पूरेरग्घाडा-ऽग्घवोद्धुमां-ऽगुमा-ऽहिरेमाः ॥ ४.१६९ ॥**

**त्वरस्तुवर-जअडौ ॥ ४.१७० ॥**

**त्यादि-शत्रोस्तूरः ॥ ४.१७१ ॥**

अत एव सूत्रादात्मनेपदस्याऽनित्यत्वाद् वा त्वरेरात्मनेपदिनोऽपि शतृप्रत्ययः ॥ ४.१७१ ॥

**तुरोऽत्यादौ ॥ ४.१७२ ॥**

**क्षुरः खिर-झर-पज्झर-पच्चड-णिच्चल-णिट्टुआः ॥ ४.१७३ ॥**

**उच्छल उत्थल्लः ॥ ४.१७४ ॥**

**विगलेस्थिप्प-णिट्टुहौ ॥ ४.१७५ ॥**

**दलि-वल्योर्विसट्ट-वंफौ ॥ ४.१७६ ॥**

**भ्रंशेः फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्लाः ॥ ४.१७७ ॥**

**नशेर्णिरणास-णिवहा-ऽवसेह-पडिसा-सेहा-ऽवहराः ॥ ४.१७८ ॥**

पक्षे [ **नस्सइ** ] । **श**कादीनां द्वित्वम् ॥ ४.१७८ ॥

**अवात् काशो वासः ॥ ४.१७९ ॥**

**ओवासइ**[१] । काशृङ् दीप्तौ । **अ**वापोते - अव → ओ ॥ ४.१७९ ॥

**सन्दिशेरप्पाहः ॥ ४.१८० ॥**

**दृशो निअच्छ-पेच्छा-ऽवयच्छा-ऽवयज्झ-वज्ज-सव्वव-देक्खौअक्खा-ऽवक्खा-ऽवअक्ख-पुलोअ-पुलअ-निआ-ऽवआस-पासाः ॥ ४.१८१ ॥**

**पुलोएइ** । **स्व**रादनतो वा - अत् । **व**र्तमानापञ्चमीशतृषु वा - ए ॥ ४.१८१ ॥

**स्पृशः फास-फंस-फरिस-छिव-छिहा-ऽऽलुंखा-ऽऽलिहाः ॥ ४.१८२ ॥**

---

१. ओआसइ । **अ**वापोते - ओ - **क**. ।

**प्रविशे रिअः ॥ ४.१८३ ॥**

**प्रान्मृश-मुषोर्म्हुसः ॥ ४.१८४ ॥**

**पिषेर्णिवह-णिरिणास-णिरिणज्ज-रोंच-चड्डाः ॥ ४.१८५ ॥**

**पीसइ** । पिष्लृंप् संचूर्णने । रुषादीनां दीर्घः ॥ ४.१८५ ॥

**भषेर्भुक्कः ॥ ४.१८६ ॥**

**कृषेः कड्ढ-साअड्ढां-ऽचा-ऽणच्छा-ऽयंछा-ऽऽइंछाः ॥ ४.१८७ ॥**

**[ करिसइ ]** । पक्षे **वृ**षादीनामरिः ॥ ४.१८७ ॥

**असावक्खोडः ॥ ४.१८८ ॥**

**गवेषेर्ढुंढुल्ल-ढंढोल-गमेस-घत्ताः ॥ ४.१८९ ॥**

**श्लिषेः सामग्गा-ऽवयास-परिअंताः ॥ ४.१९० ॥**

**सिलेसइ** । लादिति इः । युवर्णस्य गुणः ॥ ४.१९० ॥

**म्रक्षेश्चोप्पडः ॥ ४.१९१ ॥**

**काङ्क्षेराहा-ऽहिलंघा-ऽहिलंख-वच्च-वंफ-मह-सिह-विलुंपाः ॥ ४.१९२ ॥**

**प्रतीक्षेः सामय-विहीर-विरमालाः ॥ ४.१९३ ॥**

**तक्षेस्तच्छ-चच्छ-रंप-रंफाः ॥ ४.१९४ ॥**

**विकसेः कोआस-वोसट्टौ ॥ ४.१९५ ॥**

**हसेर्गुंजः ॥ ४.१९६ ॥**

**स्त्रंसेर्ल्हस-डिंभौ ॥ ४.१९७ ॥**

**त्रसेर्डर-बोज्ज-वज्जाः ॥ ४.१९८ ॥**

**न्यसो णिम-णुमौ ॥ ४.१९९ ॥**

**पर्यसः पलोट्ट-पल्लट्ट-पल्हत्थाः ॥ ४.२०० ॥**

**निःश्वसेर्झंखः ॥ ४.२०१ ॥**

**उल्लसेरूसलोसुंभ-णिल्लस-पुलआअ-गुंजोल्ला-ऽऽरोआः ॥ ४.२०२ ॥**

**भासेर्भिसः ॥ ४.२०३ ॥**

**ग्रसेर्घिसः ॥ ४.२०४ ॥**

**अवाद् गाहेर्वाहः ॥ ४.२०५ ॥**

**ओवाहइ** । **अ**वापोते - ओत्वम् ॥ ४.२०५ ॥

**आरुहेश्चड-वलग्गौ ॥ ४.२०६ ॥**

**आरुहइ** । बाहुलकात् न **युवर्णस्य** गुण**:** ॥ ४.२०६ ॥

**मुहेर्गुम्म-गुम्मडौ ॥ ४.२०७ ॥**

**मुज्झइ** । **यु**धबुधगुधेति ज्झ**:** ॥ ४.२०७ ॥

**दहेरहिऊला-ऽऽलुंखौ ॥ ४.२०८ ॥**

**डहइ** । **दं**शदहोर्ड**:** ॥ ४.२०८ ॥

**ग्रहो [१]बल-गेण्ह-हर-पंग-निरुवारा-ऽहिपच्चुआः ॥ ४.२०९ ॥**

**क्त्वा-तुम्-तव्येषु घेत् ॥ ४.२१० ॥**

**घेत्तुं** । बाहुलकात् **व्य**ञ्जनाददन्ते न भवति । **क्त्व**स्तुमत्तूणतुआणा**:** ॥

**गेण्हिअ** । **ग्र**हो बलगेण्ह० । क्त्वा । **क्त्व**स्तुम० - अत् । **व्य**ञ्जनाद० । **ए**च्च क्त्वातुम्तव्य० ॥ ४.२१० ॥

**वचो वोत् ॥ ४.२११ ॥**

**रुद-भुज-मुचां तोऽन्त्यस्य ॥ ४.२१२ ॥**

सर्वेषु **यु**वर्णस्य गुण**:** ॥ ४.२१२ ॥

**दृशस्तेन ट्ठः ॥ ४.२१३ ॥**

**आः कृगो भूत-भविष्यतोश्च ॥ ४.२१४ ॥**

**काहीअ** । **सी**हीहीअ भूतार्थस्य ॥

**काहिइ** । **भ**विष्यति हिरादि**:** ॥ ४.२१४ ॥

---

१. ग्रहो वल० - **मु.** ।

**गमिष्यमासां छः ॥ ४.२१५ ॥**

यमूं उपरमे । आसिक् उपवेशने । **अच्छइ**[1] । **तै**लादिप्रसङ्गे **द्वि**तीयतु० । **ह्रस्वः** सं० ॥ ४.२१५ ॥

**छिदं[2]-भिदो न्दः ॥ ४.२१६ ॥**

**युध-बुध-गृध-क्रुध-सिध-मुहां ज्झः ॥ ४.२१७ ॥**

**रुधो न्ध-म्भौ च ॥ ४.२१८ ॥**

**सद-पतोर्डः ॥ ४.२१९ ॥**

**क्वथ-वर्धां ढः ॥ ४.२२० ॥**

क्वथे निष्पाके । **[ पवयकलयलो ]** । प्लवगकलकल**ः** ॥ ४.२२० ॥

**वेष्टः ॥ ४.२२१ ॥**

**समो ल्लः ॥ ४.२२२ ॥**

**वोदः ॥ ४.२२३ ॥**

**स्विदां ज्जः ॥ ४.२२४ ॥**

**सिज्जिरीए** । ष्विदांच् गात्रप्रक्षरणे । स्विद्यतीत्येवंशीला, तृन् । **शी**लाद्यर्थस्येति **र**ः[3] ॥४.२२४॥

**व्रज-नृत-मदां च्चः ॥ ४.२२५ ॥**

**रुद-नमोर्वः ॥ ४.२२६ ॥**

**रुवइ** । गुणे सति **स्व**राणां स्वराः, बाहुलकाद् वा गुणविकल्प**ः** ॥ ४.२२६ ॥

**उद्विजः ॥ ४.२२७ ॥**

**खाद-धावोर्लुक् ॥ ४.२२८ ॥**

**सृजो रः ॥ ४.२२९ ॥**

सृजंत् विसर्गे । **वोसिरामि** । व्युत्सृजामि । **इ**त् कृपादौ । **मौ** वा - आत्वम् । **गो**णादय इति व्युदो वो इत्यादेश**ः** ॥ ४.२२९ ॥

---

१. गच्छइ - **क.** । २. छिदि० - **मु.** । ३. ०स्येव - **ग.** ।

## शकादीनां द्वित्वम् ॥ ४.२३० ॥

लग् । लगे संगे । मग् । उखनखणख० । प्राकृतलक्षणप्रवृत्ते**र्नो व्य**ञ्जनस्येति[1] न भवति ॥ ४.२३० ॥

## स्फुटि-चलेः ॥ ४.२३१ ॥

## प्रादेर्मीलेः ॥ ४.२३२ ॥

[2]**सम्मीलइ** । **व**र्गेऽन्त्यो वा - म् ॥

**[ उम्मीलइ ]** । उन्मीलति । **क**गटडेति दलोपे **अ**नादौ० ॥ ४.२३२ ॥

## उवर्णस्याऽवः ॥ ४.२३३ ॥

[3]**निहवइ** । ह्नुंग्क् अपनयने । बाहुलकात् **सू**क्ष्मश्नष्णस्नेत्यभावे **अ**धोमनयाम् - नलुक् ॥ ४.२३३ ॥

## ऋवर्णस्याऽरः ॥ ४.२३४ ॥

## वृषादीनामरिः ॥ ४.२३५ ॥

## रुषादीनां दीर्घः ॥ ४.२३६ ॥

**सूसइ** । शुषंच् शोषणे ॥ ४.२३६ ॥

## युवर्णस्य गुणः ॥ ४.२३७ ॥

**मोत्तूण** । **रु**दभुजमुचां तो० ॥

**[ उड्डीणो ]** । **क्ते**नाऽप्फुण्णादयः - णो ॥ ४.२३७ ॥

## स्वराणां स्वराः ॥ ४.२३८ ॥

**चिणइ** । **चि**जिश्रुहुस्तु० - ण ॥

**रुवइ** । **रु**दनमोर्वः ॥ ४.२३८ ॥

## व्यञ्जनाददन्ते ॥ ४.२३९ ॥

**सिंचइ** । **सिचेः** सिंचसिंपौ ॥

**रुंधइ** । **रु**धो न्धम्भौ च ॥ ४.२३९ ॥

## स्वरादनतो वा ॥ ४.२४० ॥

**झाइ** । **ध्या**गोर्झागौ ॥

---

१. ०स्येति लोपो न - **ग.** । २. संमीलइ - **मु.** । ३. ह्नुङ्। निण्हवइ । हु । निहवइ - **मु.** । (तेन ज्ञायते यद् अत्र 'निहवइ' इति हुधातो रूपमिति स्वीकृतमस्ति । प्रबोधे तु ह्नुङ्धातो रूपमिति दर्शितमस्ति ।)

**जंभाइ**[1] । जभुङ् जभैङ् जृभुङ् गात्रविनामे । **अ**वेर्जृम्भो जम्भा ॥

**मिलायइ**[2] । म्लैं गात्रविनामे । [3]**स्व**राणां स्वरा इति आः । **ला**त् इति इकारः ॥

**विक्केइ** । डुक्रींग्श् द्रव्यविनिमये विपूर्वः । **क्रियः** किणो वेस्तु क्के च ॥

**होइऊण** । **ए**च्च क्त्वा० ॥[4]

**दुगुच्छइ** । **जुगुप्से**र्झुणदुगुंछ० । **व्य**ञ्जनाददन्ते इत्येतस्य धात्वन्तत्वेन धातुत्वात् **स्व**रादनतो वेत्यस्य ['अनत' इति पदाभावे] प्राप्तिः ॥ ४.२४० ॥

## चि-जि-श्रु-हु-स्तु-लू-पू-धूगां णो ह्रस्वश्च ॥ ४.२४१ ॥

**थुणइ** । **स्त**स्य थो० ॥

**उच्चेइ** । **युव**र्णस्य गुणः ॥ ४.२४१ ॥

## न वा कर्म-भावे व्वः, क्यस्य च लुक् ॥ ४.२४२ ॥

**चिणिज्जइ** । **ई**अइज्जौ क्यस्य ॥ ४.२४२ ॥

## म्मश्चेः ॥ ४.२४३ ॥

**चिम्मिहिइ** । **ए**च्च क्त्वातुम्तव्येति इः ॥ ४.२४३ ॥

## हन्-खनोऽन्त्यस्य ॥ ४.२४४ ॥

[5]**हंतव्वं** । **ङ**ञणनो व्यञ्जने ॥

**हओ** । **विं**शत्यादेर्लुक् ॥ ४.२४४ ॥

## ब्भो दुह-लिह-वह-रुधामुच्चाऽतः ॥ ४.२४५ ॥

**रुंधिज्जइ** । **रु**धो न्धम्भौ च ॥ ४.२४५ ॥

## दहो ज्झः ॥ ४.२४६ ॥

**[ डज्झइ ]** । **दं**शदहो डः ॥ ४.२४६ ॥

## बन्धो न्धः ॥ ४.२४७ ॥

## समनूपाद् रुधेः ॥ ४.२४८ ॥

---

१. जंभाइ । अवे० - **क.ख.** । २. मिलाअइ - **मु.** । ३. **आत्स**न्ध्यक्षरस्य - **दी.** । ४. ०क्त्वा० । **[ चिइच्छइ ]** । कित् निवासे कित् संशयप्रतीकारे वा, कित् । सन्-प्रत्ययः । **सन्य**ङश्च - द्वित्वम् । **कङ**श्चञ् - क → च । **क**गचजेति तलुक् । ह्रस्वात् थ्यश्चत्सप्सामनिश्चले - च्छ । दुगु० - **ख.** । ५. हन्तव्वं - **मु.** ।

## गमादीनां द्वित्वम् ॥ ४.२४९ ॥

**भुज्जइ**[१] । **भु**जो भुंज इति कृते **विं**शत्यादेर्लुक् अथवा **भुंजिज्जइ** इत्यत्र **व**क्रादावन्तः ॥ ४.२४९ ॥

## हृ-कृ-तृ-ज्रामीरः ॥ ४.२५० ॥

## अर्जेर्विढप्पः ॥ ४.२५१ ॥

पक्षे **[ विढवइ ]** । **अ**र्जेर्विढवः ॥ ४.२५१ ॥

## ज्ञो णव्व-णज्जौ ॥ ४.२५२ ॥

पक्षे **[ जाणइ ]** । **ज्ञो** जाणमुणौ ॥

**अणाइज्जइ** । **गो**णादित्वान्नञोऽत् ॥ ४.२५२ ॥

## व्याहृगेर्वाहिप्पः ॥ ४.२५३ ॥

## आरभेराढप्पः ॥ ४.२५४ ॥

पक्षे[२] **[ आढवीअइ ]** । **आ**ङो रभे रंभढवौ ॥ ४.२५४ ॥

## स्निह-सिचोः सिप्पः ॥ ४.२५५ ॥

## ग्रहेर्घेप्पः ॥ ४.२५६ ॥

**ग्र**हो बलगेण्ह० ॥ ४.२५६ ॥

## स्पृशेश्छिप्पः ॥ ४.२५७ ॥

पक्षे **[ छिविज्जइ ]** । **स्पृश**ः फासफंसफरिस० ॥ ४.२५७ ॥

## क्तेनाऽप्फुण्णादयः ॥ ४.२५८ ॥

## धातवोऽर्थान्तरेऽपि ॥ ४.२५९ ॥

**रिगइ** । **विं**शत्यादेर्लुक् ॥

**उच्चुपइ** । चुप मन्दायां गतौ ॥

**उल्लुहइ** । लुहः सौत्रो गत्यर्थः । **मृ**जेरुग्घुसलुंछपुंछेति वा ॥ ४.२५९ ॥

卐 卐 卐

१. लुभ संस्पर्शे - **खटि.** । २. रभिं राभस्ये - **खटि.** ।

## ॥ शौरसेनी-मागधी-इत्यादिभाषाः ॥

### तो दोऽनादौ शौरसेन्यामयुक्तस्य ॥ ४.२६० ॥

**[ तदो ]** । ततः । **अ**तो डो विसर्गस्य ॥

**[ पूरिदपदिञ्ञेन[1] ]** । पूरितप्रतिज्ञ । **न्य**ण्यज्ञञ्जां ञ्ञः । टा । **टा**आमोर्णः । **टा**णशस्येत् । **णो** नः ॥

**[ मारुदिना[2] ]** । मारुति । **टो** णा । **णो** नः ॥

**[ एदाहि, एदाओ ]** । टा । **ङ**सेस्त्तोदोदुहि० । **ज**स्शस्ङसित्तो० - दीर्घः ॥

**[ तधा ]** । तथा । **थो** धः ॥

**करेध** । कृग् । पंचमी ध्वम् । **ब**हुषु न्तुहमो - ह । **ऋ**वर्णस्याऽर् । **व्य**ञ्जनाद० । **व**र्तमाना-पञ्चमीशतृषु वा - ए । **इ**ह-हचोर्हस्येति हकारोपलक्षणत्वात् हस्याऽपि धः ॥

**[ राइणो ]** । राजन् । ङस् । **ज**स्शस्ङसिङसां णो । **इ**र्जस्य णोणाङौ ॥

**अय्यउत्तो** । **न** वा र्यो य्यः ॥

**सउंतले** । शकुन्तला । **वा**प ए ॥ ४.२६० ॥

### अधः क्वचित् ॥ ४.२६१ ॥

**[ महन्दो ]** । महत् । **गो**णादय इति महन्त ॥

**[ अंदेउरं ]** । अन्तर्पुर । **अ**न्त्यव्यंज० । **तो**ऽन्तरि - ए ॥ ४.२६१ ॥

### वाऽऽदेस्तावति ॥ ४.२६२ ॥

---

१. ०ञ्ञेण - **मु.** । २. मारुदिणा - **मु.** ।

## आ आमन्त्र्ये सौ वेनो नः ॥ ४.२६३ ॥

**[ भो ]** । भोस् सिद्धः । **अन्त्य**व्यं० - सलुक्[1] ॥ ४.२६३ ॥

## मो वा ॥ ४.२६४ ॥

**पवत्तेह** । प्रवर्ति । पञ्चमी त । **बहु**षु न्तुह० । **णे**रदे० ॥

**अंतेआरि** । अन्तर्चारि । **तो**ऽन्तरि - ए ॥ ४.२६४ ॥

## भवद्-भगवतोः ॥ ४.२६५ ॥

**एत्थ** । एतद् । **अन्त्य**व्यं० । ङि । **ङेः** स्सिम्मित्थाः । **त्थे** च तस्य लुक् ॥

**[ भवं ]** । भवान् । **स्वरा**णां स्वरा **वा**ऽव्ययोत्खातादाविति वा अत्वम्[2] ॥

**[ एदु ]** । इण्क् । तुव् । **दुसुमु**० । **युवर्ण**स्य गुणः ॥

**[ समणे ]** । श्रमण । सि । **अत** एत् सौ० ॥

**[ पागसासणे ]** । पाकशासन । **अनादौ** स्वरादसंयुक्तानां कखतथेति गः ॥

**[ संपाइअवं ]** । सम्पादितवान् ॥

**[ सीसो ]** । शिष्यः । **लुप्त**यरवेति दीर्घः ॥

**[ कयवं ]** । कृतवान् ॥

**[ काहं ]** । कृग् । स्यामि । **कृ**दो हं । **आ** कृगो० ॥ ४.२६५ ॥

## न वा र्यो य्यः ॥ ४.२६६ ॥

**[ पय्याकुलीकदम्हि ]** । पर्याकुलीकृताऽस्मि । असक् । मिव् । **तृतीय**स्य मिः । **मिमो**मैर्म्हिम्होम्हा वा - अस्तेर्मिना सह म्हि । **ह्रस्वः** सं० ॥

पक्षे **द्यय्यर्यां** जः ॥ ४.२६६ ॥

## थो धः ॥ ४.२६७ ॥

स्थामन् । स्थेयस् → **थामं** । **थेओ** ॥ ४.२६७ ॥

---

१. लुक् । **[ कंचुइआ ]** । कञ्चुक । सुख । कञ्चुकमस्याऽस्ति, सुखमस्याऽस्ति, **अतो**ऽनेकस्वरात् - इन् । **अवर्णे**व० - अलोपः । आत्वम् । **मो** वा - **ख.** । २. अत्वम् । **[ चिंतेदि ]** । चित(तु)ण् स्मृत्यां, चित् । णिग् । इण्क् । **त्या**दीनामितीच् । **दिरिचेचोः** - इच् → दिः । **णे**रदेदावावे - **ख.** ।

## इह-हचोर्हस्य ॥ ४.२६८ ॥

**होध** । **भु**वेर्हो० । **म**ध्यमस्येत्थाहचौ - ह ॥

**परित्तायध** । त्रैङ् । पञ्चमी ध्वम् । **ब**हुषु न्तुहमो । हच उपलक्षणपरत्वात् हस्याऽपि धः । **स्व**रादनतो वा - अ । **अ**वर्णो यश्रुतिः ॥ ४.२६८ ॥

## भुवो भः ॥ ४.२६९ ॥

**भोदि** । **भु**वेर्हो० । तिव् → इच् । **दि**रिचेचोः - दिः ॥ ४.२६९ ॥

## पूर्वस्य पुरवः ॥ ४.२७० ॥

## क्त्व इय-दूणौ ॥ ४.२७१ ॥

**भविय** । **भु**वेर्हवः । **भु**वो भः ॥

**रंदूण**[1] । **मो**ऽनुस्वार इति बाहुलकादनन्त्यस्याऽपि ।

पक्षे **तै**लादौ - द्वित्वम् ॥

**पढित्ता** । **व्य**ञ्जनाद० । **ए**च्च क्त्वा० ॥

**रन्ता** इत्यत्र बाहुलकाद् न **व्य**ञ्जनाददन्ते ॥ ४.२७१ ॥

## कृ-गमो डडुअः ॥ ४.२७२ ॥

## दिरिचेचोः ॥ ४.२७३ ॥

**[ नेदि ]** । **यु**वर्णस्य गुणः ॥

**देदि** । **स्व**राणां स्वराः ॥ ४.२७३ ॥

## अतो देश्च ॥ ४.२७४ ॥

**अच्छदे** । आसिक् । **ग**मिष्यमासां छः । **तै**लादि च्छः ॥

**किज्जदि** । **ई**अइज्जौ क्यस्य । **लु**गिति ऋलुक् ॥

**वसुआदि** । **उ**द्वाकेरोरुम्मावसुआः ॥ ४.२७४ ॥

---

१. रन्दूण - मु. ।

## भविष्यति स्सिः ॥ ४.२७५ ॥

**[ भविस्सिदि ]**। ष्यति → इच्। **दिरिचेचोः**। अनेन स्सि। **व्यञ्जनाद०**। **एच्च क्त्वा०** ॥ ४.२७५ ॥

## अतो ङसेर्डादो-डादू ॥ ४.२७६ ॥

एवार्थे **य्येव** ॥

**दूरादु** । **ङसेस्त्तोदोदु०** । **जस्शस्ङसि०** - दीर्घः ॥[१] ४.२७६ ॥

## इदानीमो दाणिं ॥ ४.२७७ ॥

**दाणि** । **मांसादेर्लुक्** ॥

**आणवेदु** । आज्ञापि । पञ्चमी तु । **दुसुमु** विध्यादिषु० । **णेरदेदा०** - ए । **स्वराणां स्वराः** । **म्नज्ञोर्णः** ॥

**[ अन्नं ]** । अन्या । अम् । **ह्रस्वोऽमि** । **अमोऽस्य** ॥ ४.२७७ ॥

## तस्मात् ताः ॥ ४.२७८ ॥

**एदिणा** । एतद् । टा । **इदमेतत्कियत्तद्भ्यष्टो डिणा** । **तो** दोऽनादौ० ॥ ४.२७८ ॥

## मोऽन्त्याण्णो वेदेतोः ॥ ४.२७९ ॥

**इमं** । इदम् । सि । **इदमः** इमः ॥

**इणं** । इदम् । सि । **क्लीबे** स्यमेदमिणमो चेति इणं ॥

**[ सरिसं ]** । सदृश । **दृशः** क्विप्टक्सकः - रिः ॥

**एदं** । एतद् । **अन्त्यव्यं०** । **तो** दोऽनादौ० - द । सि । **क्लीबे** स्वरान्म् सेः । **मोऽनुस्वारः** ॥ ४.२७९ ॥

## एवार्थे य्येव ॥ ४.२८० ॥

**[ बंभणस्स ]** । ब्राह्मण । **ङसः** स्सः । **ह्रस्वः** सं० । **म्हो** म्भो वा ॥

**सो, एसो** । **तदश्च** तः सो० । **वैतत्तदः** । सेर्डो ॥ ४.२८० ॥

---

१. (इदमत्र चिन्त्यम् - 'दूरादु' इति वस्तुतः 'डादु'-आदेशस्योदाहरणम् । प्रक्रिया त्वत्राऽन्यथैव प्रदर्श्यते इति । डादु-आदेशग्रहणे **डित्यन्त्यस्वरादेरिति** सूत्रस्य प्रवृत्तिः ।)

## हञ्जे चेट्याह्वाने[1] ॥ ४.२८१ ॥

## हीमाणहे विस्मय-निर्वेदे ॥ ४.२८२ ॥

**[ जीवंतवश्चा[2] ]** । जीवद्वत्सा । जीव प्राण० । **शत्रा**नश इति न्त । **ह्रस्वात्** थ्यश्चत्सप्सेति छ । **छस्य** श्चोऽनादौ ॥

**पलिस्संता** । परिश्रान्त । **जस्शसोर्लुक्** । **जस्शस्ङसित्तोदो**० - दीर्घः । **रसोर्लशौ** ॥

**हगे** । वयम् । **अहं**वयमोर्हगे ॥

**[ नियविधिणो ]** । निजविधि । **ङसिङसोः** पुंक्लीबे वा - णो ॥ ४.२८२ ॥

## णं नन्वर्थे ॥ ४.२८३ ॥

**पुढुमं** । प्रथम । **प्र**थमे पथोर्वा - उ । **मे**थिशिथिरेति ढः ॥

**[ आणत्तं ]** । आज्ञप्त । **म्न**ज्ञोर्णः ॥

**भवं** । भवान् । **भव**द्भगवतोर्म ॥

**[ अग्गदो ]** । अग्रतः । **अ**तो डो० ॥[3]

**[ त्थु ]** । अस्तु । **स्तस्य** थो० । **आर्षत्वादाद्याकारलुक्** ॥ ४.२८३ ॥

## अम्महे हर्षे ॥ ४.२८४ ॥

**[ एआए ]** । एतद् । **अन्त्यव्यं**० । आप् । टा । **टाङस्ङेरदादि**० ॥

**[ सुम्मिलाए ]** । सूर्मिलया ॥

**[ सुपलिगढिदो ]** । सुपरिघटित । **घटेर्गढः** । **रसोर्लशौ** ॥ ४.२८४ ॥

## हीही विदूषकस्य ॥ ४.२८५ ॥

**[ मणोरधा ]** । मनोरथा । **थो** धः ॥ ४.२८५ ॥

## शेषं प्राकृतवत् ॥ ४.२८६ ॥

* * *

## अत एत् सौ पुंसि मागध्याम् ॥ ४.२८७ ॥

**[ एशे ]** । एतद् । **अन्त्यव्यं**० । सि । **तदश्च** तः सो० । **रसोर्लशौ** ॥

---

१. **[ चदुरिके ]** । चदुरिका । सि । **वाप** ए । **अन्त्यव्यं**० - सिलुक् - **खटि.** । २. जीवन्तवच्छा - **मु.** । ३. **अतो** डो० । **[ नमो ]** । नमः । **अतो** डो० । अस्तु - **क. ख.** ।

**[ मेशे ]** । मेष । **शषोः** सः । **रसोर्लशौ** ।

**[ पुलिशे ]** । पुरुष । **पुरुषे** रोः - इः ॥

**[ भंते ]** । भदन्त । **आर्षत्वाद् गोणादित्वाद्** वा सस्वरदकारलोपः ॥

**[ पोराणं ]** । पुराणस्येदं पौराणम् ॥

**[ तारिसे ]** । तादृश । **दृशः** क्विप्टक्सकः - रिः ॥

**[ जिइंदिए ]** । जितेन्द्रिय । **ह्रस्वः** सं० ॥ ४.२८७ ॥

## र-सोर्ल-शौ ॥ ४.२८८ ॥

**[ लहश-वश-नमिल-शुल-शिल-विअलिद-मंदाल-लायिदंहियुगे ]** । रभस-वश-नम्र-सुर-शिरो-विगलित-मन्दार-राजितांऽह्रियुग । **शषोः** सः । ततोऽनेन लशौ । **शीला**-द्यर्थस्येर इति रस्य इरः । **अन्त्यव्यञ्ज**० - शिरस्-सलुक् । **तो** दो० । **ह्रस्वः** सं० ॥

**[ वीलयिणे ]** । वीरजिन । **जद्ययां** यः ॥

**[ पक्खालदु ]** । प्रक्षालयतु । क्षलण् शौचे । णिच् । तु । **दुसुमु**० । **णेरदेदावावे**० । **अदेर्लुक्यादे**० । **क्षस्य** खः० ॥

**[ शयलम् ]** । सकल । अम् । **अमोऽस्य** । **वा** स्वरे मश्च ॥

**[ अवय्ययंबालं ]** । अवद्यजम्बाल । **जद्ययां** यः । **अनादौ**० ॥ ४.२८८ ॥

## स-षोः संयोगे सोऽग्रीष्मे ॥ ४.२८९ ॥

**[ बुहस्पदी ]** । बृहस्पति । **वा** बृहस्पतौ - उः ॥

**[ मस्कली[१] ]** । मस्करिन् ॥

**उस्मा** । उष्मन् । **अन्त्यव्यं**० । सि । **पुंस्यन** इत्यतिदेशाद् **राज्ञ** इत्यात्वम् । **ह्रस्वः** सं० । सेरन्त्यव्यं० ॥ ४.२८९ ॥

## ट्ट-ष्ठयोस्स्टः ॥ ४.२९० ॥

१. मस्करी - **ग.** ।

## स्थ-र्थयोस्तः ॥ ४.२९१ ॥

**अस्तवदी** । अर्थपति ॥

**शस्तवाहे** । सार्थवाहः ॥ ४.२९१ ॥

## ज-द्य-यां यः ॥ ४.२९२ ॥

**याणदि** । **ज्ञो** जाणमुणौ ॥

**[ अय्युणे ]** । अर्जुन । **अ**नादौ शेषा० ॥

**गय्यदि** । गर्ज् । तिव् → इच् । **व्य**ञ्जनाद० । **अ**तो देश्चेति दिः ॥ ४.२९२ ॥

## न्य-ण्य-ज्ञ-ञ्जां ञ्ञः ॥ ४.२९३ ॥

**[ अञ्ञदिशं ]** । अन्या चाऽसौ दिक् च । **दिक्**प्रावृषोः सः । पुंवत्[१] ॥

**[ कञ्ञकावलणं ]** । कन्यकावरणम् ॥

**[ पुञ्ञवंते ]** । पुण्यवत् । **आल्विल्लो**ल्लालवंतमंतेति वंतः ॥ ४.२९३ ॥

## व्रजो जः ॥ ४.२९४ ॥

## छस्य श्चोऽनादौ ॥ ४.२९५ ॥

**पुश्चदि**[२] । **प्रच्छः** पुच्छः । **अ**तो देश्च ॥

**[ आवन्नवश्चले ]** । आपन्नवत्सल । **हृ**स्वात् थ्यश्चत्सप्सामिति छः ॥

**[ तिरिच्छि ]** । **ति**र्यचस्तिरिच्छिः ॥

**[ पेस्कदि ]** । प्रेक्षते । **स्कः** प्रेक्षाचक्षोः ॥

**छाले** । **छा**गे लः ॥ ४.२९५ ॥

## क्षस्य •कः । ४.२९६ ॥

## स्कः प्रेक्षा-ऽऽचक्षोः ॥ ४.२९७ ॥

---

१. **पुंव**त्कर्मधारये - **ख.** । २. **[ गश्च गश्च ]** । गम् । पं० हि । **ग**मिष्यमासां छः । दुसुमु विध्यादि इति । **अ**त इज्जस्विज्जहीति सुलुक् । पदेन श्च । **अस**कृत्० ॥ **पुश्चदि - ख.** ।

## तिष्ठश्चिष्टः ॥ ४.२९८ ॥

## अवर्णाद् वा ङसो डाहः ॥ ४.२९९ ॥

**[ एलिशाह ]** । ईदृशस्य । **एत्** पीयूषापीडेति एः । **दृशः** क्विप्टक्० - रिः ॥

**पश्चादो** । पश्चात् । **अन्त्यव्यं०** । ङसि । **ङसेस्त्तोदोदुहिहिंतो०** ॥

**हिंडीयदि**[1] । हिडुङ् गतौ । ते → इच् । क्य । **ईअइज्जौ** क्यस्य ॥

**[ हिंडिबाए ]** । हिडिम्बा । ङस् । **टाङस्ङेरदादि०** ॥

**[ घुडुक्कयशोके**[2] **]** । घटोत्कचशोक । **स्वराणां** स्वराः - घुः । **ह्रस्वः** सं० ॥ ४.२९९ ॥

## आमो डाहँ वा ॥ ४.३०० ॥

**[ तुम्हाहँ, अम्हाहँ ]** । युष्मद्, अस्मद् । **पक्ष्मश्मष्मस्म०** । **अन्त्यव्यं०**[3] । **युष्मद्यर्थपरे** तः ॥

**[ सरिआहँ ]** । सरित् । **स्त्रियामादविद्युतः** - आः ॥ ४.३०० ॥

## अहं-वयमोर्हगे ॥ ४.३०१ ॥

## शेषं शौरसेनीवत् ॥ ४.३०२ ॥

**[ शामिपशादाय ]** । स्वामिप्रसादाय । **तादर्थ्य०** इत्यस्य पक्षे **ङेङस्योर्यातौ** । **अत** आः स्यादौ० ॥

**महंदे** । महत् । **गोणादयः** - न्त । **अधः** क्वचित् - दः । सि । **अत** एत् सौ० ॥

**मालेध** । मृत् । णिच् । **ऋवर्णस्याऽरः** - अर् । पञ्चमी ध्वम् । **बहुषु** न्तुह० । **णेरदेदा०** - ए । **अदेल्लुक्यादे०** । हच उपलक्षणत्वा**दिहहचोर्हस्येति** हस्याऽपि धः । एवं **[ धलेध ]**। धरेत ॥

**अयं** । **पुंस्त्रियोर्न** वाऽयमिमिआ सौ ॥

**[ शे ]** । **वेदंतदेतदो** ङसाम्भ्यां सेसिमौ ॥

**अप्पणो** । **जस्शस्ङसिङसां** णौ ॥

---

१. हिंडीअदि - **मु.** । २. घडुक्कयशोके - **मु.** । ३. (वस्तुतः 'डाहँ' इत्यस्य डित्त्वात्, **डित्यन्त्यस्वरादेरित्यनेन** स्वयमेव युष्मदस्मत्स्थ - 'अत्' इत्यस्य लोपे जायमाने, **अन्त्यव्यञ्जनस्येति** सूत्रस्याऽत्र काऽऽवश्यकतेति चिन्त्यम् ।)

**[ प●कं ]** । पक्ष । **क्षस्य ●कः** ॥

**उज्झिय** । उज्झत् । क्त्वा । **क्त्व** ईयदूणौ ॥

**[ कुंभिला ]** । कुम्भिल । सि । **डो**दीर्घौ वेति दीर्घः । **अन्त्यव्यं०** - सिलुक्[1] ॥

**ऊशलधं**[2] । सृं उत्पूर्वः । पञ्चमी त । **ऋ**वर्णस्याऽरः । **व्यञ्ज**नाद० । **ब**हुषु न्तुहमो । **इ**हहचो०-धः । **अ**नुत्साहोत्सन्ने० - ऊ । **रसो**र्लशौ ॥

**बम्हणे एशे( शे )** । **लु**गिति ब्राह्मणैकारलुक् ॥

**[ त्ति ]** । इति । **इतेः** स्वरात्तश्च द्विः ॥

**लञ्ञा** । राज्ञा । **ह्रस्वः** सं० । **न्यण्य**ज्ञञ्जां ञ्जः ।

**[ दिण्णे ]** । दत्त । **प**ञ्चाशत्पञ्चदशदत्ते - णः । **इः** स्वप्नादौ ॥

**[ पेस्किदुं ]** । प्रेक्षितुम् । **स्कः** प्रेक्षाचक्षोः ॥

**शुणीअदे** । **चि**जिश्रुहुस्तु० - णः । **ई**अइज्जौ क्यस्य ॥

**ता** । **त**स्मात्ता ॥

**[ कहिं ]** । किम् । ङि । **किमः** कस्त्रतसोश्च । **न** वाऽनिदमेतदो हिं ॥

**[ दाणि ]** । **इ**दानीमो दाणिं । **मां**सादेर्वा ॥

**लायाणो** । राजन् । **ज**स्शस्ङसिङसां णो । **ज**स्शस्ङसित्तोदो० ॥ ४.३०२ ॥

* * *

## ज्ञो ञ्जः पैशाच्याम् ॥ ४.३०३ ॥

**[ सञ्ञा ]** । संज्ञा । **विं**शत्यादेर्लुक् ॥

**ञानं** । ज्ञान । **नो** ण इति न प्रवर्तते, न **क**गचजादिषट्शम्यन्तसूत्रोक्तमिति निषेधात् ॥ ४.३०३ ॥

## राज्ञो वा चिञ् ॥ ४.३०४ ॥

## न्य-ण्योर्ञ्ञः ॥ ४.३०५ ॥

---

१. सिलुक् । **[ कधेहि ]** कथ् । णिग् । हि । **दु**सुमु० - सु । **सो** हिर्वा - हि । **व**र्त्तमानापञ्चमीति एत्वम् ॥ ऊशलध - ख. । २. ओशलध - **मु.** ।

**णो नः ॥ ४.३०६ ॥**

**तदोस्तः ॥ ४.३०७ ॥**

**[ सतं ]** । शतं । **शषोः** सः ॥

**होतु** । दुसुमु इति दुः ॥

**पताका** । **प्र**त्यादौ० - डप्राप्तिः ॥

**[ वेतिसो ]** । वेतस । **इः** स्वप्नादौ । **इ**त्वे वेतसे - तस्य डप्राप्तिः ॥ ४.३०७ ॥

**लो ळः ॥ ४.३०८ ॥**

**श-षोः सः ॥ ४.३०९ ॥**

**सोभति** । शुभि । ते → इच् । **व्य**ञ्जनाद० । **यु**वर्णस्य गुणः । **न** कगचजादिषट्शम्यन्तेति निषेधात् **ख**धथधभामिति हो न भवति । **आ**त्तेश्चेति ति ॥

**किसानो** । कृषाण । **इ**त् कृ० । **णो** नः ॥ ४.३०९ ॥

**हृदये यस्य पः ॥ ४.३१० ॥**

**[ हितपकं ]** । हृदय । **स्वा**र्थे कश्च वा ॥

**चिंतयमानी** । चितुण् । नोऽन्तः । णिच् । शतृ → अत् । गुण - अय् । क्रिया० स्यत् । **न्त**माणौ - माण । **णो** नः । **अ**जातेः पुंसः - ङी । ४.३१० ॥

**टोस्तुर्वा ॥ ४.३११ ॥**

**क्त्वस्तूनः ॥ ४.३१२ ॥**

**द्धून-त्थूनौ ष्ट्वः ॥ ४.३१३ ॥**

**[ नद्धून ]** । नंष्ट्वा । **विं**शत्यादेर्लुक् ॥

**[ तद्धून ]** । दृष्ट्वा । **ऋ**तोऽत् । **त**दोस्तः ॥ ४.३१३ ॥

**र्य-स्न-ष्टां रिय-सिन-सटाः क्वचित् ॥ ४.३१४ ॥**

**[ सुनुसा ]** । स्नुषा । **गो**णादित्वान्नात् प्राक् उः ॥

**[ तिट्ठो ]** । दृष्ट । **इ**त् कृपादौ । **ष्ट**स्याऽनुष्ट्रेष्टा० । **त**दोस्तः ॥ ४.३१४ ॥

## क्यस्येय्यः ॥ ४.३१५ ॥

**[ गिय्यते, दिय्यते ]** । गैं दा च । ते → इच् । क्य । **लु**गिति ऐकाराकारयोर्लुक् । **आ**त्तेश्च ॥ ४.३१५ ॥

## कृगो डीरः ॥ ४.३१६ ॥

**[ पुधुमतंसने ]** । प्रथमदर्शन । **प्र**थमे पथोर्वा - उं[1] । **थो** धः । **व**क्रादावन्तः ॥ ४.३१६ ॥

## यादृशादेर्दुस्तिः ॥ ४.३१७ ॥

**[ केतिसो, एतिसो ]** । कीदृश, ईदृश । **एत्** पीयूषापीडेति एः ॥ ४.३१७ ॥

## इचेचः ॥ ४.३१८ ॥

**[ वसुआति ]** । उद्वाकेरोरुम्मावसुआः ॥

**नेति** । **यु**वर्णस्य गुणः ॥

**तेति** । डुदांग्क् । **स्व**राणां स्वराः - ए । **त**दोस्तः ॥ ४.३१८ ॥

## आत् तेश्च ॥ ४.३१९ ॥

**[ अच्छते, गच्छते ]** । आसिक्, गम् । **ग**मिष्यमासां छः ॥ ४.३१९ ॥

## भविष्यत्येय्य एव ॥ ४.३२० ॥

**तं** । तद् । **अ**न्त्यव्यं० । अम् । आप् । **ह्र**स्वोऽमि । **अ**मोऽस्य ॥

**[ हुवेय्य ]** । **भु**वेर्होहुव० । **लु**गित्यलुक् ॥ ४.३२० ॥

## अतो ङसेर्डातो-डातू ॥ ४.३२१ ॥

**तीए** । **किं**यत्तदोऽस्यमामि - ङी । **टा**ङस्ङेरदादिदे० ॥ ४.३२१ ॥

## तदिदमोष्टा नेन, स्त्रियां तु नाए ॥ ४.३२२ ॥

**[ तत्थ ]** । तत्र । **त्र**पो हिहत्थाः ॥

**[ कतसिनानेन ]** । कृतस्नान । **ऋ**तोऽत् । **त**दोस्तः । **र्य**स्नष्टां रियसिनसटाः । **टा**आमोर्णः । **टा**णशस्येत् । **णो** नः ॥

---

१. उ । **निशीथपृथिव्योर्वेति** थस्य ढः (?) । **थो** धः - **ग.** ।

**[ पातग्गकुसुमप्पतानेन ]** । पादाग्रकुसुमप्रदान । **त**दोस्तः । **ह्रस्वः** सं० ॥ ४.३२२ ॥

## शेषं शौरसेनीवत् ॥ ४.३२३ ॥

**[ अध ]** । अथ । **थो** धः ॥

**[ भगवं ]** । भगवान् । **वा**ऽव्ययोत्खातादा० । **भ**वद्भगवतोः - म् ॥

**[ एत्थ ]** । अत्र । **त्र**पो हिहत्थाः । **ए**च्छय्यादौ ॥

**हुवेय्य** । **भ**विष्यत्येय्य एव ॥

**[ एतिसं ]** । ईदृश । **एत्** पीयूषापीड० । **या**दृशादेर्दुस्तिः ॥

**[ यति ]** । यदि । **आ**देर्यो जः । **ज**द्ययां यः ॥

**[ मं ]** । इदम् । अम् । **इ**दम इमः । **अ**मोऽस्य । **त्य**दाद्यव्ययात् तत्स्वरस्य लुगिति इलुक् ॥

**[ राजं ]** । राजन् । **मो** वा ॥

**[ दाव ]** । तावत् । **वा**देस्तावति - दः ॥

**लोक** । लोकृङ् । स्व । **दु**सुमु० । **व्य**ञ्जनाद० । **अ**त इज्जस्विज्ज० - लुक् ॥ ४.३२३ ॥

## न कगचजादि-षट्शम्यन्तसूत्रोक्तम् ॥ ४.३२४ ॥

**तेवरो** । देवर । **त**दोस्तः ॥ ४.३२४ ॥

* * *

## चूलिकापैशाचिके तृतीय-तुर्ययोराद्य-द्वितीयौ ॥ ४.३२५ ॥

## रस्य लो वा ॥ ४.३२६ ॥

**पनमथ** । नम् । पञ्चमी त । **ब**हुषु न्तुहमो - ह । **इ**हहचोर्हस्येति उपलक्षणत्वात् ध । ततश्चूलिकापैशाचिके तृतीयतुर्ययोराद्यद्वितीयौ ॥

**[ पनय ]** । प्रणय । **णो** नः ॥

**[ पकुप्पित ]** । प्रकुपित । **श**कादीनां द्वित्वम् ॥

**[ गोली ]** । गौरी । **औ**त ओत्[१] ॥

---

१. अउः पौरादौ च द्विः, अनेन ह्रस्वः (?) - **खटि.** ।

**[ तससु ]** । दशसु । **त**दोस्तः ॥

**[ नखतप्पनेसु ]** । नखदर्पणेषु ॥

**[ एकातसतनुथलं ]** । एकादशतनुधर । **चू**लिकापैशाचिके इति धस्य थः ॥

**नच्चंत[ स्स ]** । नृत् । **ऋ**तोऽत् । **व्र**जनृतमदां च्चः । **श**त्रानशः - न्त ॥

**[ लीलापातुक्खेवेन ]** । लीलापादोत्क्षेपेण । **पो** व इति **न** कगचजादिषट्शम्यन्तेति निषिद्धोऽपि बाहुलकाद् भवति ॥

**[ कंपिता ]** । कम्पिता ॥

**[ वसुथा ]** । वसुधा ॥

**उत्थलंति**[1] । **उ**च्छलः उत्थल्लः ॥

**[ सइला ]** । शैल । **वै**रादौ वा - अइ ॥

**निपतंति** । **श**दपतोर्ड इत्यस्य बाधनार्थं **त**दोस्तः ॥ ४.३२६ ॥

**नाऽऽदि-युज्योरन्येषाम् ॥ ४.३२७ ॥**

**शेषं प्राग्वत् ॥ ४.३२८ ॥**

卐 卐 卐

१. उच्छलंति - **क.** ।

## ॥ अपभ्रंश-भाषा ॥

### स्वराणां स्वराः प्रायोऽपभ्रंशे ॥ ४.३२९ ॥

[ **कच्चु** ] । काच । **से**वादौ वा - द्वित्वम् । सि । **स्यम**मोरस्योत् - उः । **स्यम्**जस्शसां लुक् ।[१] अनेन वा अत्वम् ॥

[ **वेण** ] । वीणा । सि । **स्यम्**जस्शसां लुक् । **स्या**दौ दीर्घह्रस्वौ ॥

[ **बाह** ] । बाहु । अनेन उकारस्य अत्वम् आत्वं च ॥

[ **पट्ठि, पिट्ठि, पुट्ठि** ] । पृष्ट । **जाते**रयान्त० - ङी । **लु**गित्यलुक् । अनेन ऋतः अ-इ-उ । **स्या**दौ दीर्घह्रस्वौ ॥

[ **तिणु** ] । तृण । **स्यम**मोरस्योत् - उः ॥

[ **सुकिदु** ] । सुकृत । **स्यम**मोरस्योत् । **अ**नादौ स्वरादसंयुक्तानां कखतथपफां गघदधबभाः ॥

[ **किन्नउ, किलिन्नउ**[२] ] । **अ**डडडुल्लाः स्वार्थिककलुक् चेति अः । अनेन लृकारस्य इः । पक्षे **लृ**त इलिः क्लृप्तक्लिन्ने । **स्यम**मोरस्योत् ॥

[ **लेह** ] । लेखा । **स्या**दौ दीर्घह्रस्वौ ॥ ४.३२९ ॥

### स्यादौ दीर्घ-ह्रस्वौ ॥ ४.३३० ॥

[ **ढोल्ला** ] । प्रिय । **शी**घ्रादीनां बहिल्लादय इति ढोल्ल ॥

[ **धण** ] । [प्रिया] । **शी**घ्रादीनां० - धण ॥

[ **चंपावण्णी** ] । चम्पकवर्ण । **अ**जातेः पुंसः - ङी । **क**गचजेति कलुक् । **स्व**राणां स्वरा इति वचनस्य व्याप्त्यर्थत्वात् पकाराऽकारस्य ककाराऽकारेण सह आकारः ॥

---

१. ०लुक् । अनेन ऋतः - **ग.** । २. किन्नओ, किलिन्नओ - **मु.** ।

**[ णाइ ]** । **इ**वार्थे नंनउनाइनावइजणिजणवः ॥

**[ कसवट्टइ ]** । कषपट्टक । **अ**डडडुल्लाः स्वार्थिककलुक् चेति अः कलुक् च । **ङि**नेच्चेति ङिना सह अकारस्य इकारः ॥

**[ दिण्णी ]** । [दत्त] । **स्व**राणां स्वराः० - इ । **प**ञ्चाशत्पञ्चदशदत्ते । **अ**जातेः पुंसः - ङीः ॥

**मइं** । अस्मद् । टा । **टा**ङ्यमा मइं ॥

**तुहुं** । **यु**ष्मदः सौ तुहुं ॥

**[ वारिआ ]** । वारित । **स्या**दौ दीर्घह्रस्वौ ॥

**[ कुरु ]** । डुकृंग् । हि । **हि**स्वयोरिदुदेत् - उः । **ऋ**वर्णस्याऽरः ॥

**[ दीहा ]** । दीर्घ । अनेन दीर्घत्वम् ॥

**[ माणु ]** । मान । **स्य**मोरस्योत् ॥

**[ निद्दए ]** । निद्रा । **वा**ऽधो रो लुक् । टा । **ट** ए । अनेन ह्रस्वः ॥

**गमिही** । गम् । स्यति → इच् । **भ**विष्यति० - हि । **व्य**ञ्जनाद० । **स्व**राणां स्वराः प्रायो० - इः । **प**दयोः सन्धिर्वेति क्वचिदेकपदेऽपीति दीर्घः ॥

**[ रत्तडी ]** । रात्रि । **स्व**राणां स्वराः प्रायो० । **वा**ऽधो रो लुक् । **अ**डडडुल्ला इति डड । **डित्य**न्त्यस्वरादेः । **स्त्रि**यां तदन्ताड्डीः । **डित्य**न्त्य० । **स्य**म्जस्शसां लुक् ॥

**[ दडवड ]** । अवस्कन्द । **शी**घ्रादीनां बहिल्लेति दडवड ॥

**[ विहाणु ]** । विभातस्य विहाण । सि । **स्य**मोरस्योत् ॥

**[ बिट्टीए ]** । **शी**घ्रादि बिट्टी । **स्वार्थे** कश्च वा । आप् । सि । **वा**प ए । **स्य**म्जस्शसां लुक् ॥

**[ मइं ]** । अस्मद् । **टा**ङ्यमा मइं ॥

**[ वंकी ]** । वक्र । **व**क्रादावन्तः । **वा**धो रो लुक् । **अ**जातेः पुंसः - ङीः । **लुक्** । अम् । **स्य**म्जस्शसां लुक् ॥

**[ दिट्ठी ]** । दृष्टि । **स्व**राणां स्वराः० - इ । **ष्ट**स्याऽनुष्ट्रेष्टा० - ठः । **स्य**म्जस्शसां लुक् - अम्-लुक् ॥

**[ सकण्णी ]** । सकर्ण्य । **अ**जातेः पुंसः - ङीः । **लु**गित्यलुक् ॥

**[ भल्लि ]** । भल्ली । अनेन ह्रस्वः ॥

**[ जिवँ ]** । यथा । **क**थंयथातथां थादेरेमेति थास्थाने डित इमः । **मो**ऽनुनासिको वो वेति वँ ॥

**[ हिअइ ]** । हृदय । **स्व**राणां स्वरा० - इः । ङि । **ङि**नेच्च - इः ॥

**[ पइट्ठि ]** । प्रविष्टा । सि । अनेन ह्रस्वः । **स्यम्**जस्शसां लुक् । **स्व**राणां स्वराः० - इ ॥

**[ एइ ]** । एतद् । जस् । **एइः** जस्शसोः ॥

**[ ति ]** । तद् । **अ**न्त्यव्यं० । जस् । **अतः** सर्वादेर्डेर्जसः । अनेन ह्रस्वः ॥

**[ घोडा ]** । घोटक । **टो** डः । **क**गचजेति कलुक् । जस् । **स्यम्**जस्शसां लुक् । अनेन दीर्घः । ततः **स्व**राणां स्वरा इति बहुवचनस्य व्याप्त्यर्थत्वादाकारेण सह डकाराऽकारस्य आकारः ॥

**[ एह ]** । एतद् । सि । **ए**तदः स्त्रीपुंक्लीबे एहएहोएहु ॥

**[ थलि ]** । स्थली । सि । **स्यम्**जस्शसां लुक् । अनेन ह्रस्वः ॥

**खग्ग** । अत्र प्रायिकत्वान्न दीर्घः ॥

**[ एत्थु ]** । अत्र । **ए**त्थु कुत्रात्रे ॥

**[ मुणीसिम ]** । मनुष्यत्व । **स्व**राणां स्वराः० - अस्य उत्वम्, उकारस्य ईत्वं च । **अ**धो मन० । **शषोः** सः । **त्व**स्य डिमा० । **स्या**दौ दी० ॥

**जाणिअइ** । **ज्ञो** जाणमुणौ । **ई**अइज्जौ इति कृते **स्व**राणां स्वराः प्राय इति ह्रस्वः ॥

**[ जो ]** । यद् । **अ**न्त्यव्यं० । सि । **सौ** पुंस्योद् वा । **आ**देर्यो जः ॥

**[ न वि ]** । अपिशब्द एवार्थे अथवा **प्या**दय इति एवार्थे विरित्यव्ययम् ॥

**वालइ** । वलि वल्लि संवरणे । णिग् । तिव् → इच् । **णे**रदेदा० - अत् । **अ**देल्लुक्यादेरत आ ॥

**[ वग्ग ]** । वल्गा । अम् । [**स्यम्**]जस्शस्(सां) लुक् । अनेन ह्रस्वः ॥ ४.३३० ॥

## स्यमोरस्योत् ॥ ४.३३१ ॥

**[ दहमुहु ]** । दशमुख । **द**शपाषाणे हः ॥

**[ रहवरि ]** । रथवरं[१] । **ङि**नेच्च - इः ॥

**चडिअउ** । **आ**रुहेश्चडवलग्गौ । क्तः । **व्य**ञ्जनाद० । **क्ते** - इ । **अ**डडडुल्लाः० - अ । सि । अनेन उः । **स्यम्**जस्शसां लुक् ॥

**[ छंमुहु ]** । **षट्**शमीशावसुधासप्तपर्णेष्वादेश्छः - छ । **ङ**ञणनो व्यञ्जने । अम् । **स्यम्**जस्शसां लुक् ॥

**झाइवि** । क्त्वा । **क्त्व** इइउइविअवयः - इवि ॥

**[ एक्कहिँ ]** । एक । **से**वादौ वा । ङि । **ङे**र्हिं ॥

**लाइवि** । लगे सङ्गे । णिग् ।[२] क्त्वा । **क्त्व** इइउइवि० । **स्व**राणां स्वरा इति लकारस्याऽकारः (रस्य) बहुवचन[स्य] व्याप्त्यर्थत्वा[द्] णिच्-इकारेण सह इकारः । **क**गचज० - गलुक् ॥

**[ नावइ ]** । **इ**वार्थे नंनउनाइनावइ० ॥

**[ दइवें ]** । दैव । **ए**च्च दैवे - अइ । टा । **आ**ट्टो णानुस्वारौ इति टाया अनुस्वारः । **एट्टि** इत्यनेन अकारस्य एकारः ॥ ४.३३१ ॥

## सौ पुंस्योद् वा ॥ ४.३३२ ॥

**[ निहित्तउ ]** । निहित । **से**वादौ वा - द्वित्वम् ॥

**झलक्किअउ** । दहं भस्मीकरणे । अनेन झलक्कः । क्तः । **व्य**ञ्जनाद० । **स्व**राणां स्व० - इः ॥

**[ बाहसलिलसंसित्तउ ]** । बाष्पसलिलसंसिक्त । **बा**ष्पे होऽश्रुणि ॥

**अब्भडवंचिउ**[1] । अनुव्रजेरब्भडवंच । क्त । **व्य**ञ्जनाद० । **स्व**राणां० - इः ॥

**[ बे ]** । द्वि । औ । **द्वि**वचनस्य० - शस् । **द्वे**र्दोवे ॥

**[ पयइं ]** । पद । औ । तस्य शस् । **क्ली**बे जस्शसोरिं ॥

**[ पेम्मु ]**[2] । प्रेमन् । **तै**लादौ ॥

**निअत्तइ** । वृतूङ् । ते → इच् । **व्य**ञ्जनाद० । **ऋ**वर्णस्याऽरः - अर् । **स**र्वत्र लवरामवन्द्रे । **अ**नादौ शेषा० - द्वित्वम् ॥

**[ जावँ ]** । यावत् । **या**वत्तावतोर्वादेर्मउंमहिं । **मो**ऽनुनासि० ॥

**[ सव्वासणरिउसंभवहो ]** । सर्वाशनो वैश्वानरस्तस्य रिपुः समुद्रस्तत्सम्भवस्य चन्द्रस्य । ङस् । **ङ**सः सुहोस्सवः ॥

**[ परिअत्ता ]** । परिवृत्त । **स्व**राणां स्व० - अत्वम् । जस् । **स्यम्**जस्शसां लुक् । **स्या**दौ दी० ॥

**खुडुक्कइ**[3] । शल्यमिवाऽऽचरति शल्याय । अस्य खुडुक्कः । ते → इच् ॥

**[ गोरडी ]** । **स्व**राणां० । **अ**डड० । **स्त्रि**यां तदन्ताड्डीः ॥

**[ घुडुक्कइ ]** । गर्जेर्घुडुक्कः ॥

**[ वासारत्ति ]**[4] । वर्षारात्र । **स्व**राणां स्वरा० - वस्य दीर्घः । **ङि**नेच्च ॥

**[ पवासुअहं ]** । प्रवासिन् । **प्र**वासीक्षौ - उः । **अ**डडेति अः । **आ**मो हं ॥

---

१. अनुव्रज्य संप्रेष्य वा - **ताटि.** । २. प्रेमन्-शब्देन प्रिया वाच्या, अभेदोपचारात् । अनुव्रज्य यावत् द्वौ पादौ प्रिया निवर्तते इत्यर्थः- **ताटि.** । ३. खुडक्कइ - **ता.** । ४. वर्षारात्रि । सिलुक् । समासान्तो (**सङ्ख्या**तैकपुण्य०) भिन्नो वा । लुप्तयरवशषसां० - **ताटि.** ।

**[ विसमासंकडु ]** । विषमसङ्कट । सि । लुक् । **स्या**दौ दी० ॥

**[ एहु ]** । एतद् । सि । **ए**तदः स्त्रीपुंक्लीबे एहएहोएहु ॥

**[ अम्मि ]** । अम्मेति अम्बापर्यायो देश्यः । **वा**प ए । **स्व**राणां स्व० - इः ॥

**[ वज्जंवाँ[1] ]** । वज्रमय । **मो**ऽनुनासिको० । औ → जस् । लुक् । **स्या**दौ दी० । **क**गचजेति यलुक् । **स्व**राणां स्व इति मकारस्याऽकारेण सह दीर्घः ॥

**[ निच्चु ]** । नित्य । **त्यो**ऽचैत्ये च ॥

**थंति** । स्था । अन्ति → न्ति । **स्व**राणां स्वराः० । **क**गटडतदपेति सलुक् ॥

**[ महु ]** । अस्मद् । **म**हुमज्झु ङसिङस्भ्यास् ॥

**[ कंतहो ]** । कान्त । **ङसः** सुहोस्सवः ॥

**[ समरंगणइ ]** । समराङ्गण । क । **ङि**नेच्च ॥

**भज्जिउ[2]** । भजोंप् । क्त्वा । **विं**शत्यादेर्लुक् । **श**कादीनां द्वित्वम् । **क्त्व** इइउइवि० । **व्य**ञ्जनाद० । **स्व**राणां० - इः ॥

**[ पुत्तें ]** । पुत्र ॥

**[ जाएं ]** । जात । टा । **आ**ट्टो णा० । **ए**ट्टि ॥

**[ बप्पीकी[3] ]** । बप्पमकति, **कर्म**णोऽण् । **स्व**राणां स्व० । **प्र**त्यये ङी० ॥

**[ भुंहडी ]** । भूमि । **शी**घ्रादीनां० - भुंह । **अ**डड० । **स्त्रि**यां तदन्ताड्डीः ॥

**चंपिज्जइ** । आक्रमेश्चंप् । ते → इच् । क्य । **ई**अइज्जौ क्यस्य ॥

**[ तेत्तिउ[4] ]** । **इ**दंकिमश्च डेत्तियडेत्तिलेति डेत्तिय ॥

**[ तेवडु ]** । तावत् । **वा** यत्तदोऽतोर्डेवडः ॥

**[ तिसहे ]** । तृषा । **स्व**राणां० - इः[5] । **ङ**स्ङस्योर्हे । **स्या**दौ दी० ॥

**[ पर ]** । परम् । **ए**वंपरंसमंध्रुवंमामनाक० ॥

---

१. वज्जमा - **मु.** । २. भञ्जनं पूर्वम्, क्त्वा । ङञणनो० । **मां**सादे० । **ग**मादीनां० । **क्त्व** इइउ० - **ताटि.** । ३. पैत्रिकी वा, **शी**घ्रादि - **ताटि.** । ४. **य**त्तदेतदोऽतोरित्तिअ० - **क. ख.** । ५. इत् कृपादौ - **ताटि.** ।

**धुट्ठुअइ** । शब्दाय । अनेन धुट्ठुअः ॥ ४.३९५ ॥

**अनादौ स्वरादसंयुक्तानां क-ख-त-थ-प-फां ग-घ-द-ध-ब-भाः ॥ ४.३९६ ॥**

**[ दिट्ठउं ]** । दृष्ट । **स्वरा**णां० - इः । **ष्टस्यानुष्ट्रेष्टा**० - ठः । **स्वार्थे**० - कः । सि । **का**न्तस्यात उं० ॥

**[ असइहिं ]** । असती । **भिस्सुपोर्हिं** । **स्या**दौ दी० ॥

वियोगस्य **शी**घ्रादित्वात् **विच्छोहः** ॥

**गिलि गिलि** । गॄत् । हि । **ऋ**वर्णस्याऽरः । **र**स्य लो वा । **स्व**राणां स्व० - इः । **हि**स्वयोरिदुदेत् - इः । **वीप्सा**याम् - द्वित्वम् ॥

**[ अम्मिए[१] ]** । अम्मा । **अ**डड० - अः । **स्व**राणां० - इः । आप् । सि । **वा**प ए ॥

**[ हल्लोहलेण ]** । व्याकुलत्वस्य हल्लोहलः ॥

**[ अप्पाणु ]** । आत्मन् । **पुंस्य**न आण० । अम् । लुक् ॥

**[ सबधु करेप्पिणु ]** । शपथं कृत्वा । **ए**प्प्येप्पिण्वेव्ये० ॥

**[ कधिदु ]** । कथितम् ।

**[ मइँ ]** । मया । **टा**ङ्यमा मइँ ॥

**[ तसु पर सभलउं जम्मु ]** । तस्य परं सफलं जन्म । **न्मो** मः ॥

**[ जासु ]** । यद् । ङस् । **य**त्तत्किंभ्यो ङसो डासुर्नवा ॥

**[ चाउ ]** । त्याग । **त्यो**ऽचैत्ये - चः ॥

**[ चारहडि ]** । चारभटी । **स्या**दौ दी० । **टो** डः ॥

**[ पम्हुट्ठउ ]** । प्रमुषित । **क्ते**नाऽप्फुण्णादयः - पम्हुट्ठ । **अ**डड० - अ ॥

**[ जइ ]** । यदि ॥

**[ केवँइ ]** । कथञ्चित् । **क**थंयथातथां० - एमः । **मो**ऽनुनासिको० । **क**गचजेति कलुक् ॥

१. अम्मीए - **ता.मु.** । अम्बिका । स्वराणां० - **ताटि.** ।

**पावीसु**[१]। आप्लृंट् प्रपूर्वः । स्यामि । बाहुलकात् **त**क्ष्यादीनां छोल्लादय इत्यनेन स्यामेरपि स्थाने सु । **व्यञ्ज**नाद० । **स्वरा**णां स्व० - ईः ॥

**[ कोड्डु[२] ]** । कौतुक । **शी**घ्रादीनां० - कोड्डः । अम् । लुक् ॥

**[ करीसु ]** । करिष्यामि ॥

**[ पाणिउ ]** । पानीयम् ॥

**[ नवइ ]** । नव । **अ**डड० - अ । ङि । **ङि**नेच्च ॥

**[ सरावि ]** । शरावे ॥

**[ जिवँ ]** । यथा ॥

**[ सव्वंगें ]** । सर्वाङ्गेण ॥

**[ पइसीसु ]** । प्रविक्ष्यामि ॥

**[ उअ ]** । पश्य ॥

**[ कणिआरु ]** । कर्णिकार । **स**र्वत्र लवरामिति रलुकि **क**र्णिकार इत्यनेन द्वित्वनिषेधः ॥

**पफुल्लिअउ** । फुल्ल विकसने प्रपूर्वः । क्तः । **व्यञ्ज**नाद० । **स्वरा**णां० - इ । **अ**डड० - अः ॥

**[ कंचणकंतिपयासु ]** । काञ्चनकान्तिप्रकाश ॥

**[ गोरीवयणविनिज्जिअउ ]** । गोरीवदनविनिर्जित ॥

**[ नं ]** । **इ**वार्थे नंनउनाइनावइ० ॥

**[ सेवइ ]** । सेवते ॥

**[ वणवासु ]** । वनवास ॥ ४.३९६ ॥

## मोऽनुनासिको वो वा ॥ ४.३९७ ॥

**[ सभलउं ]** । सफलक । **अ**नादौ स्वरादसंयुक्तानां० - भ । सि । **का**न्तस्यात उं० ॥ ४.३९७ ॥

## वाऽधो रो लुक् ॥ ४.३९८ ॥

---

१. प्रपूर्वस्य आप्लृंट् । स्यामि । **व**र्त्स्यति स्यस्य सः । **स्वरा**णां स्वराः - उः । **विं**शत्यादेर्लुक् - **ताटि.** । २. कोड्डु - **ता.** । कुड्डु - **मु.** ।

## अभूतोऽपि क्वचित् ॥ ४.३९९ ॥

**[ व्रासु ]** । व्यास ॥

**[ महारिसि ]** । महाऋषि । **ऋ**णर्ज्वृषभर्त्वृषौ वा - रि ॥

**[ एउ ]** । एतद् । सि । **स्यम**ोरस्योत् । **क**गचजेति तलुक् ॥

**[ सुइसत्थु ]** । श्रुतिशास्त्र । **वा**धो रो लुक् । **स्व**राणां० - ह्रस्वः । **स्त**स्य थोऽसमस्तस्तम्बे ॥

**[ मायहं ]** । मातृ । **आ**अरा मातुः । आम् । **स्या**दौ दी० । **आ**मो हं ॥

**[ दिवें[१] ]** । दिवा । **कि**लाथवादिवासहनहेः किराहवइदिवे० ॥

**[ गंगाण्हाणु ]** । गङ्गास्नान । **सू**क्ष्मश्नष्णस्न० ॥

**[ वासेण वि ]** । व्यासेनाऽपि ॥

**[ भारहखंभि ]** । भारतस्तम्भे । एकदेशविकृतस्याऽनन्यत्वाद् (न्यायसं० १.७) **वित**स्तिवसतिभरतकातरेति हः । **स्त**म्भे स्तो वा - खः ॥

**[ बद्ध ]** । बद्धा ॥ ४.३९९ ॥

## आपद्-विपत्-सम्पदां द इः ॥ ४.४०० ॥

**आवइ** । अव रक्षणादौ आङ्पूर्वः ॥

**संपय[२]** । सम्पद् । **स्त्रि**यामाद० । सि । **स्या**दौ दी० ॥ ४.४०० ॥

## कथं-यथा-तथां थादेरेमेमेहेधा डितः ॥ ४.४०१ ॥

**[ केम ]** । कथम् ॥

**समप्पउ** । आप्लृंट् संपूर्वः । कर्मकर्तरि पञ्चमी ताम् । **दु**सुमु विध्यादिष्वेकस्मिंस्त्रयाणाम् - दुः । **क**गचज० । क्य । **ग**मादीनां द्वित्वं क्यलुक् च ॥

**[ छुडु ]** । यदि । **शी**घ्रादि छुडु ॥

**[ नववहुदंसणलालसउ ]** । नववधूदर्शनलालस । **स्व**राणां स्व० - ह्रस्वः । **व**क्रादावन्तः ॥

---

१. दिवि - **मु.** । २. **श**रदादेरत् - दकारस्य अकारः - **ताटि.** ।

**ओ** सूचनापश्चात्तापे ॥

**वद्दलि** । वार्ददतीति वार्दा, **आतो** डोऽह्वावामः - मेघाः । तान् लातीति वार्दलम् , तत्र । **ङि**ने० ॥ ४.४०१ ॥

**लुक्कु**[१] । निपूर्वो लीङ्(ङ्च्)श्लेषणे । **नि**लीङेर्णिलीयणिलुक्क० । क्त । **क**गचजेति क्त-तकारस्य लुक् । सि । **स्यम**ोरस्योत् ॥

**[ परिहवियतणु ]** । परिभूततनु । **भु**वेर्होहुवहवाः । **व्य**ञ्जनाद० । **स्व**राणां० - इः ॥

**[ बिंबाहरि ]** । बिम्बाधरे ॥

**[ तणु ]** । तन्वी ।[२] षष्ठी ङस् । **ष**ष्ठ्या इति ङसो लुक् । **स**र्वत्र लवराम० । **स्व**राणां० - ईकारस्य उकारः ॥* यद्वा तनु । ङस् । **ष**ष्ठ्या - लुक् । तन्व्या नायिकाया इत्यर्थः ॥

**[ रयणवणु ]** । रदनव्रणम् ॥

**ठिउ** । **स्थ**ष्ठाथक्क० । **स्व**राणां० - इ ॥

**[ सिरिआणंदं[३] ]** । श्रीआनन्दं[४] । **ई**श्रीह्रीकृत्स्नक्रियादिष्ट्यास्वित् । **से**वादौ वा - द्वित्वम् ॥

**[ निरुववँरसु[५] ]** । निरुपमरस । **मो**ऽनुनासिको वो वा । अम् । लुक् ॥

**[ पिएं ]** । प्रिय । टा । **आट्टो** णा० । **ए**ट्टि ॥

**पिअविं**[६] । पां पाने । क्त्वा । **क्त्व** इइउइविअवयः । **स्व**राणां स्व० - इः । **इ**वार्थे नंनउनाइनावइ० ॥

**[ सेसहो ]** । शेष । **श**षोः सः । ङस् । **ङ**सः सुहोस्सवः ॥

**[ दिण्णी[७] ]** । दत्त । **प**ञ्चाशत्पञ्चदशदत्ते - णः । **अ**जातेः पुंसः - ङीः ॥

**भणु**[८] । अणरणवण० । हि । **हि**स्वयोरिदुदेत् ॥

**[ निहुअउं ]**[९] । निभृत । **स्व**राणां० । **स्वार्थे**० - कः ॥

---

१. लीनः । **क्ते**नाऽप्फुण्णादयः - **ताटि.** । २. तनु । ङस् - **ख.** । ३. ०आणंद - **मु.** । ४. श्रियमानन्दति, अण् - **ताटि.** । ५. निरुवमरसु - **मु.** । ६. पिआवे - **मु.** । ७. **इः** स्वप्नादौ - इकारः - **ताटि.** । ८. भण - **मु.** । ९. उदृत्वादौ - **ताटि.** ।

**[ तेवँ ]** । तथा ॥

**[ मइँ ]** । माम् । **टा**ङ्यमा मइँ ॥

**[ जइ पिउ दिट्ठु सदोसु ]** । यदि प्रियो दृष्टः सदोषः ॥

**[ जेवँ ]** । यथा ॥

**[ न जाणइ ]** । न जानाति । **ज्ञो** जाणमुणौ ॥

**[ मज्झु ]** । अस्मद् । ङस् । **म**हुमज्झु ङसिङस्भ्याम् ॥

**[ मणु ]** । मनः ॥

**[ पक्खावडिअउं ]** । पक्षमापतितं पक्षापतितम् । **क्षः** खः क्वचित्तु० । **स**दपतोर्डः । **स्वार्थे**० - कः । सि । **का**न्तस्यात उं० ॥

**[ तासु ]** । तद् । ङ्स् । **य**त्तत्किंभ्यो ङ्सो डासुर्नवा ॥

**[ जिवँ जिवँ वंकिम लोयणहं ]** । यथा यथा वक्रिमा लोचनानाम् । **आ**मो हं ॥ ४.४०१ ॥

## यादृक्-तादृक्-कीदृगीदृशां दादेर्डेहः ॥ ४.४०२ ॥

**[ एहो ]** । एतद् । सि । **ए**तदः स्त्रीपुंक्लीबे एहएहोएहु ॥

**[ वढ[1] ]** । मूर्ख । **शी**घ्रादित्वात् वढ ॥

**[ सई ]** । स्वयम् । **स्व**राणां० - इः ॥ ४.४०२ ॥

## अतां डइसः ॥ ४.४०३ ॥

## यत्र-तत्रयोस्त्रस्य डिदेत्थ्वत्रु[2] ॥ ४.४०४ ॥

**[ जइ सो घडदि ]** । यदि स घटति । घटिष् । णिग् । तिव् । **स्वरा**णां[3]० - अः । **अ**नादौ स्वरादसंयुक्तानां० - दः ॥

**[ प्रयावदी ]** । प्रजापति । **स्या**दौ दी० ॥

**लेप्पिणु** । लांक् । क्त्वा । **ए**प्प्येप्पिण्वे० । **स्व**राणां स्व० - ए ॥

---

१. मूढ - **ख.** । २. ०थ्वत्तु - **मु.** । ३. **णे**रदे० - **ताटि.** ।

**[ सिक्खु ]** । शिक्षा । अम् । लुक् । **स्व**राणां स्व० - अ । **स्यम**ोरस्योत् ॥

**[ तहे ]** । तद् । ङस् । **ङ**सिभ्यस्ङीनां हेहुंहयः[१] ॥

**[ सारिक्खु ]**[२] । सदृक्ष । **स्व**राणां० । **दृशः** क्विप्टक्सकः - रि[३] ॥ ४.४०४ ॥

**एत्थु कुत्रा-ऽत्रे ॥ ४.४०५ ॥**

**यावत्-तावतोर्वादेर्म-उं-महिं ॥ ४.४०६ ॥**

**सीहचवेडचडक्क** । **ई**र्जिह्वासिंह० । **विंश**त्यादेर्लुक् । चडक्का । चटत्कार इत्यर्थः ॥

**[ मयगलहं ]**[४] । मदकल । **अ**नादौ स्वरादसंयुक्तानां कखतथपफां० - ग ।

**वज्जइ** । व्रजति । **स्विदां** ज्जः ॥

**[ नेहि पणट्ठइ ते ज्जि**[५] **]** । स्नेहे प्रनष्टे ते एव । **प**श्चादेवमेवैवेदानींप्रत्युतेतसः इति जिः । **से**वादौ वा - द्वित्वम् ॥

**फिट्टवि** । **भ्रंशेः** फिडफिट्टफुड० । **क्त्व** इइउइवि० ॥

**मज्झें**[६] । मध्य । **सा**ध्वसध्यह्यां झः । टा ॥ ४.४०६ ॥

**वा यत्-तदोऽतोर्डेवडः ॥ ४.४०७ ॥**

**जेत्तुले**[७] । **अ**तोर्डेत्तुलः ॥ ४.४०७ ॥

**वेदं-किमोर्यादेः ॥ ४.४०८ ॥**

**परस्परस्याऽऽदिरः । ४.४०९ ॥**

**[ ते मुग्गडा ]** । ते मुद्ग । **अ**डड० ॥

**हराविआ** । ह्रंग् । णिग् । **ऋ**वर्णस्याऽरः - अर् । क्त । **णे**रदेदावावे[८] । जस् । लुक् । **स्या**दौ दी० ॥

**परिविट्ठा** । परिविष्ट । **ष्ट**स्याऽनुष्ट्रेष्टा० ॥

---

१. (अत्र **स्त्रि**यां डहे इत्यनेन भाव्यम् ।) २. दृश क्विप् इकारः (?) । आर्षत्वात् **छो**ऽक्ष्यादाविति न छत्वम् । **अतः** समृ० । दृशः क्विप्टक्स० - **ताटि.** । ३. ०सकः - रि । **छो**ऽक्ष्यादौ - **क. ख.** । ४. मरकत - **ताटि.** । ५. जि - **ता.** । ६. मज्झे - **मु.** । ७. जेत्तुलो - **ता.मु.** । ८. (प्रयोगानुरूपमत्र **लु**गावी क्तभाव० इत्यनेन संभाव्यम् ।)

**[ अवरोप्परु ]** । परस्पर । **न**मस्कारपरस्परे द्वितीयस्य - ओ ।

**जोअंताहं** । द्योति । णिग् । शतृ → न्त । **स्व**राणां० । **द्य**य्ययां जः । **आ**मो हं ॥

**गंजिउ**[1] । गर्ज गजु० । **क्तः** । **व्य**ञ्जनाद० - अ । **स्व**राणां स्व० - इ ॥ ४.४०९ ॥

**कादिस्थैदोतोरुच्चारलाघवम् ॥ ४.४१० ॥**

**पदान्ते उं-हुं-हिं-हंकाराणाम् ॥ ४.४११ ॥**

**म्हो म्भो वा ॥ ४.४१२ ॥**

विदग्धस्य गोणादित्वात् **छइल्ल** ॥

**वंचयर**[2] । वञ्चकराः ॥

**[ उज्जुअ ]** । ऋजु । **उ**दृत्वादौ । **तै**लादौ । **अ**डड० - अः । जस् । लुक् ॥

बलीवर्दस्य गोणादित्वात् **बइल्ल** ॥ ४.४१२ ॥

**अन्यादृशोऽन्नाइसा-ऽवराइसौ ॥ ४.४१३ ॥**

**प्रायसः प्राउ-प्राइव-प्राइम्व-पग्गिम्वाः ॥ ४.४१४ ॥**

**दीहर** । दीर्घ । **रो** दीर्घात् - र ॥

**जि** । एव । **प**श्चादेवमेवैवेदानीं० ॥

**[ भंतडी ]** । भ्रान्ति । **स्व**राणां स्वराः० । **अ**डड० । **स्त्रि**यां तदन्ताड्डीः ॥

**[ मणिअडा ]** । मणि । **अ**डड० ॥

**[ अखइ निरामइ परमपइ अज्ज वि लउ न लहंति ]** । अक्षये निरामये परमपदे अद्याऽपि लयं न लभन्ते ॥

**[ गोरिअहे ]** । गौरी । **स्व**राणां स्व० - ओत्वम् इत्वं च । **अ**डड० - अः । ङस् । **ङस्**-ङस्योर्हे ॥

**[ उव्वत्ता ]**[3] । उद्वृत्ता ॥

---

१. गंजुः पराभवत्यर्थः - **ताटि.** । २. वंचिण् । वञ्चयन्तेऽच् - वञ्चाः । ततः स्वार्थे तरप् - **ताटि.** । ३. उद्वृत्तौ अन्यथाभूतावित्यर्थः - **ताटि.** ।

**[ नयणसर ]** । नयनशराः ॥

**[ तें संमुह संपेसिआ ]** । ते सम्मुखाः सम्प्रेषिताः[१] ॥

**देंति** । दांग्क् । अन्ति → न्ति । **स्व**राणां० - ए ॥

**[ तिरिच्छी ]** । **तिर्य**चस्तिरिच्छिः । अम् । लुक् । **स्या**दौ दी० ॥

**[ घत्त ]** । घात । **स्व**राणां० । **से**वादौ वा । **लि**ङ्गमतन्त्रमिति स्त्रीत्वम् । अम् । लुक् ॥

**[ पर ]** । परम् । **ए**वंपरंसमंध्रुवं० ॥

**एसी** । इंण्क् । स्यति । **यु**वर्णस्य गुणः । **व**त्स्यति स्यस्य सः । **क**गचजेति तलुक् । **स्व**राणां स्वरा इत्यकारस्येकारेण सह ई ॥

**रूसेसु** । रुषच् । स्यामि । **रु**षादीनां दीर्घः । बाहुलकात् **त**क्ष्यादीनां छोल्लादय इति स्यामेरपि सुः । **व्य**ञ्जनाद० । **स्व**राणां० - ए ॥

**[ रुट्ठी ]** । रुष्ट । **अ**जातेः पुंसः - ङीः ॥

**अणुणेइ** । णींग् अनुपूर्वः । **सत्सा**मीप्ये सद्वद्वेति वर्तमाना तिव् ॥ ४.४१४ ॥

## वाऽन्यथोऽनुः ॥ ४.४१५ ॥

**बुड्डवि**[२] । **म**स्जेराउड्डणिउड्डबुड्ड० । **क्त्व** इइउइविअवयः ॥

**[ जलहु ]** । जल । ङसि । **ङ**सेर्हेहू ॥

**[ कहंतिहु ]** । कुतः । **कु**तसः कउकहंतिहु ॥

**उड्डीअउ**[३] । **उ**दष्ठकुक्कुरौ ॥ ४.४१५ ॥

## कुतसः कउ-कहंतिहु ॥ ४.४१६ ॥

**[ महु ]** । मम ॥

**[ कंतहो ]** । कान्त । **ङ**सः सुहोस्सवः ॥

**झुंपडा** । कुटीरक । **शी**घ्रादिनां झुंपड ॥

---

१. सम्प्रेक्षिताः - **ग.** । २. बुड्डिवि - **क.ख.मु.** । ३. उड्डिअओ - **क. ख.** ।

**बलंति** । ज्वल दीप्तौ । बाहुलकात् **क**गचजेत्यूद्ध्र्वमपि जलुक् ॥

**उल्हवइ** । विध्यापे**स्त**क्ष्यादित्वादुल्हव ॥

[ **अप्पणएं**[१] ] । आत्मीय । **शी**घ्रादीनां अप्पण । अ । टा ॥ ४.४१६ ॥

**ततस्तदोस्तोः ॥ ४.४१७ ॥**

**एवं-परं-समं-ध्रुवं-मा-मनाक एम्व-पर-समाणु-ध्रुवु-मं-मणाउं ॥ ४.४१८ ॥**

[ **पियसंगमि** ] । प्रियसङ्गमे ॥

[ **कउ** ] । कुतः । **कु**तसः कउकहंतिहु ॥

[ **निद्दडी** ] । निद्रा । **वा**धो रो लुक् । **अ**डड० । **स्त्रि**यां तदन्ताड्डीः ॥

[ **पिअहो** ] । प्रिय । **ङ**सः सुहोस्सवः ॥

**बिण्णि** । **दु**वेदोण्णिवेण्णि च जस्शसा । **स्व**राणां स्व० ॥

[ **विन्नासिआँ** ] । विन्यासित[२] । औ । **द्वि**वचनस्य बहुवचनम् - जस् । **क्ली**बे जस्शसोरिं । **स्व**राणां इत्यकारस्येंकारेण सह आ ॥

[ **कंतु जु** ] । कान्तो यत् ॥

[ **सीहहो** ] । सिंहेन । **क्व**चिद् द्वितीयादेः - ङस् । **ङ**सः सुहोस्सवः ॥

**उवमिअइ** । उपमीयते । **ई**अइज्जौ क्यस्य । **स्व**राणां० ॥

[ **निरक्खय** ] । निर्गता रक्षा येभ्यस्ते निरक्षाकाः ॥

[ **पयरक्खसमाणु** ] । पदरक्षैः समं पदरक्षसमम् । **ऊना**र्थपूर्वाद्यैरिति समासः ॥

**होसइं**[३] । **भु**वेर्हो० । स्यन्ति । **व**त्स्र्यति स्यस्य सः । **स्व**राणां इति प्रायोग्रहणात् तेरपि इं ॥

[ **दिअहा** ] । दिवस । **दिव**से सः - हः ॥

**रूसणा** । रुष्यते एष्विति अनट् ॥

---

१. अप्पणें - **मु.** । २. विनासित - **ग.** । ३. होसहिँ - **मु.** । होसइँ - **ता.** । ङञणनो० । **विं**शत्यादे० । **स्व**राणामित्यकारः सानु० - **ताटि.** ।

**[ दिव्वइँ ]** । दिव्य । शस् । **क्ली**बे जस्शसोरिं ॥

**[ वरिससयाइँ ]** । वर्षशतानि । **र्श**र्षतप्तवज्रे वा - इ । **स्या**दौ दी० ॥

**देसडा** । देश । **अ**डड० । अम् । लुक् ॥

**चएज्जं**[१] । त्यजं हानौ । यात् । **व**र्तमानाभविष्यन्त्योश्च ज्जज्जा वा । **व्य**ञ्जनाद० । **स्व**राणां० - ए । **त्यो**ऽचैत्ये - चः ॥

**[ दुज्जणकरपल्लवेहिं ]** । दुर्जनकरपल्लव । **भि**स्सुपोर्हिं । **भि**स्येद् वा ॥

**दंसिज्जंतु** । दृशृं । णिग् । **दृ**शेर्दावदंसदक्खवाः । आनश् । **श**त्रानशः - न्त । क्य । **ई**अइज्जौ क्यस्य ॥

**भमेज्जं**[२] । भ्रमूच् । यात् । **व**र्तमानाभविष्यन्त्योश्च ज्जज्जा वा । **व्य**ञ्जनाद० । **स्व**राणां० - ए ॥

**[ लोणु ]** । लवण । **न** वा मयूखलवणचतुर्गुणचतुर्थचतुर्दशचतुर्वारिति वेन सह ओत्वम् ॥

**[ म गज्जु ]** । मा गर्ज । **हि**स्वयोरिदुदेत् ॥

**बालिउं**[३] । ज्वालित । **क**गचजेति बाहुलकादूर्ध्वमपि जलुक् ॥

**[ झुंपडा ]** । कुटीर । **शी**घ्रादि झुंपड ॥

**तिम्मइ** । तिमतिमष्टिमष्टीमच् । ते → इच् । **श**कादीनां द्वित्वम् ॥

**वंकुडउ** । वक्र । **यो**गजाश्चैषाम् - डडअः । **स्व**राणां० - उ ॥

**[ रिद्धिहिं ]** । ऋद्धि । **रिः** केवलस्य । **ङे**र्हिं ॥ ४.४१८ ॥

### किला-ऽथवा-दिवा-सह-नहेः किरा-ऽहवइ-दिवे-सहुं-नाहिं ॥ ४.४१९ ॥

**खाइ** । खादृ भक्षणे । **खा**दधावोर्लुक् ॥

**पिअइ** । पिबति ॥

**[ न विद्दवइ धम्मि ]** । न विद्रवति[४] धर्मे ॥

**न वेच्चइ** । व्ययण् वित्तसमुत्सर्गे । **त**क्ष्यादीनां० - वेच्च ॥

---

१. चइज्ज - **मु.** । २. भमिज्ज - **मु.** । ३. **शी**घ्रा० । ज्वाले**स्त**क्ष्यादित्वात् - **तादि.** । ४. विद्रावयति - **तादि.** ।

**[ रूअडउ ]** । रूपक । **यो**गजाश्चैषाम् - डडअः । स्वार्थिककलुक् च ॥

**खणेण** । क्षण । **क्षः** खः क्वचित्तु० । **आ**ट्टो णा० । **ए**ट्टि ॥

**पहुच्चइ** । **भुवः** पर्याप्तौ हुच्चं प्रपूर्वः ॥

**[ दूअडउ ]** । दूत । **यो**गजाश्चैषाम् - डडअः ॥

**[ अहवइ न सुवंसहं ]** । अथवा न सुवंशानाम् । **आ**मो हं ॥

**[ एह ]** । एतद् । सि । **एतदः** स्त्रीपुंक्लीबे एहएहोएहुः ॥

**[ खोडि ]** । दोष । **शी**घ्रादीनां० - खोडि ॥

**जाइज्जइ** । यायते ॥

**[ तहिं ]** । तद् । **ङे**र्हिं ॥

**[ देसडइ ]** । देश । डडअः ॥

**लब्भइ** । **ग**मादीनां द्वित्वम् ॥

**[ एत्तहे ]** । इतस् । **प**श्चादेवमेवैवेदानींप्रत्युतेतसः० - एत्तहे ॥

**आवट्टइ** । आवर्त्तते । **र्त्त**स्याऽधूर्तादौ - टः ॥

**पेक्खु** । ईक्षि दर्शने प्रपूर्वः । स्व । **हि**स्वयोरिदुदेत् । **क्षः** खः क्वचित्तु० ॥

**ओहट्टइ** । अपवृत्ते**स्त**क्ष्यादित्वादोहट्टः ॥ ४.४१९ ॥

## पश्चादेवमेवैवेदानींप्रत्युतेतसः
## पच्छइ-एम्वइ-जि-एम्वहिं-पच्चलिउ-एत्तहे ॥ ४.४२० ॥

**[ जाउ म ]** । यातु मा ॥

**जंतउ** । यांक् । शतृ → न्त । **स्व**राणां स्व० । **अ**डड० - अ । अम् । लुक् ॥

**पल्लवह** । पल्लवं गृह्णाति णिच् । पञ्चमी त । **ब**हुषु न्तुहमो - ह । **स्व**राणां स्व० - अः ॥

**देक्खउं** । **दृ**शो नियच्छपेच्छावयच्छा० । मिव् । **अ**न्त्यत्रयस्याऽऽद्यस्य उं ॥

**तिरिच्छी** । **ति**र्यचस्तिरिच्छिः । **स्या**दौ दी० ॥

**हउं** । **सा**वस्मदो हउं ॥

**पर** । **ए**वंपरंसमं० - पर ॥

**नच्चाविउ**। नृत्। णिग्। **स्व**राणां० - अत्वम्। **व्र**जनृतमदां च्चः। क्त। **लु**गावी क्तभावकर्मसु - आवि ॥

**भावइं**[1] । भू । तिव् । **स्व**रादनतो वा । **यु**वर्णस्य गुणः । **स्व**राणां० - आ ॥

**[ सावसलोणी ]** । सर्वसलवण । **स्व**राणां० । **न** वा मयूखलवण० - ओ । **अ**जातेः पुंसः - ङी ॥

**[ गोरडी ]** । गौरी । **स्व**राणां० । **अ**डड० - अ । **स्त्रि**यां तदन्ताड्डीः ॥

**नवखी** । नवस्य **शी**घ्रादित्वात् नवखः । **अ**जातेः पुंसः - ङीः ॥

**लग्गइ** । लगे सङ्गे । **श**कादीनां द्वित्वम् ॥ ४.४२० ॥

## विषण्णोक्त-वर्त्मनो वुन्न-वुत्त-विच्चं ॥ ४.४२१ ॥

**[ वुत्तउं ]** । उक्त । अनेन वुत्त । **स्वा**र्थे० - कः । सि । **का**न्तस्यात उं ॥

**धरहि** । धृंग् । हि । **म**ध्यत्रयस्याऽऽद्यस्य हिः । **ऋ**वर्णस्याऽरः । **व्य**ञ्जनाद० ॥

**[ कसरेहिं ]** । दम्य । **शी**घ्रादीनां० - कसर । भिस् । **भि**स्सुपोर्हिं । **भि**स्येद्वा ॥

**[ विगुत्ताइं ]** । विगुप्त । जस् । **क्ली**बे जस्शसोरिं ॥

**चडइ** । **आ**रुहेश्चडविलग्गौ ।

**[ एम्वइ ]** । एवमेव । **प**श्चादेवमेवैदानीं० - एम्वइ ॥ ४.४२१ ॥

## शीघ्रादीनां वहिल्लादयः ॥ ४.४२२ ॥

**[ एक्कु ]** । एक ॥

**कइअ** । किम् । ङि । **ङे**र्डाहिडालाइआ काले इति इअ । **कि**मः कस्त्रतसोश्च ॥

**हे** इत्यामन्त्रणार्थमव्ययम्[2] ॥

**[ अवि न आवही ]** । अपि नाऽऽवसि । अव रक्षणादौ आङ्पूर्वः । सि । **म**ध्यत्रयस्याद्यस्य हिः । **स्व**राणां स्व० - ई ॥

---

१. प्रतिभातीत्यस्य **त**क्ष्यादित्वाद् भाव् - **ताटि.** । २. वाक्यालङ्कारे कोमलामन्त्रणे वा हः - **ताटि.** ।

**[ मइँ मित्तडा प्रमाणिअउ पइँ ]** । मया मित्र ! प्रमाणितः त्वया ॥

**[ जेहउ ]** । यादृक् । **या**दृक्तादृक्कीदृगीदृशां दादेर्डेहः ॥

**[ नाहिं ]** । **कि**लाथवादिवासहनहेः० ॥

**[ डोंगर ]** । पर्वतस्य डुंगरः ॥

**[ कोट्टरइं ]** । कोटर । **तै**लादौ ॥

**[ हिआ ]** । हृदय । **स्व**राणां स्व० - इ । **कि**सलयकालायसहृदये यः । **स्या**दौ दी० ॥

**विसूरहि** । **खि**देर्जूरविसूरौ । सिव् । **म**ध्यत्रयस्याद्यस्य हि ॥

**छड्डेविणु** । **मु**चेश्छड्डावहेड० । **ए**प्प्येप्पिण्वेव्येविणवः ॥

**[ रयणनिहि ]** । रत्ननिधि । **क्ष्मा**श्लाघारत्नेऽन्त्यव्यञ्जनात् । अम् । लुक् ॥

**[ अप्पउं ]** । आत्मन् । **स्व**राणां स्व० । **भ**स्मात्मनोः पो वा । **स्वार्थे**० - कः । अम् । **का**न्तस्यात उं० ॥

**[ तडि ]** । तट । **टो** डः । **ङि**नेच्च ॥

**घल्लंति** । क्षिपींच् । **त**क्ष्यादीनां छोल्लादयः - घल्लादेशः ॥

**फुक्किज्जंत** । फूत्क्रियमाणाः । **ई**अइज्जौ० । **स्व**राणां स्वरा० - ऋकारस्य इकारेण सह इः ॥

**[ दिवेहिं ]** । दिवा । **कि**लाथवादिवासहनहेः किरा० - दिवे । **ङे**र्हिं ॥

**विढत्तउं** । अर्जित । **गो**णादयः - विढत्त । **स्वार्थे**० - कः । **का**न्तस्यात उं० ॥

**संचि** । चिंगृ । हि । **हि**स्वयोरिदु० । **स्व**राणां० - इः ॥

**एक्कु** । **से**वादौ वा - द्वित्वम् ॥

**[ समप्पइ ]** । समाप्यते । **ग**मादीनां द्वित्वम् ॥

**एक्कमेक्कउं**[1] । एकैकम् । **वी**प्स्यात् स्यादेर्वीप्स्ये स्वरे मो वा ॥

**जोएदि**[2] । द्योति । **द्य**य्यर्यां जः । तिव् । **स्व**राणां० - ए । **अ**नादौ स्वरादसंयुक्तानां० - दिः ॥

१. एकमेक्कउं - **मु.** । २. पश्यति । **णे**रदे० । **दि**रिचेचो० - **ताटि.** ।

**[ राही ]** । राधा । **ख**घथधभाम् - हः । **स्व**राणां० - ईः ॥

**सक्कइ** । **श**कादीनां द्वित्वम् ॥

**संवरेवि** । संपूर्व वृग् । तुम् । **तु**म एवमणाणह० ॥

**पलुट्ट** । **पर्य**सः पलोट्टपल्लट्ट० । क्त । **क**गचज० - तलुक् ॥

**[ विहवे कस्सु थिरत्तणउं ]** । विभवे कस्य स्थिरत्वम् । **क**गटडतदप० । **त्व**स्य डिमात्तणौ वा । **स्वार्थे**० - कः ॥

**[ मरट्टु ]** । गर्व । **शी**घ्रादीनां० - मरट्टः ॥

**[ बरिहिणु ]** । बर्हिण । **र्ह**श्रीह्रीकृत्स्न० - इः ॥

**[ निच्छयं ]** । निश्चय । **ह्र**स्वात् थ्यश्चत्सप्सा० ॥

**पयंपह** । **क**थेर्वज्जरपज्जरोप्पाल० प्रपूर्व । त । **ब**हुषु न्तुहमो ॥

**[ अणुरत्ताउ भत्ताउ ]** । अनुरक्ता भक्ता । **स्त्रि**यां जस्शसोरुदोत् ॥

**[ अम्हे ]** । अस्मद् । **ज**स्शसोरम्हेअम्हइं ॥

**चय** । त्यजं । **त्यो**ऽचैत्ये - त्य → चः । हि । **दु**सुमु विध्यादिष्वेकस्मि० - सु । **अत** इज्जस्विज्जहीज्जे० - लुक् ॥

**[ सरिहिं ]** । सरिद्भिः ॥

**[ सरेहिं ]** । सरोभिः- लघुतडागैः ॥

**[ सरवरेहिं ]** । सरोवरैः- महासरोभिः ॥

**निवसंतिहिं**[१] । **स्व**राणां० - इः ॥

**अग्गय**[२] । अग्रतस् ॥

**फुट्टिसु** । स्फु(स्फ)ट स्फुट्ट विशरणे । स्यामि । **त**क्ष्यादीनामिति बाहुलकात् सु । **व्य**ञ्जनाद० । **स्व**राणां० - इः । **स्फु**टिचलेः - द्वित्वम् ॥

**[ सहुं**[३] **]** । सह । **कि**लाथवादिवासहनहेः - सहुं ॥

१. निवसंतेहिं - **ता.मु.** । २. अग्गइ - **ता.मु.** । ३. हउं - **ता.** । हउँ - **मु.** ।

**[ भंडय ]** । भण्डो निर्लज्जः । **अ**डड० - अं[1] ।

**[ कुडुली ]** । कुटी । **अ**डडडुल्लाः० । **स्त्रि**यां तदन्ताड्डीः ॥

**[ बहिणुए ]** । भगिनी । **दु**हितृभगिन्योर्धूआबहिण्यौ । **स्वा**र्थे० - कः । आप् । **स्व**राणां स्व० - ईकारस्य उकारः । सि । **वा**प ए ॥

**जेत्थु** । **य**त्रतत्रयोस्त्रस्य डिदेत्थ्वत्तु ॥

**[ अप्पणछंदउं ]** । चन्दयत्याह्लादयतीति चन्दः, अच् । **पृषो**दरादित्वाच्छत्वम् । आत्मनश्छन्दोऽभिप्रायो यस्य तदात्मछन्दकम् । **पुं**स्यन० । **स्व**राणां० । **भ**स्मात्मनोः पो वा ॥

**[ खसफसिहुअउं[2] ]** । व्याकुलीभूतः । **शी**घ्रादित्वात् खसफसिहुअं[3] । **अ**डड० - अः ॥

**[ रइवसभमिरु ]** । रतिवशभ्रमणशीलः[4] । **शम**ष्टकाद् घिनण् । **शी**लाद्यर्थस्येरः - इरः ॥

**[ करग्गुल्लालिउ ]** । कराग्रोल्लालित ॥

**[ घरहिं ]** । गृह । **गृ**हस्य घरोऽपतौ । भिस् । **भि**स्सुपोर्हिं ॥

**[ जि ]** । **प**श्चादेवमेवैदानीं० ॥

**[ कोंतु ]** । कुन्त । **स्व**राणां[5]० - ओ । अम् । लुक् । **स्य**मोरस्योत् ॥

**[ गुणइ ]** । कुण गुण केतण्० ॥

**[ चलेहिं[6] वलंतेहिं लोअणेहिं जे तइं ]** । चलैर्वलमानैर्लोचनैर्ये त्वया । **टा**ङ्यमा पइंतइं ॥

**[ तहिं ]** । तेषु । **भि**स्सुपोर्हिं ॥

**[ मयरद्धयदडवडउ पडइ ]** । मकरध्वज-अवस्कन्दः पतति । **स**दपतोर्डः ॥

**अपूरइ** । अपूर । **अ**डड० - अ । ङि । **ङि**नेच्च ॥

**पिअहु** । पां पाने । त । **ब**हुत्वे हुः । **स्व**रादनतो वा । **स्व**राणां० - इ ॥

**केरइं[7]** । केरादेशे **अ**डड० - अः । टा । **आ**ट्टो णा० । **ए**ट्टि । **स्व**राणां० - इः ॥

**[ हुंकारडएं ]** । हुंकार । **यो**गजाश्चैषाम् - अडडअ (डडअ) ॥

---

१. अ । ङस् । कुटी - **ग.** । २. खसप्फसिहूअउ - **ता.** । खसफसिहूअउ - **मु.** । ३. खसफसेहुअ - **ख.** । ४. शीलः । शीला० - **ख.** । ५. ओत् संयोगे - **ताटि.** । ६. चलंतेहिं - **मु.** । ७. केरएं - **ता.** । केरए - **मु.** ।

**[ मुहहुं ]** । मुख । ङसि । **ङसेर्हेहू** ॥

**[ सत्थावत्थहं आलवणु साहु वि ]** । स्वस्थावस्थानामालपनं सर्वोऽपि । **स**र्वस्य साहो वा । **स्या**दौ दी० ॥

**[ आदन्नहं ]**[1] । आर्त्तस्य अनेन आदन्न ॥

**[ रच्चइ ]** । रञ्जेस्तक्ष्यादित्वात् रच्च ॥

**[ लोहें ]** । लोहेन ॥

**[ फुट्टणएण ]** । स्फु(स्फ)ट स्फुट्ट विशरणे । तृन् । **तृ**नोऽणअः । **स्फु**टिचलेः - द्वित्वम् । **आ**ट्टो णा० । **ए**ट्टि ॥

**[ जिवँ ]** । यथा । **क**थंतथायथां थादे० ॥

**[ घणा ]**[2] । घन । सि । लुक् । **स्या**दौ दी० ॥

**सहेसइ** । षहिं । स्यते । **व**र्स्त्यति स्यस्य सः । **स्व**राणां० - इः । **व्य**ञ्जनाद० । **स्व**राणां० - एः ॥

**[ ताव ]** । ताप । सि । लुक् ॥

त्वया लोहेनेव घनस्तापः सहिष्यते इत्यन्वयः ॥ ४.४२२ ॥

## हुहुरु-घुग्घादयः शब्द-चेष्टानुकरणयोः ॥ ४.४२३ ॥

**बुड्डीसु** । **म**स्जेराउड्डुनिउड्डुबुड्डु० । स्यामि । **त**क्ष्यादीनां छोल्लादय इति बाहुलकात् स्यामेरपि सुः । **व्य**ञ्जनाद० । **स्व**राणां स्व० - ई ॥

**[ पेम्मद्रहि ]** । प्रेमहृद । **हृ**दे हदोः ॥

**[ त्ति ]** । इति । **इ**तेः[3] स्वरात् तश्च द्विः ॥

**नवरि** । **ण**वर केवले । **स्व**राणां स्व० - इ ॥

**[ अचिंतिअसंपडिय विप्पियनाव ]** । अचिन्तितसम्पतिता विप्रियनौ । **ना**व्यावः ॥

**[ झड त्ति ]** । झटत् इति ॥

---

१. आर्तस्य आदन्नः, आगतो दैन्यमिति वा - **ताटि.** । २. प्रभूतस्य घणा - **ताटि.** । ३. इतौ तो वाक्यादौ - **ख.** ।

**खज्जइ** । खादृ । ते → इच् । **खा**दधावोर्लुक् । क्य → इज्ज । **स्व**राणां०[१] - इता सह आत अत् ॥

**[ कसरक्केहिं ]** । कसरकैः ॥

**पिज्जइ** । पीयते[२] ॥

**[ एम्वइ ]** । एवमेव । **प**श्चादेवमेवैवे० ॥

**सुहच्छडी** । सुखास्या । **ग**मिष्यमासां छः । **अ**डड० । **स्त्रि**यां तदन्ताड्डीः ॥

**[ पिए दिट्ठे नयणेहिं ]** । प्रियेण दृष्टेन नयनैः ॥

**[ महु ज्जि ]** । मम एव । **म**हुमज्झु ङसिङस्भ्याम् । **प**श्चादेवमेवैवेदानीं० - जि । **से**वादौ वा - द्वित्वम् ॥

**[ सिद्धत्था वंदेइ ]** । सिद्धार्थान् वन्दते ॥

**[ ताउं ]** । तावत् । **या**वत्तावतोर्वादेर्मउं ॥

**[ जरखंडी ]** । जरया खण्डा । जराजर्जरा । **अ**जातेः पुंसः - ङीः ॥

**[ लोअडी ]**[३] । लोमपटी । **शी**घ्रादीनां० - मलोपः ॥

**[ गलि ]** । गले ॥

**[ मणिअडा ]** । मणि । जस् । लुक् ॥

**[ न वीस ]** । न विंशति । ईर्जिह्वा० । **विं**शत्यादेर्लुक् ॥

**[ गोट्ठडा ]** । गोष्ठस्थाः पुरुषाः ॥

**[ कराविआ ]** । कारिता ॥

**[ मुद्धए ]** । मुग्धया । **ट** ए । **स्या**दौ दी० ॥

**उट्ठबईस** इति उत्थानोपवेशनचेष्टानुकरणम् ॥ ४.४२३ ॥

---

१. स्वराणां० - अः - **ख.** । २. पीयते । ईअइज्जौ० । **स्व**राणां० । एवमेव - **ख.** । ३. लुनाति लोस्तस्य पटी लोपटी । लोमपटी वा, **शी**घ्रादित्वात् - **ताटि.** ।

## घइमादयोऽनर्थकाः ॥ ४.४२४ ॥

**[ अम्मडि ]** । अम्मा । **अडड॰** । **स्त्रियां** तदन्ताड्डीः । सि । लुक् । **स्या**दौ दी॰ ॥

**[ पच्छायावडा ]**[१] । पश्चात्ताप । **ह्रस्वात्** थ्यश्च॰ । **अ**डड॰ । सि । लुक् । **स्या**दौ दी॰ ॥

**[ विवरीरी ]**[२] । विपरीता । **शीघ्रा**दीनां॰ - विवरीर । **अजातेः** पुंसः - ङी ॥ ४.४२४ ॥

## तादर्थ्ये केहिं-तेहिं-रेसि-रेसिं-तणेणाः ॥ ४.४२५ ॥

**[ एह ]** । एतद् । सि । **एतदः** स्त्रीपुंक्लीबे एहएहोएहु ॥

**[ परिहासडी ]** । परिभाषा । **अ**डड॰ । **स्त्रियां** तदन्ताड्डीः ॥

**[ अइभ न ]**[३] । अतिभ न ।

**[ कवणहिं ]** । कस्मिन् । **किमः** काइंकवणौ वा । **ङे**र्हिं ॥

**झिज्जउं** । क्षि क्षये । कर्मकर्तरि व**र्त**माना ए । **अन्त्य**त्रयस्याद्यस्य उं । क्य । **ई**अइज्जौ॰ । **क्षः** खः क्वचित्तु छझौ । **स्व**राणां स्व॰ - इ ॥

**[ तउ ]** । युष्मद् । ङस् । **ङ**सिङस्भ्यां तउतुज्झतुध्र॰ ॥

**[ अन्नहि ]** । अन्या । ङ्स् । **ङ**स्ङस्योर्हे । **स्या**दौ दी॰ ॥ ४.४२५ ॥

## पुन-र्विनः स्वार्थे डुः ॥ ४.४२६ ॥

**सुमरिज्जइ** । **स्मरे**र्झरझूर॰ ॥

**वीसरइ** । **विस्मुः** पम्हुसविम्हरवीसराः ।

**[ मणाउं ]** । मनाक् । **एवं**परंसमंध्रुवंमामनाक इत्यनेन मणाउं[४] ॥

**[ पुणु ]** । **पुन**र्विनः स्वार्थे डुः ॥

**[ सुमरणु ]** । स्मरण । **स्मरे**र्झरझूरभर॰ ॥

**[ जाउं ]** । यावत् । **याव**त्तावतोर्वादेर्मउंमहिं ॥

---

१. पश्चात्तापा वर्तन्ते - **ताटि.** । २. विपरीतमीर्त्ते, **कर्म**णोऽण् । विपरीतस्य वा शीघ्रादित्वाद् विवरीरः - **ताटि.** । ३. अत्यद्भुता इत्यर्थः - **क.** । अतिभ । अपूर्वा - **ताटि.** । ४. मणाउं । **[ जहिं ]** । यस्य । **ङसः** सुहो॰ (?) । पुनः । **पुनर्वि**॰ - **ख.**।

**[ गउं तहो ]** । गतः तस्य ॥

**[ पेम्महो[1] ]** । प्रेमन् । **से**वादौ वा - द्वित्वम् । **ङसः** सुहो० ॥

**[ कइं ]** । किम् । **किमः** काइंकवणौ वा । **स्व**राणां० - अः ॥

**[ नाउं ]** । नामन् । **अन्त्यव्यञ्ज०** । **स्व**रा इति प्रायोग्रहणात् मकारस्य उं ॥ ४.४२६ ॥

## अवश्यमो डें-डौ ॥ ४.४२७ ॥

**[ जिब्भिंदिउ ]** । जिह्वेन्द्रियम् । **ह्वो** भो वा ॥

**[ नायगु ]** । नायक । **अ**नादौ स्वरादसंयुक्तानां कस्य गः ॥

**[ वसिकरहु ]** । वशेकुरुत । **ब**हुत्वे हुः ॥

**[ जसु ]** । यस्य । **ङसः** सुहोस्सवः ॥

**[ अधिन्नइं अन्नइं ]** । आयत्तान्यन्यानि ॥

**[ मूलि विणट्ठइ तुंबिणिहे ]** । मूले विनष्टे तुम्बिन्याः । **ङस्**ङस्योर्हे ॥

**सुक्कहिं** । शुष्कानीवाऽऽचरन्तीति क्विप् । अन्ति । **त्या**देराद्यत्रयस्य० - हिं । **शु**ष्कस्कन्दे वा - कः ॥

**[ पण्णइं ]** । पर्ण । जस् । **क्ली**बे जस्शसोरिं ॥

**न सुअहिं** । **स्व**पावुच्च । **त्या**देराद्यत्रयस्य बहुत्वे हिं ॥ ४.४२७ ॥

## एकशसो डि ॥ ४.४२८ ॥

**[ पच्छित्ताइं ]** । प्रायश्चित्त । **क**गचजेति यलुक् । **स्व**राणां स्वरा इति अकारेण सह आकारस्य अकारः । **ह्र**स्वात् थ्यश्चत्सप्सा० ॥ ४.४२८ ॥

## अ-डड-डुल्लाः स्वार्थिक-क-लुक् च ॥ ४.४२९ ॥

**[ विरहाणलजालकरालिअउ ]** । विरहानलज्वालाकरालित । अत्र अः ॥

**[ पहिउ ]** । पथिक ॥

**पंथि** । पन्थे । [2]पथिन्-समानार्थः पन्थशब्दः ।

---

१. नेहहो - **ता.मु.** । २. पथिन्मथिन्समा० - **ग.** ।

**[ जं ]** । यत् यस्मादर्थे ॥

**[ तं ]** । तत् तस्मादर्थे । बाहुलकादन्यव्यञ्जनस्याऽपि **वा** स्वरे मश्चेत्यनेन म् ॥

**[ मेलवि ]** । मिलत् श्लेषणे । क्त्व । **क्त्व** इइउ[इवि]अव० । **स्वराणां** स्व० - ए ॥

**[ सव्वहिं ]** । सर्व । **भिस्सुपोर्हिं** ॥

**[ पंथिअहिं ]**[१] । पन्थिक । पन्थोऽस्याऽस्ति । **अतो**ऽनेकस्वरात् - इकः ॥

**[ जि ]** । एव । **पश्चा**देवमेवैवे० ॥

**[ अग्गिट्ठउ ]** । अग्नये तिष्ठतीत्यग्निष्ठः, **स्थापास्ना**त्रः कः ॥ ४.४२९ ॥

## योगजाश्चैषाम् ॥ ४.४३० ॥

**[ सीमासंधिहिं**[२] **]** । सीमासन्धि । ङि । **लिङ्ग**मतन्त्रमिति स्त्रीत्वे **ङे**र्हिं ॥

**[ पेक्खिवि बाहुबलुल्लडा ]** । प्रेक्ष्य बाहुबलम् ॥ ४.४३० ॥

## स्त्रियां तदन्ताड्डीः ॥ ४.४३१ ॥

**[ पहिआ ]** । पथिक । **स्यादौ** दी० ॥

**[ दिट्ठी ]** । दृष्ट । **ष्ट**स्याऽनुष्ट्रेष्टा० - ठः । **अजातेः** पुंसः - ङीः ॥

**निअंत** । **दृशो** निअच्छपेच्छा० । शतृ → न्त ॥

**अंसूसासेहिं** । अश्रु-उद्श्वास । **वक्रा**दावन्तः । **अनुत्साहो**च्छन्ने० - ऊ । भ्याम् । **द्विवचनस्य** बहुवचनम् - भिस् । **भिस्सुपोर्हिं** । **भिस्येद्वा** ॥

**तिंतोव्वाणं**[३] । स्तिमितोद्वानम् । तिमतीमष्टिमष्टीमच् आर्द्रभावे, तिम् । क्त । **मो**ऽनुस्वार इति बाहुलकादनन्त्यस्याऽपि अनुस्वारः ॥

**करंत** । शतृ → न्त । **ऋ**वर्णस्याऽरः ॥ ४.४३१ ॥

## आऽन्तान्ताड्डाः ॥ ४.४३२ ॥

**[ पिउ आइउ सुअ वत्तडी ]** । प्रिय आचितः[४] श्रुता वार्ता ॥

---

१. पथिकैः । **वक्रा**दा० - **ताटि.** । २. धिहि - ता. । ङसिभ्यस्ङीनां० - **ताटि.** । ३. तिंतुव्वाणु - **ता.** । तिमितोद्वान । **स्व**राणामित्यनेन मेरिकारेण सह पूर्वस्य उत्वम् । **क्व**चिदनन्त्यस्येति **म**स्याऽनुस्वारः - **ताटि.** । ४. आचितः । विरहस्य - **ग.** ।

**[ झुणि ]** । ध्वनि । **त्व**थ्वद्वध्वां चछजझाः क्वचित् । **ध्व**निविष्वचोरुः ॥

**[ कण्णडइ पइट्ठ ]** । कर्णे प्रविष्टा ॥

**[ तहो ]** । तद् । ङस् ॥

**[ विरहहो नासंतअहो ]** । विरहस्य नश्यतः । **स्व**राणां० - दीर्घः ॥

**[ धूलडिआ ]** । धूलि । **यो**गजाश्चैषामिति डडअश्च । **अ**स्येदे इत्यनेन अकारे परे डडान्त्याकारस्य इः । ततो अनेनाऽन्त्याकारस्य डाः ॥ ४.४३२ ॥

## अस्येदे ॥ ४.४३३ ॥

## युष्मदादेरीयस्य डारः ॥ ४.४३४ ॥

**[ संदेसएं[१] ]** । सन्देश । **अ**डड० - अः ॥

**[ तुहारेण ]** । युष्मद् । ङस् । तवाऽयं, **दोरीयः** । **त**इतुतेतुम्हंतुहतुहं इति ङसा सह तुहादेशः । अनेन ईयस्य डारः ॥

**[ जं ]** । यत् । अव्ययं संस्कृतसिद्धम् । **वा** स्वरे मश्च बाहुलकाद् दस्य म् ॥

**[ संगहो ]** । सङ्ग । **ङ**सः सुहोस्सवः ॥

**मिलिज्जइ** । मिलत् श्लेषणे । **ई**अइज्जौ० ॥

**[ सुइणंतरि ]** । स्वप्नान्तरे । **स**र्वत्र लवरा० । **स्व**पावुच्च । **स्व**प्ने नात् - इः । **क**गचज० - पलुक् ॥

**[ पिए पाणिएण ]** । पीतेन पानीयेन । **पा**नीयादिष्वत् ॥

**[ पिअ पिआस किं ]** । हे प्रिय ! पिपासा किं ॥

**छिज्जइ** । छोंच् छेदने । **ई**अइज्जौ क्यस्य । **स्व**राणां० - इः ॥ ४.४३४ ॥

## अतोर्डेत्तुलः ॥ ४.४३५ ॥

## त्रस्य डेत्तहे ॥ ४.४३६ ॥

**[ वारि ]** । द्वार । **क**गटड० - दलुक् । **ङि**नेच्च ॥

---

१. संदेसें - **ता.मु.** ।

**[ घरि ]** । गृह । **गृ**हस्य घरोऽपतौ ॥

**[ लच्छि ]** । लक्ष्मी । **अ**धो मन० । **छो**ऽक्ष्यादौ । **स्या**दौ दी० ॥

**[ विसंठुल ]** । विशंस्थुलो[१] । **शषोः** सः । **ठो**ऽस्थिविसंस्थुले । **स्या**दौ दी० ॥

**ठाइ । स्थ**ष्ठाथक्क० ॥ ४.४३६ ॥

## त्व-तलोः प्पणः ॥ ४.४३७ ॥

## तव्यस्य इएव्वउं-एव्वउं-एवा ॥ ४.४३८ ॥

**[ एउ ]** । एतद् । अम् । लुक् । **स्य**मोरस्योत् ॥

**गृण्हेप्पिणु** । **ग्र**हेः गृण्हः ॥

**[ ध्रुं[२] ]** । यद् । **य**त्तदः स्यमोर्ध्रुंत्रं ॥

**[ मइं ]** । मया । **टा**ङ्यमा मइं ॥

**[ जइ प्रिउ ]** । यदि प्रियः ॥

**उव्वारिज्जइ** । वृग् उत्पूर्वः । णिग् । वृद्धिः । ते → इच् । क्य । **ई**अइज्जौ० ॥

**[ महुं करिएव्वउं किं पि ण ]** । मम कर्तव्यं किमपि न ॥

**[ वि ]** । अपिरेवार्थे मन्तव्यम् ॥

**[ पर ]** । परम् । **एवं**परंसमंध्रुवं० ॥

**[ दिज्जइ ]** । दीयते ॥

कस्याऽपि मोचनहेतोः किमप्यर्थं प्रति सखीभिरभ्यर्थ्यमानाया नायिकाया उक्तिरियम् ॥

**[ देसुच्चाडणु ]** । देशोच्चाटनम् । **टो** डः ।

**[ सिहिकढणु ]** । शिखिक(क्व)थनम् । **क्व**थवर्द्धां ढः ॥

**[ घणकुट्टणु ]** । घनकुट्टनम् ।

**[ जं लोइ ]** । यत् लोके ॥

---

१. विसंस्थुला - **ख.** । २. ध्रुवं सिद्धम् । वेन सह **स्व**राणां स्वरा - अनुस्वारः - **ताटि.** ।

**[ मंजिट्ठए ]** । मञ्जिष्ठा । **क**गटडतदप० - षलुक् । टा । **ट** ए । **स्या**दौ दी० ॥

**[ अइरत्तिए ]** । अतिरक्त । **अ**जातेः पुंसः - ङी । **स्या**दौ दी० ॥

**सोएवा** । स्वप् । तव्य । **स्व**पावुच्च - ओ ॥

**[ पर ]** । परम् । **ए**वंपरंसमंध्रुवं० ॥

**[ वारिआ ]** । वारितम् ॥

**[ पुप्फवईहिं ]** । पुष्पवती । भिस् । **भि**स्सुपोर्हिं ॥

**[ समाणु ]** । समम् । **ए**वंपरंसमंध्रुवंमामनाक० - समाणु ॥

**जग्गेवा** । जागृक् । **जा**ग्रेर्जग्गः । तव्य । अनेन एवादेशः ॥ ४.४३८ ॥

## क्त्व इ-इउ-इवि-अवयः ॥ ४.४३९ ॥

**[ हिअडा ]** । हृदय ॥

**[ जइ वेरिइं[1] ]** । यदि वैरिन् । **अ**डड० - अः । **स्व**राणां स्वराः - इ । जस् । लुक् ॥

**[ तो ]** । ततस् । **त**तस्तदोस्तो ॥

**[ किं अब्भि ]** । किमभ्रे । **ङि**नेच्च ॥

**चडाहुं** । **आ**रुहेश्चडवलग्गौ । मस् । **ब**हुत्वे हुं । **व्य**ञ्जनाद० । **स्व**राणां स्व० - आ ॥

**[ अम्हाहिं ]** । अस्मद् । आम् । **अ**म्हहं भ्यसाम्भ्याम् । **स्व**राणां० - आत्वम् इत्वं च ॥

**[ बे ]** । द्वि । औ । **द्वि**वचनस्य बहुवचनम् - जस् । **द्वे**र्दोवे ॥

**[ हत्थडा जइ पुणु मारि ]** । हस्तौ यदि पुनर्मारियत्वा ॥

**[ मराहुं ]** । म्रियामहे । **ब**हुत्वे हुं ॥

**[ रक्खइ सा विसहारिणी ]** । रक्षति सा विषहारिणी । पानीयहारिका ॥

**[ तैं[2] कर चुंबिवि जीउ ]** । तौ करौ चुम्बित्वा जीवितम् । **या**वत्तावज्जीवितावर्तमानावटेति विलुक् ॥

---

१. वेरिअ - **ता.मु.** । २. बे - **मु.** ।

**[ पडिबिंबिअमुंजालु ]** । प्रतिबिम्बितं(त)मुञ्जालम् । **प्र**त्यादौ डः ॥

**[ जलु जेहिं ]** । जलं यद्भ्याम् ॥

**अडोहिउ** । अवगाहेस्त**क्ष्या**दित्वादडोहः । नञ्[1] पूर्वः । क्त्वा । अनेन इउ ॥

**[ पीउ ]** । पीतम् ॥

**[ बाह ]** । बाहु । **स्व**राणां० - अत्वम् । अम् । लुक् ॥

**विछोडवि** । छुटण् छेदने । **टो** डः ॥

**जाहि** । यांक् । हि । **म**ध्यत्रयस्याऽऽद्यस्य हिः ॥

**[ तुहुं हउं ]** । त्वम् अहम् ॥

**[ तेवँइ ]**[2] । तथापि । **क**थंतथायथां थादेरेमे० । अपिरेवार्थे ॥

**[ को दोसु ]** । को दोषः ॥

**[ हिअयट्ठिउ ]** । हृदयस्थितः । **स्व**राणां० । **स्थ**ष्ठा० ॥

**[ जइ ]** । यदि ॥

**नीसरहि** । सृं गतौ निर्पूर्वः । सिव् । **म**ध्यत्रयस्य० - हिः । **ऋ**वर्णस्याऽरः । **व्य**ञ्जनाद० । **र्लु**कि निरः - दीर्घः ॥

**जाणउं** । ज्ञो जाणमुणौ । मिव् । **अ**न्त्यत्रयस्याऽऽद्यस्य उं ॥

**[ मुंज सरोसु ]** । हे मुञ्ज ! सरोषः ॥ ४.४३९ ॥

## एप्प्येप्पिण्वेव्येविणवः ॥ ४.४४० ॥

**जयस्सु** । जगत् । ङे । **च**तुर्थ्याः षष्ठी - ङस् । **ङ**सः सुहोस्सवः ॥

**लहहिं** । लभ् । अन्ते । **त्या**देराद्यत्रयस्य बहुत्वे हिं ॥

**झाएविणु** । **ध्या**गोर्झागौ ॥

**तत्तस्सु** । तत्त्व । अम् । **क्व**[3]चिद् द्वितीयादेः - ङस् ॥ ४.४४० ॥

## तुम एवमणाऽणहमणहिं च ॥ ४.४४१ ॥

**[ देवं दुक्करु निअयधणु करण न तउ पडिहाइ ]** । दातुं दुष्करं निजकधनं कर्तुं न तपः प्रतिभाति । **प्र**त्यादौ डः ॥

---

१. नङ् - **ख.** । २. प्यादयः - **ताटि.** । ३. अम् । लुक् । **क्व**चिद्० - **ग.** ।

**[ एम्वइ ]** । एवमेव । **प**श्चादेवमेवैवेदानीं० - एम्वइ ॥

**[ सुहु भुंजणहं मणु ]** । सुखं भोक्तुं मनः ॥

**[ पर ]** । परम् । **एवं**परंसमंध्रुवं० ॥

**[ भुंजणहिं न जाइ ]** । भोक्तुं न याति ॥

**[ जेप्पि ]** । जेतुम्[१] ॥

**[ चएप्पिणु ]** । त्यक्तुम्[२] । **त्यो**ऽचैत्ये - चः ॥

**[ सयल धर ]** । सकलां धराम् ॥

**[ लेविणु ]** । लातुम्[३] ॥

**[ तवु पालेवि ]** । तपः पालयितुम्[४] ॥

**[ विणु ]** । विना । **पु**नर्विनः स्वार्थे डुः ॥

**[ संतिं[५] ]** । शान्ति । टा । **एं** चेदुतः । **स्व**राणां० - इं ॥

**[ तित्थेसरेण ]** । तीर्थेश्वरेण ॥

**[ को ]** । कः । **अ**तः सेर्डोः ॥

**[ सक्कइ ]** । शक्नोति । **श**कादीनां द्वित्वम् ॥

**[ भुवणे वि ]** । भुवनेऽपि ॥ ४.४४१ ॥

## गमेरेप्पिण्वेप्प्योरेर्लुग् ॥ ४.४४२ ॥

**[ गंप्पिणु ]** । गत्वा ॥

**[ वाणारसिहिं ]** । वाराणस्याम् । **क**रेणूवाराणस्यो रणोर्व्यत्ययः । **ङे**र्हिं । **स्या**दौ दी० ॥

**[ नर अह ]** । नरा अथ ।

**[ उज्जेणिहिं ]** । उज्जयिनी । **क**गचजेति यलुक् । **स्व**राणां स्वरा इत्यकारे(रस्ये)कारेण सह एकारः ॥

१. जित्वा - **ग.** । २. त्यक्त्वा - **ग.** । ३. लात्वा - **ग.** । ४. पालयित्वा - **ग.** । ५. सन्तें - **मु.** ।

**[ गंपि ]** । गत्वा ॥

**[ मुआ ]** । मृताः ॥

**परावहिं** । आप्लृंट् परापूर्वः । अन्ति । **त्या**देराद्यत्रयस्य बहुत्वे हिं । **व्य**ञ्जनाद० । **पो** वः ॥

**[ परमपउ ]** । परमपदम् ॥

**[ दिव्वंतरइं ]** । दिव्यान्तराणि । तीर्थान्तराणीत्यर्थः । **क्ली**बे जस्शसोरिं ॥

**[ म जंपि ]** । मा कथय । **क**थेर्वज्जरपज्जरोप्पाल० । **हि**स्वयोरिदुदेत् ॥

**[ गंग गमेप्पिणु जो मुअउ[1] ]** । गङ्गां गत्वा यो मृतकः ॥

**[ जो सिवतित्थ गमेप्पि ]** । यः शिवतीर्थं गत्वा ॥

**[ कीलदि ]** । क्रीडति । **डो** लः ॥

**[ तिदसावासगउ सो जमलोउ ]** । त्रिदशावासगतः स यमलोकम् ॥

**[ जिणेप्पि ]** । जित्वा । **चि**जिश्रुहुस्तुलूपूधूगां णो० ॥ ४.४४२ ॥

## तृनोऽणअः ॥ ४.४४३ ॥

**[ हत्थि ]** । हस्तिन् । सि । लुक् । **स्त**स्य थोऽसमस्तस्तम्बे ॥

**[ मारणउं ]** । मारयिता ॥

**[ लोउ बोल्लणउ ]** । लोकः कथयिता । **क**थेर्वज्जरपज्जरोप्पालपिसुणसंघबोल्ल० ॥

**[ पडहु ]** । पटहः ॥

**[ वज्जणउ ]** । वदिता । **स्वि**दां ज्जः ॥

**[ सुणउ भसणउ ]** । शुनकः भषिता । भष भर्त्सने ॥ ४.४४३ ॥

## इवार्थे नं-नउ-नाइ-नावइ-जणि-जणवः ॥ ४.४४४ ॥

**[ मल्लजुज्झु ]** । मल्लयुद्धम् । युधिः । क्त । **यु**धबुधगृधक्रुधसिधमुहां झः । **क**गचजेति तलुक् ॥

---

१. मुअइ - **मु.** ।

**[ रविअत्थवँणि[१] ]** । रविअस्तमयने । **स्त**स्य थोऽसमस्त० । **मो**ऽनुनासिको वो वा । **क**गचजेति यलुक् । **स्व**राणां स्व० - अकारेण सह अकारः ॥

**[ कंठि विअण्णु ][२]** । कण्ठे वितीर्णम् । **स्व**राणां स्व० - अः ॥

**[ न छिण्णु ]** । न छिन्नम् ॥

**[ चक्कें खंडु ]** । चक्रेण खण्डम् ॥

**[ मुणालिअहे ]** । मृणालिकायाः । **स्व**राणां० - उः । **ङ**स्ङस्योर्हे । **स्या**दौ दी० ॥

**[ नउ जीवग्गलु ]** । इव जीवार्गला ॥

**[ दिण्णु ]** । दत्ता । **स्व**राणां० - इः । **प**ञ्चाशत्पञ्चदशदत्ते - णः ॥

**[ वलयावलि-निवडण-भएण ]** । वलयावलिनिपतनभयेन ॥

**[ धण उद्धब्भुअ ]** । नायिका ऊर्ध्वभुजा । **से**वादौ वा प्राप्तौ **द्वि**तीयतुर्ययोरुपरि० ॥

**[ जाइ ]** । याति ॥

**[ वल्लहविरहमहादहहो ]** । वल्लभविरहमहाह्रदस्य । **ह्र**दे हदोः । **ङ**सः सुहोस्सवः ॥

**[ थाह ]** । स्ताघम् । **स्त**स्य थोऽसमस्तस्तम्बे । **ख**घथधभाम् ॥

**गवेसइ** । गवेषण् मार्गणे । प्राकृतत्वान्न णिच् । तिव् → इच् । **व्य**ञ्जनाद० ॥

**[ पेक्खेविणु मुहु जिणवरहो ]** । प्रेक्ष्य मुखं जिनवरस्य ॥

**[ दीहरनयण सलोणु ]** । दीर्घनयनं सलवणम् । **ख**घथधभाम् - हः । **रो** दीर्घात् - र-प्रत्ययः । **न** वा मयूखलवणचतुर्थचतुर्गुण० - ओ ॥

**[ नावइ गुरुमच्छरभरिउ ]** । इव गुरुमत्सरभृतम् । भृंग् । क्तः । **ऋ**वर्णस्याऽरः । **व्य**ञ्जनाद० । **स्व**राणां० - इ ॥

**[ जलणि पवीसइ ]** । ज्वलने प्रविशति । **स्व**राणां स्व० - ईः ॥

**[ लोणु ]** । लवणम् ॥

**[ चंपयकुसुमहो ]** । चम्पककुसुमस्य ॥

---

१. अत्थमणि - **मु.** । २. विइण्णु - **मु.** ।

**[ मज्झि ]** । मध्ये । **सा**ध्वसध्यह्यां झः ॥

**[ सहि भसलु ]** । सखि ! भ्रमरः । **भ्र**मरे सो वा । **ह**रिद्रादौ लः ॥

**[ पइट्ठउ ]** । प्रविष्टः ॥

**[ सोहइ इंदनीलु जणि कणइ ]** । शोभते इन्द्रनील इव कनके ॥

**[ बइट्ठउ ]** । उपविष्टः ॥ ४.४४४ ॥

## लिङ्गमतन्त्रम् ॥ ४.४४५ ॥

**[ अब्भा लग्गा ]** । अभ्राणि लग्नानि ॥

**[ डुंगरिहिं ]** । पर्वत । **शी**घ्रादीनां० - डोंगरः । सुप् । **भि**स्सुपोर्हिं । **स्व**राणां० ॥

**[ पहिउ ]** । पथिकः ॥

**[ रडंतउ ]** । रटन् । रट परिभाषणे । **श**त्रानशः - न्त । **अ**डड० - अः ॥

**[ जाइ ]** । याति ॥

**[ जो एहा ]** । य ईदृशः । **या**दृक्तादृक्कीदृ[शीदृ]शां दादेर्डेहः । **स्या**दौ दीर्घ० ॥

**[ गिरिगिलणमणु ]** । गिरिगिलनमनाः ॥

**[ सो किं ]** । स किम् ॥

**[ धणहे ]** । नायिकायाः । **ङ**स्ङस्योर्हे ॥

**धणाइ** । धनमिच्छति, क्यन् । **क्षुत्तृ**ड्गर्द्धेऽशनायोदन्यधनायम् । तिव् → इच । **क**गचजेति यलुक् । **स्व**राणां० - इचा सह यकार-अकारस्य इः ॥

तां न रक्षतीति भावः ॥

**[ पाइ विलग्गी ]** । पादे विलग्न । **अ**जातेः पुंसः - ङीः । **लु**गित्यलुक् ॥

**अंतडी** । अन्त्र । **वा**धो रो लुक् । **अ**डड० । **स्त्रि**यां तदन्ताड्डीः ॥

**[ सिरु ]** । शिरः ॥

**ल्हसिअउँ**[१] । **स्त्रं**सेर्ल्हसडिंभौ । क्त । **व्य**ञ्जनाद० । **स्व**राणां० - इः । **स्वा**र्थे० - कः । **का**न्तस्यात उं० ॥

---

१. ल्हसिउं - मु. ।

**खंधस्सु** । स्कन्ध । **ष्क**स्कयोर्नाम्नि - ख । ङि । **क्व**चिद् द्वितीयादेः - **ङस्** । **ङसः** सुहोस्सवः ॥

**[ तो ]** । तदा । **त**तस्तदोस्तोः ॥

**[ वि ]** । अपि ॥

**[ कटारइ ]** । क्षुरिका । **शी**घ्रादीनां० - कटार । **अ**डड० - अ । **ङि**नेच्च ॥

**[ हत्थडउ ]** । हस्तः ॥

**[ बलि ]** । बलिः ॥

**[ किज्जउं ]** । क्रिये । **अ**न्त्यत्रस्याऽऽद्यस्य उं । **ई**अइज्जौ क्यस्य । **स्व**राणां स्व० - ऋकारस्येकारेण सह इः ॥

**[ कंतस्सु ]** । कान्तस्य ॥

**[ सिरि ]** । शिरसि ॥

**चडिआ** । **आ**रुहेश्चडविलग्गौ । क्तः ॥

**खंति** । खादृ भक्षणे । अन्ति → न्ति । **खाद**धावोर्लुक् । **स्व**राणां० - ह्रस्वः ॥

**[ प्फलइं ]** । फलानि । **से**वादौ वा प्रातौ **द्वि**तीयतुर्ययो० । **क्ली**बे जस्शसोरिं ॥

**[ पुणु ]** । पुनः ॥

**[ डालइं ]** । शाखा । **शी**घ्रादीनां - डाल० ॥

**मोडंति** । मुट प्रमर्दने । अन्ति । **टो** डः ॥

**[ तो वि महद्दुम ]** । तदाऽपि महाद्रुमाः ॥

**[ सउणाहं ]** । शकुनानाम् । **आमो** हं ॥

**अवराहिउ** । अपराध्यते अपराद्धम् । भावे क्तः । **व्यञ्ज**नाद० । **स्व**राणां स्वरा० - इः ॥

**[ न करंति ]** । न कुर्वन्ति ॥ ४.४४५ ॥

## शौरसेनीवत् ॥ ४.४४६ ॥

**[ सीसि ]** । शीर्षे । **ङि**नेच्च ॥

**[ सेहरु ]** । शेखर ॥

**[ खणु ]** । क्षणम् ॥

**[ विणिम्मविदु ]** । विनिर्मापितम् । **तो** दोऽनादौ शौरसेन्यामयुक्तस्येति दः ॥

**[ खणु कंठि पालंबु किदु रदिए ]** । क्षणं कण्ठे प्रालम्बः कृतं(तः ?) रत्या । **ट** ए ॥

**[ विहिदु खणु मुंडमालिए ]** । विहित(तं ?) क्षणं मुण्डमालिकायाम् । **ङि**नेच्च - ए ॥

**[ जं ]** । यत् । सि । **क्ली**बे स्वरान् म् सेः । **मो**ऽनुस्वारः ॥

**[ पणएण तं ]** । प्रणयेन तत् ॥

**[ नमहु ]** । नमत । **ब**हुत्वे हुः ॥

**[ कुसुमदामकोदंडु ]** । कुसुमदामकोदण्ड ॥

**[ कामहो ]** । कामस्य । **ङसः** सुहोस्सवः ॥ ४.४४६ ॥

## व्यत्ययश्च ॥ ४.४४७ ॥

**[ शदमानुशमंशभालके ]** । शतमानुषमांसभारके । **तो** दोऽनादौ० । **श**षोः सः । **र**सोर्लशौ । **मां**सादिष्वनुस्वारे - ह्रस्वः । सि । **अ**त एत् सौ पुंसि० । **अ**न्त्यव्यञ्जनस्य - सिलुक् ॥

**[ कुंभशहश्र ]** । कुम्भसहस्र । सि । **अ**न्त्यव्यं० - लुक् ॥

**[ वशाहे ]** । वसा । **ङ**स्ङस्योर्हे ॥

**[ संचिदे ]** । सञ्चित । **अ**त एत् सौ० ॥

**[ पेच्छइ ]** । **दृ**शो नियच्छपेच्छा० ॥

**सोहीअ** । शृंट् । तिव् । **सी**हीहीअ भूतार्थस्य । **यु**वर्णस्य गुणः ॥

**[ एस ]** । एतद् । सि । **त**दश्च तः सोऽक्लीबे ॥ ४.४४७ ॥

**शेषं संस्कृतवत् सिद्धम् ॥ ४.४४८ ॥**

**[ हेट्ठट्ठियसूरनिवारणाय ]** । अधःस्थितसूरनिवारण । **अ**धसो हेट्ठ । **स्थ**ष्ठाथक्कचिट्ठनिरप्पाः । **स्व**रादनतो वा - अ । **क्ते** - इः । **लु**गित्याकारस्य लुक् । **ङे**ङस्योर्यातौ । **अत** आः स्यादौ ॥

**उरे, उरम्मि** । **अन्त्यव्यञ्जन**स्येति सलुकि **डेम्मि** ङेः ॥ ४.४४८ ॥

**॥ इति श्रीमलधारिशिष्य-पण्डितनरचन्द्रविरचिते प्राकृतप्रबोधे चतुर्थः पादः ॥**

**नानाविधैर्विधुरितां[१] विबुधैः स्वबुद्ध्या,**
**तां रूपसिद्धिमखिलामवलोक्य शिष्यैः ।**
**अभ्यर्थितो मुनिरनुज्झितसम्प्रदाय[२]-**
**[३]मारम्भमेनमकरोन्नरचन्द्रनामा ॥**

卐 卐 卐

१. विधुरितं - **क. ख.** । विधुरतां - **ग.** । २. ज्झितसंखितं शास्त्रं (?) - **ग.** । ३. नास्तीयं पङ्क्तिः ग. प्रतौ ।